ISSN :- 0974 - 8946

अनुसन्धान-प्रकाशन-विभागीया

त्रैमासिकी शोध-पत्रिका

शोध-प्रभा

३५ वर्षे प्रथमोऽङ्कः (जनवरीमासाङ्कः) २०१० ई०

प्रधानसम्पादकः

प्रो० वाचस्पति उपाध्यायः

कुलपतिः

सम्पादकः

प्रो० रमेशकुमारपाण्डेयः

प्रकाशन-स्थलम्

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

नवदेहली-११००१६

प्रकाशकः

कुलपतिः,

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानित-विश्वविद्यालयः)

कुतुब इन्स्टीट्यूशनल एरिया,

नवदेहली-११००१६

ISSN :- 0974 - 8946

३५ वर्षे प्रथमोऽङ्कः (जनवरीमासाङ्कः) २०१० ई०

मुद्रकः

अमरप्रिंटिंगप्रैसः

दिल्ली

amarprintingpress@gmail.com

प्रधानसम्पादकः
प्रो० वाचस्पति उपाध्यायः
कुलपतिः

सम्पादकः
प्रो० रमेशकुमारपाण्डेयः

सम्पादकमण्डलम्
प्रो० (श्रीमती) अमिता शर्मा
प्रो० जयकान्तसिंहशर्मा

मुद्रणसहायकः
डॉ० ज्ञानधरपाठकः

शोध-प्रभा

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य
अनुसन्धान-प्रकाशन-विभागीया पत्रिका

१. एषा त्रैमासिकी शोध-पत्रिका।

२. अस्याः प्रकाशनं प्रतिवर्षं जनवरी-अप्रैल-जुलाई-अक्टूबरमासेषु भवति।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धान-प्रवृत्तेरुद्बोधनं प्रोत्साहनं विविधदृष्ट्याऽनुसन्धेयविषयाणां प्रकाशनं च विद्यते।

४. अस्यां श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाननिबन्धाः प्रकाश्यन्ते।

५. अप्रकाशितानां दुर्लभानां प्राचीनाचार्यरचितानां लघुग्रन्थानां सम्पादनभावानुवादटीकाटिप्पण्यादि-पुरस्सरं प्रकाशनमप्यस्यां क्रियते।

६. प्रकाशित-निबन्धः पत्रिकायाः एक प्रतिः लेखकाय निःशुल्कं दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति।

७. अस्यां पत्रिकायां विशिष्टानां संस्कृत-हिन्द्याङ्ग्ल-ग्रन्थानां समालोचना अपि प्रकाश्यन्ते। तदर्थं द्वे प्रतिकृति प्रेषयितव्ये। आलोच्यग्रन्थस्यालोचना यस्मिन्नङ्के प्रकाशिता भवति सोऽङ्को ग्रन्थकर्त्रे निःशुल्कं दीयते किञ्च समालोचनापत्राण्यपि यथासौविध्यं दीयन्ते।

८. अस्याः वार्षिकसदस्यताराशिः १५०.०० रु० (पञ्चाशदुत्तरैकशतं रूप्यकाणि) सदस्यताराशिः **कुलसचिव, श्रीलालबहादुरशास्त्री-राष्ट्रिय-संस्कृत-विद्यापीठ,** नई दिल्ली-१६, इति सङ्केतेन (बैंकड्राफ्ट अथवा मनीआर्डर) द्वारा प्रेषणीयः।

९. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः 'सम्पादकः' 'शोध-प्रभा', श्रीलालबहादुरशास्त्री राष्ट्रिय-संस्कृतविद्यापीठ, कटवारिया सराय, नई दिल्ली-११००१६ इति सङ्केतेन विधेयः।

सम्पादकः

नैवेद्यम्

संस्कृतमिति पदं संस्कृतभाषा-वाङ्मयोभयबोधकम्, यदुपजीव्य जीवनस्यान्तरं स्वरूपं ज्ञापयति संस्कृतिः, जीवनस्य जगतश्च परमोच्चभूमिं गतेनात्मना सात्त्विकमननचिन्तनाभ्यां यदनुभूयते "इदं विश्वस्मै विश्वाय हितकरमिदञ्च सुखकरं तत्संस्कृतौ समाविष्टम्। तपःस्वाध्यायपवित्रितान्तःकरणैः प्रबुद्धविशुद्धैः ऋषिभिरुद्भाविता भारतीया संस्कृतिः सभ्यता चोद्भावकोदारस्वभावहृदयनैर्मल्यविशिष्टाद् विश्वजनीनहिताय विश्वजनसुखाय च जाते। सा प्रथमासंस्कृतिर्विश्ववारेति प्रशस्यते विश्वैर्वरणीयेति उदीर्यते। अस्मिन् संसारे संस्कृतेः सभ्यतायाश्च कथङ्कारं विकासोऽभूदित्यर्थं वेदानुशीलनमनिवार्यं भवति। तदित्थं तदुक्तं सिद्धान्तात्मकं ज्ञानं संस्कृतिः, संस्कृतेरनुरूपं सदाचरणम्, सभ्यवेशः, मधुरं प्रियं सत्यसंलापादिकञ्च सभ्यता। ते संस्कृतिसभ्यते एकस्यैवादर्शतां गतस्य जीवनस्य आन्तरं बाह्यं स्वरूपं भवति। ज्ञानक्रिययोराचारविचारयोश्च सामञ्जस्यं सर्वत्र देशेऽत्र यदासाद्यते तदस्य पूर्णं विकासं सूचयति। ज्ञानं विना कर्म अन्धम्, कर्मणा विना ज्ञानं पङ्गु, भक्त्या विना ज्ञानं हृदयहीनं कर्म च निष्करुणं भवतीत्यत्रोपासनायां ज्ञानकर्मभक्तित्रितयस्य समरसताऽपेक्ष्यते। यदा च संस्कृतिरार्षवचननिरपेक्षा स्वभावे चागच्छति, तां पालयितुं मनः स्वतः प्रवर्तते, तदा सा सभ्यता भवति। रामायणकाले संस्कृतिरियमतीवोन्नतेति सर्वैः काव्यशास्त्रिभिः प्रवृत्तिशिक्षणाय राम एवोदाहारि-रामादिवद्वर्तितव्यमिति, रावणस्तु निवृत्तिशिक्षणायोपात्तः। तत्र काले स एकल एव, अन्ये तु तद्विपरीता केवलं तस्य भयेन तमनुसरन्ति स्म। तदेवमत्र सर्वं चिन्तनं विश्वपरकं, विश्वं हि सुरक्षितं चेत्सर्वं प्रातिस्विकं जगत् सुरक्षितमिति। विज्ञानस्योपरि अध्यात्मवादस्य नियन्त्रणमावश्यकम् तच्च स्वतोगृहीतं भवति, येन नियमिता वैज्ञानिका मानवविनाशाद् विरताः स्युः, यद्येकतो वादा संघर्षं कलहं शिक्षयन्ति, अपरतो मानवीयमावतनायाः शान्तिमुपदिशति। मानवतायाः सन्धायकमिदमुदारं संस्कृतवाङ्मयं शान्तिं जपति पठति उपदिशति चेतियं संरस्वती श्रुतिमहती न हीयताम् किन्तु महीयताम्। कर्तव्यं भवत्यस्माकं तस्या जीवातु-प्रदानेन रसायनचिकित्सया पुनर्यौवनसंपादनेनोज्जीवनमुन्मेषणं च तदपि च तस्या आश्रयभूतस्य संस्कृतस्य उज्जीवनेन संरक्षणेन च।

तद्दिशि प्रवृत्तेयं शोधप्रभानाम्नी शोधपत्रिका आन्तरदौर्बल्यमपनेतुं स्वस्थैः पथ्योपमैरौषधैर्द्यावद्वस्तु-बलोदयम्। तदस्याः प्रयासं सङ्कल्पं प्रस्तुतं च नैवद्यमङ्गीकृत्य सफलयन्तु सुधिय इति।

प्रो० वाचस्पति उपाध्यायः
कुलपतिः

सम्पादकीयम्

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य शोधप्रभाख्या शोधपत्रिका विविधविषयगवेषणपूर्णानां निबन्धानां संग्रहं क्रोडीकृत्य विद्योततेतराम्। अनुसन्धानसरणिसम्पन्नानामाचार्याणां शोधार्थिनाञ्च शोधपूर्ण-निबन्धान् कलेवरीकृत्य संस्कृतवाङ्मयपरिपोषणे निमग्नेयम् आनन्दसागरे निमज्जयति विदुषो नितान्तम्।

सम्प्रति विश्वविद्यालयेषु निर्धारिता ये पाठ्यक्रमाः, तेषु अनुसन्धानात्मकः पाठ्यक्रमः मूर्ध्नि स्थितो दृश्यते। आङ्गलभाषायां रिसर्चशब्देन व्यवहृतस्यास्य पाठ्यक्रमस्य कृते शोधः, गवेषणा, अन्वेषणा, अनुसन्धानप्रभृतयः शब्दाः प्रयुज्यन्ते। इमे सर्वेऽपि शब्दाः प्रायः आङ्गलभाषायाः रिसर्च इतिशब्दमेव मनसि निधाय प्रचलिता भवन्ति। फलतः शोधस्य पाश्चात्यसरणिमेव सङ्केतयन्ति। भारतस्य प्राचीनाध्ययनपरम्परायां सूत्रग्रन्थेषु प्रच्छन्नरूपेण निबद्धानामर्थानां प्रकाशनाय सूक्ष्मविवेचनपुरस्सरमनुसन्धानं द्योतयन्तो भाष्यम्, वृत्तिः, विवृत्तिः, व्याख्या, टीका, टिप्पणीप्रभृतयः शब्दाः प्रयुक्ता दृश्यन्ते । भारतीयपरम्परायां विद्यायाः प्रवाहः गुरोः सकाशाज्जायते। अतएवोच्यते- वंशो द्विधा, विद्यया जन्मना च। विद्यावंश उत्कृष्टतरो भवति जन्मवंशात् मुखाद् जायमानत्वात्। गुरोः सकाशादधीतस्य विषयस्य अध्यापनं विधाय शिष्य ऋष्यृणान्मुक्तो भवति। गुरोः सकाशाद् विद्यां समधिगम्य शिष्यः तस्या विद्यायाः विकासाय निरन्तरं प्रयतते। विद्याऽपि क्रमश एव सिद्धा भवति। अत एव महाभाष्ये मुनिना पतञ्जलिना प्रोक्तं यत्- चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति- आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति। नैषधमहाकाव्येऽपि विद्यायाः चातुर्विध्यं निर्दिष्टमस्ति। एवं सुस्पष्टमिदं यत् भारतीयपरम्परायां व्यवहारमुखा विद्या विद्यते। ऋषित्वमूला विद्या नवनवोन्मेषशालिनीं प्रज्ञां विना नैव सम्भाव्यते। तस्याः सूत्रभाष्यात्मकोऽनुसन्धानगर्भनिर्भरः प्रवाहः पाश्चात्यपद्धतिमतिशेते नितान्तम्। एवंविधायाः विद्यायाः विकासार्थं प्रतिबद्धा शोधप्रभा सततं किञ्चिन्नवीनं तत्त्वमुद्दीपयति प्रत्यङ्कम्।

विविधविषयविश्लेषपराः पञ्चदश लेखाः प्रकाश्यन्ते। एवं प्रतिभाविशेषोद्भासितशोधपूर्णा संस्कृतसौरभं वितन्वतीयं विदुषां सन्तोषाय भविष्यतीति कामयमानोहं प्रमादादज्ञानाद्वा सञ्जातस्य दोषजातस्य प्रशमनार्थं निर्देशादिप्रदानैश्च उत्साहश्रियः संवर्धनार्थमभ्यर्थये सुमनसः विदुषः।

प्रो० रमेशकुमारपाण्डेयः
सम्पादकः

विषयानुक्रमणिका

संस्कृतविभागः

हिन्दी विभाग

वैदिकमन्त्राणामृषयो देवताश्च

प्रो. रमेशचन्द्रदाशशर्मा

पुरुषविद्यानित्यत्वात्कर्मसम्पत्तिर्मन्त्रो वेद इति यास्कवचनं वेदमन्त्राणां महत्वं तत्प्रयोजनं च प्रतिपादयति। कार्यं दृष्ट्वा करणस्यानुमानं क्रियते। संसारचक्रेऽस्मिन्नहोरात्रयोरागमनमृतूनां समयेन परिवर्तनं विचित्राणां जीवजन्तूनां जनिः, इत्यादिवहूनि तथ्यानि कार्यरूपाणि विलोक्य समेषां मूले कश्चिन्नियन्तास्तीत्यनुमीयते। स एव परमेश्वरस्तत्सृष्ट्वा तदेवानुप्राविशत्। तेनैव सर्वाः खलु व्यवस्थाः निर्धार्यन्ते। एकस्यात्मनोऽन्ये देवा प्रत्यङ्गानि भवन्ति, महाभाग्याद्देवताया एक आत्मावहुधा स्तूयत इति वचनं तत्रैतत् नरराष्ट्रमिव व्यवस्थां सूचयति। यथालोके राष्ट्रसञ्चालनभूतं कार्यं जनाः विभज्य कुर्वन्ति, स्वं स्वं दायित्वं निर्वहन्। तथैवब्रह्माण्डसञ्चालनार्थं परमेश्वरस्य विविधरूपाणि विभिन्नानामभिः कर्मभिश्च सम्बोध्यन्ते, "एकं सद्विप्रा बहुधावदन्तीति। ताः शक्तयः (देवः) देवताशब्देनाभिधीयन्ते। देवो दानाद्वा दीपनाद् वा, द्योतनाद् वा, द्युस्थानो भवतीति वा। यो देवः सा देवता। तासु सर्वसामर्थ्यनिहितत्वादुच्यते–

दैवाधीनं जगत् सर्वं मन्त्राधीनस्तु देवताः इति। यद्देवाधीनं जगदिदं वर्तते, तेऽपि मन्त्राधीनास्तिष्ठन्ति। मन्त्राः पुनः परमेश्वरस्य निःश्वासभूताः शाश्वताश्च सन्तः,

युगान्तेऽन्तर्हितात् वेदान् सेतिहासान् महर्षयः
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा।। इतिवचनात्

ऋषीणां तपसाभिव्यज्यन्ते। तस्माहर्षयो मन्त्रद्रष्टार इत्युच्यते। ऋषिर्दर्शनात्। पश्यन्ति ते जगदिदं ज्ञान चक्षुषा। तस्मादभीष्टलाभाय मन्त्रानुष्ठानप्रसङ्गे उच्यते–"एतान्यविदित्वा योऽधीतेऽनुब्रूते जयति जुहोति यजते याजयते तस्य ब्रह्मनिर्वीर्यं यातयामं भवत्यथान्तराश्वगर्तं पद्यते स्थाणुं वर्च्छति प्रवामीयते पापीयान् भवति[१]।

ऋष्यादिज्ञानपूर्वकमनुष्ठाने फलश्रवणात्, तद्यथा–"अथ विज्ञायैतानि योऽधीते तस्य वीर्यवदथ योऽर्थ वित्तस्य वीर्यवत्तरं भवति, जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते"[२] तथाह्युच्यते–

---

१. अनुक्रम १.१

२. अनु. १.१

Dated : 15/12/09 Ist Proof / Shodh-jan-2010
Dated : 27/01/10 IInd Proof / Shodh-jan-2010
Dated : 10/03/10 IIInd Proof / Shodh-jan-2010
Dated : 13/03/10 IVth Proof / Shodh-jan-2010

वेदितव्यं हि दैवत्यं मन्त्रे मन्त्रे प्रयत्नतः।
दैवतज्ञो हि मन्त्राणां तदर्थमयगच्छति।।[1]

न हि कश्चिदविज्ञाय याथातथ्येन दैवतम्।
लौक्यानां वैदिकानां वा कर्मणां फलमश्नुते।।[2]

तत्र तत्र यथावच्च मन्त्रान्कर्मसु योजयेत्।
देवतायाः परिज्ञानात् तद्धिकर्म समृद्ध्यते।।[3]

यस्य यस्य तु मन्त्रस्य उद्दिष्टं देवता तु या।
तदाकारो भवेत्तस्य देवत्वं देवतोच्यते।।

एतैः प्रमाणैः कर्मसमृद्धये मन्त्रगतदेवतायाः परिज्ञानं परमावश्यकमिति प्रतीयते। तर्हि कस्तावात् मन्त्रपदार्थः? इति चेदुच्यते–मन्त्राः मननादिति यास्कः। मन्यते ज्ञायते विचार्यते बोध्यते वा सर्वाः विद्याः यैस्ते मन्त्राः। उच्यते हि–

मननान्मुनिशार्दूल त्राणं कुर्वन्ति वै यतः।
ददते पदमात्मीयं तस्मान्मन्त्राः प्रकीर्तिताः।।

मननात्सत्त्वरूपस्य देवस्यामिततेजसः।
त्रायते सर्वदुःखेभ्यस्तस्मान्मन्त्र इतीरितः।।

ते च मन्त्राः विविध प्रकाराः भवन्ति। उच्यते–

तास्त्रिविधा ऋचः परोक्षकृताः प्रत्यक्षकृता आध्यात्मिकाश्च। तत्र परोक्षकृतासर्वाभिर्नाम-विभक्तिभिर्युज्यन्ते प्रथपुरुषैश्चवाख्यातस्य। अथापि प्रत्यक्षकृताः स्तोतारो भवन्ति परोक्षकृतानिस्तोतव्यानि। अथ स्तुत्याशीर्वादशपथाभिशापात्मकाः विविधभावोपेता मन्त्राः भवन्ति। यथा–

स्तुतिः प्रशंसा निन्दा च संशयः परिदेवना।
स्पृहाशीः कत्थना याच्ञा प्रश्नः प्रैषः प्रवल्हिका।।

नियोगश्चानुयोगश्च श्लघविलपितं च यत्।
आचिख्यासाथ संलापः पवित्राख्यानमेव च।।

आहनस्या नमस्कारः प्रतिराधस्तथैव च।
संकल्पश्च प्रलापश्च प्रीतिवाक्यं तथैव च।।

१. बृ.दे. १.२
२. बृ.दे. १.४.
३. बृ.दे. १.२१

प्रतिषेधोपदेशौ च प्रमादापह्नवौ च ह।
उपप्रैषश्च यः प्रोक्तः संजरो यश्च विस्मयः।।

आक्रोशोऽभिष्टवश्चैव क्षेपः शापस्तथैव च।
उपसर्गो निपानश्च नाम चाख्यातमित्यपि।।

भूतं भव्यं भविष्यं च पुमान् स्त्री च नपुंसकम्।
एवं प्रकृतयो मन्त्राः सर्वं वेदेषु सर्वशः।[१]

एवमुच्चावच्चैरभिप्रायैः ऋषीणां मन्त्रदृष्टयो भवन्तीति यास्कः।
मन्त्रा नाना प्रकाराः स्युः दृष्टा ये तत्त्वदर्शिभिः।
स्तुत्वा चैव विभूत्या च प्रभावाद्देवतात्मनः।।[२]

तर्ह्येतेषु विविधप्रकोरषुमन्त्रेषु देवतर्षि निर्णयः कथं भवतीति प्रश्नः समागच्छति। तत्रोच्यते–

यत्कामऋषिः यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रोभवतीति स्वाभीष्टसिद्धये ऋषिः यां देवतां येन मन्त्रेण तुष्टाव, तस्य मन्त्रस्य सा देवता, स्तोता च ऋषिः सम्पद्यते। तथाह्युच्यते–

अर्थमिच्छन्नृषिर्देवं यं यमाहायमस्त्विति।
प्राधान्येन स्तुवन्भक्त्या मन्त्रस्तद्देव एव सः।[३]

स्तुवन्तं वेदसर्वोऽयमर्थयत्येषमामिति।
स्तौतीत्यर्थं ब्रुवन्तं च सार्थं मामेष पश्यति ।।[४]

सामान्यमन्त्रेषु देवतानिर्णयविधानमुक्त्वेदानी मनादिष्टदैवतमन्त्रेषु देवतानिर्णयमुच्यते। तथाहि–यास्कः–

यद्देवतः स यज्ञो वा यज्ञाङ्गं वा तद्देवता भवति। अथान्यत्र यज्ञात् प्राजापत्या इति याज्ञिकाः। नाराशंसा इति नैरुक्ताः। अपि वा सा कामदेवता स्यात्। प्रायो देवता वा। अस्ति ह्याचारो बहुलं लोके देवदेवत्यमतिथिदेवत्यं पितृदेवत्यमिति। याज्ञदैवतो मन्त्र इति। अत्रैव प्रसंगात् देवतास्वरूपमपि विमृश्यते–

अपि ह्यदेवता देवतावत् स्तूयन्ते। यथा– अश्वप्रभृतीन्योषधिपर्यन्तानि। आत्मनः रक्षणेऽसमर्था–

---

१. बृ.दे. १.३५-४०
२. बृ.दे. १.३४
३. बृ.दे. १.६
४. बृ.दे. १.९

नामुलूखलमुसलाश्वादीनां मनुष्यवत्स्तुतिः नैव युज्यते। नह्येवम्–माहाभाग्याद्देवताया एक आत्मा बहुधा स्तूयते।। इति महैश्वर्य योगाद् देवतासु सर्वं सम्भवति। इतरेतरजन्मानो भवन्तीरेतरप्रकृतयः। आत्मैवैषां रथो भवत्यात्माश्व आत्मायुधमात्मेषव आत्मा सर्वं देवस्य।

यद्यप्यग्निः पृथिवीस्थानः, वायुवेन्द्रो वान्तरिक्षस्थानः सूर्योद्युस्थान इति प्रामुख्येनाम्नायते तथापि स्थानत्रयेष्वाम्नाताः प्रायः देवतास्त्रयस्त्रिंशत्संख्यकाः भवन्तीति गण्यते। ऋग्वेदे यथा–

ये त्रिंशति त्रयस्परो देवासो बर्हिरासदन् विदन्नहद्वितासनन्।।[१]

त्रिंशति, त्रिंशत् संख्यायाः परस्तात् त्रयस्त्रिंशद्देवतेत्यर्थः। ये देवासः देवाः बर्हिः अस्मदीय–यज्ञसम्बन्धिनि बर्हिषि हविः स्वीकरणार्थं ते आसदन् आसीदन्तु। अथानन्तरं ते देवा अस्मान् यागे हविषां प्रदातॄन् इति जानन्तु।

शुक्त्वयजुर्वेदेऽपि–

ये देवासो दिव्येकादशस्थ पृथिव्यामध्येकादशस्थ।
अप्सुक्षितो महिनैकादशस्थ ते देवासो यज्ञमिमं जुषध्वम्।।[२]

प्रतिलोकमेकादश संख्यका देवाः सन्ति। आहत्य त्रयस्त्रिंशच्च भवन्तीति अथ शतपथब्राह्मणे–कतमे ते त्रयस्त्रिंशदित्यष्टौवसवः एकादश रुद्राद्वादशादित्यास्त एकत्रिंशत्, इन्द्रश्चैव प्रजापतिश्चेति त्रयस्त्रिंशाविति। लोकत्रयमाधारीकृत्य मैक्डानमहोदयेनापि देवानां नामानि वैदिकदेवशास्त्रे निर्दिष्टानि। तद्यथा–

पृथिवीस्थानीयदेवाः– नद्यः, पृथिवी, अग्निः, सोमो, बृहस्पतिश्चेति पञ्च।

अन्तरिक्षस्थानीयदेवाः– इन्द्रः, त्रिः आप्त्यः, अपान्नपात्, मातरिश्वा, अहिर्बुध्न्यः, अज एकयात्, रुद्रः, मरुत्, वायुः, वातः, पर्यन्यः, आपः।

द्युस्थानीयदेवाः– द्यौः, वरुणः, मित्रः सूर्यः, सविता, पूषा, विवस्वान्, आदित्यगणः, उषस्, अश्विनौ।

शुक्लयजुर्वेदीये मन्त्रे–

त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चाऽसपर्यन्।
औक्षन् धृतैरस्तृणन् बर्हिरस्मा आदिद्धोतारं न्यसादयन्त।।[३]

१. शुक्लयजुर्वेदे ८.२८.१
२. शुक्लयजुर्वेदे ७.१९
३. शुक्लयजुर्वेदे ३३.७

देवानां संख्या त्रिसहस्त्रत्रिशतानि एकोनचत्वारिंशदिति परिगणितानि। (३३३९) एवमेव प्रायः बृहदारण्यकोपनिषद्यपि संख्या परिगणिता वर्तते।

अथ देवानामाकारचिन्तनं प्राप्यते–

चेतनावस्तुतिसम्पन्नात्तथागुणकर्मनामभिः स्तुतिं लभन्ते। तस्मात्

पुरुषविधाः देवाः। तत्र प्रमाणभूताः मन्त्राः–

अंगैर्यथा– ऋष्वात इन्द्र स्थविरस्य बाहू
यत्सङ्गृभ्णा मघवन् कशिरित्ते

द्रव्यैः– आ द्वाभ्यां हरिभ्यामिन्द्रयाहि, कल्याणीर्जाया सुरणं गृहे ते।

कर्मभिः– अद्धीन्द्र पिवत प्रस्थितस्य, आश्रुत्कर्ण श्रुधी हवम्।

अपुरुषविधाः स्युरित्यपरम्

यद्दृश्यतेऽग्निर्वायुरादित्यः पृथिवी चन्द्रमा इति। चेतनावत्स्वेव स्तुतयो न प्रवर्तन्तेऽपि तु, अचेतनेष्वपि चेतनावत् स्तुतयः प्रवर्तन्ते। यथाक्षप्रभृतीन्योषधिपर्यन्तानि।

पौरुषविधिकैरङ्गैः संस्तूयन्ते– "अभिक्रन्दन्ति हरितेभिरासभिः" (ग्रावस्तुतिः)

"सुखंरथं युयुजे सिन्धुरश्विनम्" (नदीस्तुतिः)

"होतुश्चित् पूर्वे हविरद्यमाशत" (ग्रावस्तुतिः)

समाधानम्– पुरुषविधानामेव सतां कर्मात्मान एते स्युर्यथा यज्ञो यजमानस्य एष चाख्यान समयः।

अथैतान्यग्निभक्तीन्ययं लोकः प्रातः सवनं वसन्तो गायत्री त्रिवृत् स्तोभो रथन्तरं साम ये च देवगणाः समाम्नाताः प्रथमे स्थाने आग्नेयी पृथिवीके(डे)ति स्त्रियः अथास्य कर्म–वहनं च हविषामावाहनञ्च देवानाम् यच्चकिञ्चिदार्ष्टिविषयिकमग्निकर्मेवतत्।

---

१. ऋ. ४.४७.८

२. ऋ. ३.३०.५

ब्राह्मणभागस्य वेदत्वम्

डॉ॰ गोपालप्रसादशर्मा

"मन्त्रब्राह्मणयोर्वेदनामधेयम्"[१] एतल्लक्षणानुसारं मन्त्रो ब्राह्मणञ्चोभयमपि वेदसंज्ञयाभिधीयते। अनादिकालादेव प्रचलतीयम्परम्परा। बृहदारण्यकवार्त्तिके श्रीसुरेश्वराचार्येणोक्तम्–

मन्त्रब्राह्मणयोर्वेदनामधेयत्वकारणात्।
ऋग्वेदागिरा तस्मान्मन्त्रब्राह्मणयोर्ग्रहः।।[२]

एवम्प्रकाराण्यन्यान्यपि वचनान्यस्माभिः प्राप्यन्ते। यथा–"मन्त्रब्राह्मणमित्याहुः"[३] "आम्नायः पुनर्मन्त्राश्च ब्राह्मणानि च"[४] इत्यादि।

परन्तु केचन विद्वांस एतानि प्रमाणानि नाङ्गीकुर्वन्ति। ते ब्राह्मणभागस्य वेदत्वं निषेधयन्ति। अत्र ध्यातव्यो विषयोऽयं यन्निषेधः सदा प्राप्तस्यैव भवति। स च निषेधो लोकप्राप्तस्य स्याच्छास्त्रप्राप्तस्य वा। "रात्रौ सूर्यदर्शनं न विधेय" मित्येवंविधं निषेधं न कोऽपि करोति। "नातिरात्रे षोडशिनं गृह्णाति" इति वाक्यं "अतिरात्रे षोडशिनं गृह्णाति।" इत्यनेन शास्त्रेण प्राप्तषोडश्या ग्रहणं निषेधयति। ये विद्वांसो ब्राह्मणभागस्य वेदत्वे निषेधं प्रतिपादयन्ति तेषां निषेधः किंविधः? लोकप्राप्तवेदत्वस्य शास्त्रप्राप्तवेदत्वस्य वा? एते विद्वांसः स्मृतिपुराणादीनां वेदत्वस्य निषेधं कथं न कुर्वन्ति? एवंविधेन निषेधेन ब्राह्मणभागस्य वेदत्वमेव सेत्स्यति। अयं निषेधो न प्रामाणिको यतो हि स्वैरकथनस्य न प्रामाण्यम्। यथा–

त्रयो वेदस्य कर्त्तारो धूर्तभाण्डनिशाचराः।
जर्भरीतुर्फरीत्यादि पण्डितानां वचः स्मृतम्।।

---

१. कात्यायनप्रतिज्ञापरिशिष्टम्- १.१
आपस्तम्बश्रौतसूत्रम्- १.१.७
बौधायनगृह्यसूत्रम्- २.६.३
बौधायनधर्मसूत्रम्- २.९.७
२. बृहदारण्यकवार्तिकम्- २.४
३. बौधायनगृह्यसूत्रम्- २.६.२.
४. कौ. सू.- १.३

इत्यादि वाक्यानां न प्रामाण्यमविचारितत्वात्।

सत्यार्थप्रकाशस्य सप्तमे समुल्लास "इत्यपि निगमो भवतीति ब्राह्मणम्"[१] एतस्योद्धरणस्य माध्यमेन साधयितुं प्रयासः कृतो यद् ब्राह्मणभागस्य कृते निगमशब्दस्य प्रयोगो भवति, वेदशब्दस्य न। परन्त्वयं प्रयासो न हि स्वार्थसाधकः। "उभयपानात् पृषदाज्ये दध्नोप्युपलक्षणं निगमेषु पातव्यस्योपलक्षणत्वाद्"[२], "दध्नस्तु गुणभूतत्वादाज्यपा निगमाः स्युर्गुणत्वं श्रुतेराज्यप्रधानत्वाद्"[३] इत्यादि वचनेषु चातुर्मास्य आज्यस्याविकारेण प्राधान्यं भवति। एतद्विचारप्रसङ्ग एताभ्यां सूत्राभ्यां "देवाँ आज्यपाँ आवह" मन्त्रोऽयं निगम शब्देनाभिहितः।

वस्तुतः "इत्यपि निगमो भवति, इति ब्राह्मणम्" इयं वाक्यावलिः सत्यार्थप्रकाशे उद्धृता परमस्या अर्थो न स्पष्टीकृतः। हिन्दीभाष्यमस्मिन् सम्बन्धे मौनं भवति। अतोऽस्य तात्पर्यं पाठका अवगन्तुमेव न शक्नुवन्ति।

यद्यपि सत्यार्थप्रकाशस्यानुयायिनोऽनेकानार्षग्रन्थान् प्रामाणिकान् न स्वीकुर्वन्ति तथापि स्वामिदयानन्दसरस्वतीमहाभागेन मीमांसादर्शनस्य प्रमाणं स्वीकुर्वता "ऋग्वेदादिभाष्यभूमिकायां"[४] "द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्यात्"[५] एवं "द्रव्याणां क्रियार्थानां क्रतुधर्मः स्यात्"[६] इति सूत्रद्वयं स्वपक्षप्राबल्यसाधनार्थं प्रस्तुतम्। यदि मीमांसादर्शनस्य प्रामाण्यं स्वामीदयानन्दसरस्वती मन्यते तर्हि मीमांसादर्शनाधारेण ब्राह्मणभागस्य वेदत्वसिद्ध्या अनेकानि प्रमाणानि प्राप्यन्ते।

"स्तुतिस्तु शब्दपूर्वत्वादचोदना च तस्य"[७] सूत्रेऽस्मिन् "शूर्पेण जुहोति तेन ह्यन्नं क्रियत" इति ब्राह्मणवाक्यं शब्दसंज्ञया वेदपर्यायरूपिण्या कथितम्। शब्दस्य वेदपर्यायत्वं "श्रुतेस्तु शब्दमूलत्वात्"[८] "धर्मस्य शब्दमूलत्वादशब्दमनपेक्ष्यं स्यात्"[९] इत्यादि सूत्राभ्यां स्पष्टमस्ति।

"विधिशब्दाच्च"[१०] इति सूत्रेऽस्मिन् "शतं हिमा इत्याह" इति ब्राह्मणवाक्यं शब्दपदेनोद्धृतम्।

अनेनैव प्रकारेण "चोदना वा **शब्दार्थ**स्य प्रयोगभूतत्वात् तत्सन्निधेर्गुणार्थेन पुनः श्रुतिः"[११],

१. सत्यार्थप्रकाशः आर्ष साहित्य प्रचार ट्रस्ट, ४५५, खारी बावली, दिल्ली-६, पृ. १४५, १४६ संवत् २०६२,
२. जैमिनीयसूत्रम्- १०.४.५१
३. तत्रैव- १०.४.५५
४. ऋग्वेदादिभाष्य, आर्ष साहित्य प्रचार ट्रस्ट, ४५५, खारी बावली, दिल्ली-६ भूमिकाया, पृ. ३५, ३६, संवत् २०६४
५. तत्रैव- ४.३.१
६. तत्रैव- ४.३.८
७. तत्रैव- १.२.२७
८. वेदान्तदर्शनम्- २.१.२७
९. जैमिनीयसूत्रम्- १.३१
१०. तत्रैव- १.२.५३
११. तत्रैव- २.२.१६

"ना**शब्दं** तत्प्रमाणत्वात् पूर्ववत्"[१], "**शब्द**वत्तूपलभ्यते तदागमे हि तद् दृश्यते तस्य ज्ञानं यथान्येषाम्।"[२], "मुख्य**शब्दा**भिसंस्तवाच्च"[३], "स्वरूपस्त्वनेकनिष्पत्तिः स्वकर्म**शब्द**त्वात्"[४], "चोदनायां फलाश्रुतेः कर्मपात्रं विधीयेत न ह्य**शब्दं** प्रतीयते"[५], "प्रकरण**शब्द**सामान्याच्चोदनानामनङ्गत्वम्"[६], "नित्यश्च ज्येष्ठ**शब्दात्**"[७] "**शब्द**विप्रतिषेधाच्च"[८], "न वा **शब्द**कृतत्वान्न्यायमात्रमितरदर्थात् पात्रविवृद्धिः"[९], "अन्ते तु बादरायणस्तेषां प्रधान**शब्द**त्वात्"[१०], "अ**शब्द**मिति चेत्"[११], "अर्थस्य **शब्द**भाव्यत्वात् प्रकरणनिबन्धनाच्**छब्दा**देवान्यत्र भावः स्यात्"[१२], "न लौकिकानामाचारग्रहणत्वाच्**छब्द**वतां चान्यार्थविधानात्"[१३], "**शब्द**सामर्थ्याच्च"[१४], "विधिमन्त्रस्य मन्त्रत्वे भावः स्यात्तेन चोदना"[१५] इत्यादिषु प्रभूतेषु उपर्युक्तेषु जैमिनीयसूत्रेषु च सर्वत्र विभिन्नब्राह्मणवाक्यानां कृत एव **शब्दा**भिधानं व्यवहृतम्।

"नियमार्था गुणश्रुति"[१६] रित्यत्र "यदि सोमं न विन्देत पूतीकानभिषुणुयाद्" वाक्येऽस्मिन् सोमप्रतिनिधित्वेन श्रुतायामोषधिविशिष्टायां पूतीकायां सोमलतायामिवाभिषवादिधर्माः विहिता अथवा न? इति संशयस्य स्थितौ अनेन सूत्रेण नियम्यते यन् "नियमार्था" अर्थात् सोमस्यानुपलब्धौ तस्य सदृशानामन्येषां द्रव्याणामप्युपलब्धौ, पूतीकायाः प्राप्तिः कदाचिद् भविष्यति कदाचिन्नापि। एवंविधस्थितिपक्षे प्राप्तायाः पूतीकाया नियमनार्थं "गुणश्रुति" रर्थात् "सोमाभावे पूतीकानभिषुणुयात्" इति गुणवचनमस्ति। अत्र "सोमाभावे पूतीका" नित्यादि ब्राह्मणवाक्यं श्रुतिपदेन व्यवहृतम्।

"नियमस्तु दक्षिणाभिः श्रुतिसंयोगाद्"[१७] इत्यत्रर्त्विजः सप्तदश भवन्तीति निश्चये ते के सन्ति? इत्याकाङ्क्षायामनेन सूत्रेण सिद्धान्तः क्रियते यदाग्नीध्रादिष्वेव नियमेनर्त्विक्त्वमस्ति, यतो हि

---

१. जैमिनीयसूत्रम्- ४.१.१४
२. तत्रैव- ४.१.१५
३. तत्रैव- ४.१.२४
४. तत्रैव- ४.२.१
५. तत्रैव- ४.३.९
६. तत्रैव- ४.४.१
७. तत्रैव- ४.४.९
८. तत्रैव- ५.१.२६
९. तत्रैव- ५.२.९
१०. तत्रैव- ५.२.१९
११. तत्रैव- ६.३.२९
१२. तत्रैव- ७.४.१२
१३. तत्रैव- ८.४.६
१४. तत्रैव- ८.४.१९
१५. तत्रैव- १०.४.२३
१६. तत्रैव- ३.६.४०
१७. तत्रैव- ३.७.३,६

"ऋत्विग्भ्यो दक्षिणां ददाती" त्युक्त्वा "अग्नीध्रेग्रे ददाति ततो ब्रह्मण" इत्यादिश्रुतिद्वारा दक्षिणया सार्धमग्नीध्रादीनां नाम्नः संयोगोऽस्ति। अस्मिन् सूत्रे "अग्नीध्रेग्रे ददाति" इत्यादि ब्राह्मणवाक्यं श्रुतिरिति कथ्यते।

अनेनैव प्रकारेण "श्वस्त्वेकेषां तत्र प्राक्**श्रुति**र्गुणार्था"[१], "ना**श्रुति**विप्रतिषेधात्"[२], "विरोधे च **श्रुति**विरोधादव्यक्तः शेषः"[३], "अविशेषात्तु शास्त्रस्य यथा**श्रुति**फलानि स्युः"[४], "स्वेन त्वर्थेन सम्बन्धो द्रव्याणां पृथगर्थत्वात्तस्माद्यथा **श्रुतिः** स्युः"[५], "शकल**श्रुतेः**"[६], "द्रव्यसंस्कारकर्मसु परार्थत्वात् फल**श्रुति**रर्थवादः स्यात्"[७], "अपि वाम्नानसामर्थ्याच्चोदनार्थेन गम्येतार्थानां ह्यर्थवत्त्वेन वचनानि प्रतीयन्तेऽर्थतो ह्यसमर्थानामानन्तर्येण सम्बन्धस्तस्मा**च्छ्रुत्ये**कदेशः सः"[८], "दधिग्रहो नैमित्तिकः **श्रुति**संयोगात्"[९], "पृथक्त्वे त्वभिधानयोनिर्वेशः **श्रुति**तो व्यपदेशाच्च तत्पुनर्लक्षणं यत्फलवत्त्वं तत्सन्निधावसंयुक्तं तदङ्गं स्याद् भागित्वाकारणस्या**श्रुते**श्चान्यसम्बन्धः"[१०], "पौर्णमासी वा **श्रुति**संयोगात्"[११], "कर्त्तुर्वा **श्रुति**संयोगाद्विधिः कात्स्न्येन गम्यते"[१२], "यथा**श्रुती**ति चेत्"[१३], "आदेशार्थेतरा **श्रुतिः**"[१४], "माघी वैकाष्टका **श्रुतेः**"[१५], "विभाग**श्रुतेः** प्रायश्चित्तं यौगपद्ये न विद्यते"[१६], "न **श्रुति**विप्रतिषेधात्"[१७], "**श्रुति**प्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात्"[१८], "नार्थाभाव**च्छ्रुते**रसम्बन्धार्थाः"[१९], "अपि वा सत्रकर्मणि गुणार्थैषा **श्रुतिः** स्यात्"[२०], "द्रव्यादेशे तद्द्रव्यः **श्रुति**संयोगात् पुरोडाशस्त्वनादेशे तत्प्रकृतित्वात्"[२१],

---

१. जैमिनीयसूत्रम्- ३.६.२०
२. तत्रैव- ३.६.२४
३. तत्रैव- ३.८.३५
४. तत्रैव- ४.१.४
५. तत्रैव- ४.१.८
६. तत्रैव- ४.२.४
७. तत्रैव- ४.३.१
८. तत्रैव- ४.३.१०
९. तत्रैव- ४.४.८
१०. तत्रैव- ४.३.३४
११. तत्रैव- ५.४.११
१२. तत्रैव- ६.१.५
१३. तत्रैव- ६.४.२२
१४. तत्रैव- ६.५.२७
१५. तत्रैव- ६.५.३२
१६. तत्रैव- ६.५.४९
१७. तत्रैव- ६.८.१६
१८. तत्रैव- ७.१.१
१९. तत्रैव- ७.२.८
२०. तत्रैव- ७.३.५
२१. तत्रैव- ७.३.१६

"तस्मिंश्च श्रपण**श्रुतेः**"[१], "देशबद्धत्वमुपांशुत्वं तेषां स्यात् **श्रुति**निर्देशात् तस्य च तत्र भावात्"[२], "तृचे स्याच्छ्रु**ति**निर्देशात्"[३], "अभ्यासेनेतरा **श्रुतिः**"[४], "तच्छ्रु**तौ** चान्यहविष्ट्वात्"[५], "षड्भिर्दीक्षयति तासां मन्त्रविकारः **श्रुति**संयोगात्"[६], "असंयोगाद्विधि**श्रुता**वेकजाताधिकारः स्यात् **श्रुत्या**कोपात् क्रतोः"[७], "सर्वस्य वा क्रतुसंयोगादेकत्वं दक्षिणार्थस्य गुणानां कार्यैकत्वादर्थे विकृतौ **श्रुति**भूतं स्यात् तस्मात् समवायाद्धि कर्मभिः"[८], "एके तु **श्रुति**भूतत्वात् सङ्ख्यया गवां लिङ्गविशेषेण"[९], "अपि वा **श्रुति**मूलत्वात् सर्वासां तस्य भागो नियम्येत"[१०], "प्राकृतस्य गुण**श्रुतौ** सगुणेनाभिधानं स्यात्।"[११]

उपर्युक्तेषु सर्वेषु जैमिनीयसूत्रेषु सर्वत्र विभिन्नब्राह्मणवाक्यानि श्रुतिपदेन व्यवहृतानि। "विधौ तु वेदसंयोगादुपदेशः स्यात्"[१२], इत्यत्र "इति ह स्माह वर्कुर्वार्ष्णिर्मासान्मे पचत" इत्येतद् ब्राह्मणवाक्यस्यार्थवादसिद्धिप्रसङ्गे पक्षान्तरोपस्थितिं कुर्वन्ननेन सूत्रेणोक्तब्राह्मणवाक्यं स्पष्टतया वेदशब्देन कथितम्।

यथा रघुवंशादिग्रन्थानां सम्बन्धे कालिदासादिकर्त्तारः प्रमाणसिद्धाः सन्ति तथैव "अमुकब्राह्मण-ग्रन्थोऽमुकेन रचितः" इत्यस्मिन् कथने किमपि प्रमाणं नोपलभ्यते। अतो ब्राह्मणवाक्यानाम-पौरुषेयतामूलकवेदता स्पष्टा वर्तते। ब्राह्मणभागस्य वेदत्वसिद्धया उपर्युक्तान्यनेकानि प्रमाणानि वर्तन्ते। परन्तु "ब्राह्मणभागो वेदो नास्ति" इति वचनस्य सिद्ध्यर्थं किमपि शास्त्रवचनमार्षोद्धरणं वा न वक्तुं शक्यते। "ब्राह्मणभागो वेदो नास्ति" इति वचनस्य सिद्धिः शपथमात्रेणैव भवितुं शक्या।

सत्यार्थप्रकाशस्य सप्तमे समुल्लासे "इत्यपि निगमो भवतीति ब्राह्मणं" वचनमेतत् कुतश्चिदुद्धृतम्। अस्य वचनस्य शैली निरूक्तसदृशी वर्तते, परन्तु सम्पूर्णेऽपि निरुक्त एतस्यामानुपूर्व्यां न किमपि वचनमुपलभ्यते। "इत्यपि निगमो भवति", "इति च ब्राह्मणम्" उभे वाक्ये विभिन्नेषु प्रसङ्गेषु उपलभ्येते परन्तु सत्यार्थप्रकाशोद्धृतायामानुपूर्व्यामिदं वाक्यं निरुक्ते न वर्तते। वचनमेतत् कस्मिन् प्रसङ्गे कुतश्चोद्धृतम्? इत्यस्यापि स्पष्टीकरणं नास्ति। सिंहावलोकनेन प्रतिभाति यद्वाक्यमिदं निरुक्तस्य।

१. जैमिनीयसूत्रम्- ८.१.३९
२. तत्रैव- ९.१.२०
३. तत्रैव- ९.२.१४
४. तत्रैव- ९.२.२०
५. तत्रैव- १०.१.४०
६. तत्रैव- १०.३.२३
७. तत्रैव- १०.३.४३
८. तत्रैव- १०.३.५७
९. तत्रैव- १०.३.६२
१०. तत्रैव- १०.३.७५
११. तत्रैव- १०.४.२६
१२. तत्रैव- ६.७.२९

"मन्त्रब्राह्मणयोर्वेदनामधेयम्" इति प्रसङ्गेऽस्मिन् सत्यार्थप्रकाशस्य सप्तमे समुल्लासे लिखितमुपलभ्यते यत्– "पश्यत! संहितापुस्तकस्यारम्भेऽध्यायसमाप्तौ च वेद इति शब्दः सनातनाल्लिख्यते।"

उपर्युक्तवचने विचारोऽवश्यं कार्यः।

१९७१ तमे ईशवीये वर्षे 'मोतीलालबनारसीदास, बैंग्लो रोड, जवाहरनगर, दिल्ली' इति प्रकाशनाच्छुक्लयजुर्वेदस्य माध्यन्दिनशाखायाः संहितापुस्तकमुव्वटाचार्यस्य महीधराचार्यस्य च व्याख्ययासहितं प्रकाशितमस्ति। मूलपाठस्य अन्त "इति माध्यन्दिनीयवाजसनेयिसंहितायां प्रथमोऽध्याय" इति लिखितमुपलभ्यते। उव्वटभाष्यस्य चान्त "इति मन्त्रभाष्य उव्वटकृतौ प्रथमोऽध्याय" एवमुपलभ्यते। प्रत्येकमध्यायस्यान्त एवंविधोल्लेखाः सन्ति। कुत्रापि 'वेद' इति शब्दस्योल्लेखो नास्ति।

१९९९ तमे संवत्सरे हितचिन्तकमुद्रणालयरामघाटकाशीतः शुक्लयजुर्वेदस्य माध्यन्दिनशाखायाः संहितायाः प्रकाशनं जातम्। पुस्तकेऽस्मिन् प्रत्येकस्याऽध्यायस्यान्त "इतिश्रीवाजसनेयसंहितायां प्रथमोऽध्याय" "इतिश्रीवाजसनेयसंहितायां द्वितीयोऽध्याय" इत्यादिरेवाध्यायान्ते वर्णितमस्ति। वेदशब्दस्योल्लेखो न लभ्यते।

१८७२ तमे शकाब्दे निर्णयसागरमुद्रणालयमुम्बईतः शुक्लयजुर्वेदमाध्यन्दिनशाखायाः संहितायाः प्रकाशनं कृतं वर्तते। अस्मिन् पुस्तकेऽपि पूर्वचर्चितविषयवर्णनमेव वर्तते। अध्यायाऽन्ते 'वेद' इतिपदं दृष्टिगोचरं न भवति।

"गौरीशयन्त्रालयबङ्गालीटोलागणेशमहालवाराणसी" इत्येतस्मात् प्रकाशनाच्छुक्लयजुर्वेद-माध्यन्दिनसंहितायाः पदपाठस्य प्रकाशनं जातम्। अस्मिन् पुस्तके प्रकाशनवर्षस्योल्लेखो नास्ति। अस्मिन् पुस्तकेऽपि पूर्वचर्चितसंहिताशब्दस्योल्लेखो वर्तते अध्यायान्ते 'वेद' इति पदस्य नास्ति प्रयोगः। एकमन्यदपि पुस्तकं यच्च पदपाठस्यैव वर्ततेऽस्मिन् पुस्तके प्रकाशनवर्षस्य मुद्रणालयस्य सङ्केतपृष्ठानि त्रुटितानि वर्तन्ते। अस्मिन् पुस्तकेऽपि गौरीशयन्त्रालयस्यानुसरणं विहितम्। उभे अपि पुस्तके "चिन्नास्वामिस्मृतिग्रन्थालये पट्टाभिरामशास्त्रिवेदमीमांसानुसन्धानकेन्द्रे हनुमद्घट्टे वाराणस्यां वर्तेते। १८९७ तमे संवत्सरे हस्तलिखितमेकं पुस्तकम्। (यच्च आहिताग्नीनां श्रीबालकराममहाभागानां गृहे, ऋषिकेशे) अस्ति, अत्रापि वेदपदं न दृश्यते, अन्ते च "इतिश्रीसंहितायां दीर्घपाठे चत्वारिंशोऽध्याय" इति लिखितं वर्तते।

यशोवता विदुषा युधिष्ठिरमीमांसकमहाभागेन महता परिश्रमेण माध्यन्दिनपदपाठस्य सम्पादनं कृतम्। विदुषा सम्पादकेनास्मिन् पुस्तके त्रयोदशपुस्तकानां वैशिष्ट्योल्लेखः कृतः। अस्मिन् पुस्तके यथासम्भवं सर्वेषां (त्रयोदशानां) पुस्तकानामध्यायस्योल्लेखो वर्तते। कस्मिन्नपि पुस्तकेऽन्ते (पुष्पिकायां) वेदपदस्य प्रयोगो नास्ति। ग्रन्थारम्भे अन्ते च न केवलं वेदपदानुपलब्धिरेव वर्ततेऽपितु

संहिताशब्दस्योल्लेखोऽपि वर्तते। पं. मीमांसकेन यं पाठं मुख्यं मत्वा तस्य आद्योपान्तं सम्पादनं कृतं तस्य प्रारम्भेऽन्ते च वेदपदोल्लेखो नैव, अपितु 'संहिता' इति पदं प्रयुक्तम्।

मोतीलालबनारसीदासलाहौरद्वारा १९२६ तमे ईशवीये वर्षे प्रकाशिते शतपथब्राह्मणे "श्रीशुक्लयजुर्वेदशतपथब्राह्मणम्" इति लिखितमस्ति। श्रीबेबरद्वारा बर्लिन् (जर्मनी) तः १८५५ तमे ईशवीये वर्षे प्रकाशिते ताण्ड्यब्राह्मणे "सामवेदीयं ताण्ड्यब्राह्मणम्" इति लिखितं वर्तते।

उपर्युक्तेषु पुस्तकेषु अनेकानि पुस्तकानि प्राक्तनकालस्य वर्तन्ते। अतः कथनमेतन्न समीचीनं मन्तव्यं यत् पुस्तकसम्पादकैरेव स्वसौविध्यनुसारं पुस्तकेषु किमपि लिखितम्।

ऋग्वेदादिभाष्यभूमिकायां कथितं यद् "ब्राह्मणग्रन्थानां वेदेषु गणना न भवितुं शक्यते, यतो हि (इषेत्वोर्जेति) इत्यनेन प्रकारेण तेषु मन्त्राणां प्रतीकानि धृत्वा-धृत्वा वेदस्य व्याख्यानं कृतम्। मन्त्रभागे संहितासु ब्राह्मणग्रन्थानामेकस्यापि प्रतीकस्य दर्शनमपि न वर्तते। तस्मादीश्वरोक्तमूलमन्त्रा अर्थाच्चतस्रः संहिता वर्तन्ते। त एव वेदा वर्तन्ते ब्राह्मणानि न वर्तन्ते।

शब्दान्तरैरर्थविवरणमेव व्याख्यानं भवति। अनेन प्रकारेण वेदादिव्यपदेश्यवाक्यसमूहस्य पदार्थान्तरसमूह एव व्याख्यानं भवति। शुक्लयजुर्वेदस्य पुरुषसूक्तेन सहाथर्ववेदस्य पुरुषसूक्तस्य तुलनायामयं व्याख्यानव्याख्येयभावः स्पष्टो भवति।

स भूमिं सर्वतस्पृत्वात्यतिष्ट्ठद्दशाङ्गुलम्।।[१]
स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्।।[२]
त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः।।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि।।[३]
त्रिभिः पद्भिर्द्यामरोहत्पादोस्येहाभवत्पुनः।।
तथा व्यक्रामद्विष्वङ् साशनानशने अनु।।[४]
एतावानस्य महिमातो ज्यायाँश्च पूरुषः।।[५]
तावन्तो अस्य महिमानस्ततो ज्यायांश्च पूरुषः।।[६]
ऊरू तदस्य यद्वैश्यः।।[७]

१. वाजसनेयी संहिता- ३१.१
२. अ. वे.- १९.६.१
३. वा. सं- ३१.४
४. अ. वे. १९.६.२
५. वा. सं.- ३१.३
६. अ. वे.- १९.६.३
७. वा. सं.- ३१.११

मध्यं तदस्य यद्वैश्यः।।[१]
ततो विराडजायत।।[२]
विराडग्रे समभवत्।।[३]
उतामृतत्वस्येशानो यदन्नेनातिरोहति।।[४]
उतामृतत्वस्येशानो यदन्नेनाभवत्सह।।[५]

एतेषु मन्त्रेषु व्याख्यानव्याख्येयभावः कथं न स्यात्? मन्त्रा ब्राह्मणानि चोभयमपि अनादि। एकेनापरस्यार्थस्पष्टतायां सत्यामप्यनादिताक्षुण्णा तिष्ठति। एवमेव "नवो नवो भवति", "प्रजापते न त्वत्" इत्यादिमन्त्रेष्वेवमेवान्येष्वपि मन्त्रेषु व्याख्यानव्याख्येयभावो द्रष्टव्यः।

केचन जनाः चतस्रः संहिता एव 'वेद' इति मन्यन्ते। परं च अन्यासु संहितासु ब्राह्मणेषु चापि तेषामाशयात्मको व्याख्यानव्याख्येयभावः प्राप्यते। यथा काण्वसंहितायां काण्वशतपथब्राह्मणे च। एवं सत्यपि काण्वसंहितेत्यादिग्रन्था वेदं कथं न वेदत्वेन मन्यन्ते? इति तु धियः परं वर्तते।

प्रतीकानामुद्धरणस्य कथनं नास्तीति पूर्वपक्षे समाधानं वर्तते यत् शुक्लयजुर्वेदमाध्यन्दिनशाखायां त्रयोदशेऽध्यायेऽन्तिमे मन्त्रे त्रयाणां प्रतीकोल्लेखो वर्तते।[६] अनेनैव प्रकारेण चतुर्दशेऽध्याये त्रिषु स्थानेषु नवमन्त्राणां प्रतीका उल्लिखिताः।[७] अष्टाविंशतितमेऽध्याये द्वयोः स्थानयोः केवलं द्वयोर्मन्त्रयोः प्रतीकानामुल्लेखो वर्तते।[८] द्वात्रिंशत्तमेऽध्याये द्वयोः स्थानयोः नवानां मन्त्राणां प्रतीकानामुल्लेखो वर्तते।[९] त्रयस्त्रिंशत्तमे अध्याये सप्तसु स्थानेषु आहत्य द्वाविंशतिर्मन्त्राः प्रतीकरूपेणोल्लिखिताः।[१०] चतुस्त्रिंशत्तमेऽध्यायेऽन्तिमे मन्त्रे चतुर्णां मन्त्राणां प्रतीका उक्ताः।[११]

अनेन प्रकारेण सम्पूर्णमाध्यन्दिनशाखायां षोडशस्थानेषु एकोनपञ्चाशन्मन्त्राः प्रतीकरूपेणोल्लिखिताः। परम्पराविदो वैदिका एतेषां सर्वेषां प्रयोगं पारायणं च ब्रह्मयज्ञादिषु कुर्वन्ति।

---

१. अ. वे.- १९.६.६
२. वा. सं.- ३१.५
३. अ. वे.- १९.६.९
४. वा. सं.- ३१.२
५. अ. वे.- १९.६.४
६. वा. सं.- १३.५८
७. वा. सं.- १४.१०,२२, ३१
८. वा. सं.- २८.२३, ४६
९. वा. सं.- ३२.३, ७
१०. वा. सं.- ३३.२१, २७, ३३, ४७, ५८, ७३, ९७
११. वा. सं.- ३४.५८

एवं च यत् कथ्यते "ब्राह्मणभागस्य कस्यापि प्रतीकस्य व्याख्या मन्त्रभागे नास्ति" एतत् कथनं तथैव भविष्यति यथा "निरुक्तस्य कस्याप्यंशस्य व्याख्या निघण्टौ नास्ति।" तत्कथम्? अथवा "महाभाष्यस्य कस्याप्यंशस्य व्याख्यानमष्टाध्याययां नास्ति" एतत् कथम्? निरुक्तं महाभाष्यं च व्याख्यानरूपमपि स्वामिदयानन्दः प्रमाणत्वेन स्वीकरोति। स्वामिदयानन्दो महाभाष्यं प्रमाणं मन्यत[१] इति स्फुटमेव।

व्याख्यानरूपत्वं यथा वेदत्वस्य साधकं नास्ति, तथैव व्याख्यानरूपत्वं वेदत्वस्य बाधकमपि नास्ति। यदि व्याख्यानारूपत्वेनैव वेदत्वं भवेत् तदा तु दर्शनसूत्राणि अपि वेदा एव भविष्यन्ति। परं च नायं सिद्धान्तः कस्यापि कृते सम्मतः।

एवमेव यच्चोच्यते "मन्त्रब्राह्मणयोर्वेदनामधेयम्" अस्यापस्तम्बीयसूत्रव्याख्यायां कैश्चिन्मन्त्राणामेव वेदत्वमाश्रितम् (आख्यातम्) इति हरदत्तेन धूर्तस्वामिना चोक्तम्।[२] अत्र विचार्यते यत् कैश्चिदितिशब्द एकपक्षीयत्वं सूचयति न सिद्धान्तपक्षम्। यद्येवं भवेत् तदा निरुक्तानुसारं मन्त्राः कौत्सपक्षमाश्रित्यानर्थका भवेयुः। वेदप्रामाण्यसाधकाधिकरणे पूर्वपक्षत्वेन वेदाप्रामाण्यमप्युक्तम्। एतच्च न सिद्धान्तरूपम्। प्रत्येकस्मिन्नधिकरणे पूर्वपक्षे सिद्धान्तस्य विरोध एव दृश्यते इत्येवं सम्प्रदायक्रमः।

धर्मसम्राट्स्वामिकरपात्रिमहाभागा अस्मिन् विषये स्वमतं स्थापयन्ति-

"सम्प्रदायाविच्छेदे सत्यस्मर्यमाणकर्तृकत्वमपौरुषेयत्वम्"[३]

एवं प्रकारकमपौरुषेयत्वं मन्त्रे ब्राह्मणे चोभयत्र घटते। अतो "मन्त्रब्राह्मणयोर्वेदनामधेयम्"[४] एतल्लक्षणं निर्दुष्टमुपयुक्तं परम्पराविदैः समादृतं च वर्तते।

---

१. श्रीमद्दयानन्दप्रकाश गङ्गाकाण्ड द्वितीय सर्ग पृ.सं. ७१

२. जैमिनीयमीमांसाभाष्यम्- युधिष्ठिरमीमांसकः पृ.सं.-६९

३. जैमिनीयमीमांसाभाष्यम्- युधिष्ठिरमीमांसकः पृ.सं.-७७

४. कात्यायनप्रतिज्ञापरिशिष्टम्- १.१
आपस्तम्बश्रौतसूत्रम्- २४.१.३१
सत्याषाढश्रौतसूत्रम्- १.१.७
बौधायनगृह्यसूत्रम्- २.६.३
बौधायनधर्मसूत्रम्- २.९.७

वैदिकसाहित्ये वनस्पतिविज्ञानम्

डॉ॰ सुन्दरनारायणझा

विश्ववाङ्मयस्य उत्सो वेद इति। वैदिका ऋषयो येषां वैज्ञानिकतथ्यानां विषये गम्भीरतमं चिन्तनम्मननञ्चाकुर्वंस्ते विषया अत्र वैदिकवाङ्मये विस्तृतरूपेण विवेचिताः सन्ति। यथा 'वेद' इति पदेन चतसृणां मन्त्रसंहितानां बोधो जायते तथैव वैदिकवाङ्मयमित्येतेन षड्वेदाङ्गब्राह्मणारण्य-कोपनिषदितिहासपुराणादीनां ग्रहणं भवत्येव। वैदिकं वाङ्मयमेव वैदिकसाहित्यमित्युच्यते।

वैदिकसाहित्ये मानवजीवनोपयोगिनः सर्वेऽपि ज्ञान-विज्ञानात्मकाः विषयाः साधु विवेचिताः। तत्र विभिन्नं वस्तुजातमभिलक्ष्यीकृत्य मूलान्वेषणक्रमेणैकतत्त्वपर्यन्तं गतिर्ज्ञानम्। एकं तत्त्वं निरूढं मत्वा क्रमेण तस्यानन्तरूपताप्रतिपत्तिर्विज्ञानम्। विशिष्य ज्ञानं हि विज्ञानम्, विविधं ज्ञानम्, विभेदेन ज्ञानं वा विज्ञानमिति। कूर्मपुराणे ज्ञानविज्ञानयोः स्वरूपमेवमुक्तम्–

यया स देवो भगवान् विद्यया वेद्यते परः।
साक्षाद्देवो महादेवस्तज्ज्ञानमिति कीर्तितम्।।

चतुर्दशानां विद्यानां धारणं हि यथार्थतः।
विज्ञानमिति तद्विद्याद्येन धर्मो विवर्द्धते।।[1]

श्रीमद्भागवतेऽपि च–

नवैकादश पञ्च त्रीन् भावान् भूतेषु येन वै।
इक्षेताथैकमप्येषु तज्ज्ञानं मम निश्चितम्।।

एतदेव हि विज्ञानं न तथैकेन येन यत्।
स्थित्युत्पत्त्ययान् पश्येद् भावानां त्रिगुणात्मनाम्।।[2]

१. कू. पु. उ. खं. १५ अ.
२. श्रीमद्भा. ११/१९

अयमभिप्राय एकस्मादनेकस्मिन्नवतरणं विज्ञानं यज्ञविद्या। अनेकस्मादेकस्मिन्नारोहणं ज्ञानं ब्रह्मविद्या। ब्रह्मविद्यातिरिक्ताः सर्वा अपि विद्या अनेकत्वप्राधान्याद्यज्ञविद्यायामर्थाद् विज्ञान एवान्तर्भवन्ति। आभ्यामेव ज्ञानविज्ञानाभ्यां मानवस्य कृतकृत्यता सम्पद्यते। तत्र विज्ञानमभ्युदयहेतुः, ज्ञानं तु निःश्रेयसजनकम्। इदमेव ज्ञानविज्ञानयुगलं मुख्यो धर्मः। अत इदं वक्तुं शक्यते यद्वैदिकसाहित्ये भोगमोक्षयोरुभयोः सत्तायाः सकलसाहित्यापेक्षया विशिष्टता विद्यते। तदुक्तं मनुना- "सर्वज्ञानमयो हि सः"[१] इति। अर्थाद्वैदिकसाहित्ये समस्तविद्यानां सूत्राणि विद्यमानानि सन्ति। तेनैव क्रमेण वनस्पतिविज्ञानविषयकं विवेचनमिह प्रस्तूयते।

वनस्पनीनामुपयोगित्वम्- शतपथब्राह्मणे "सोमो वै वनस्पतिः"[२] इत्युक्तम् वेदेषु यज्ञानुष्ठानस्यैव प्राधान्यमस्ति। उक्तमपि- "वेदा हि यज्ञार्थमभिप्रवृत्ताः" (वेदाङ्गज्योतिषे) यज्ञास्त्रिविधाः, पाकयज्ञाः, हविर्यज्ञाः, सोमयज्ञाश्च। त्रिविधेष्वेषु यज्ञेषु सोमयागस्य महत्त्वमत्युत्कृष्टं वर्तते। यस्मिन् यागे सोमनामकलतायाः रसं निष्पीड्य तेनाहुतिर्दीयते स सोमयाग इत्युच्यते। सोऽयं यागः अग्निहोत्र-दर्शपौर्णमास-चातुर्मास्य-निरूढपशुबन्धादीन् इष्ट्वैवानुष्ठीयते। तदुक्तं श्रौतसूत्रे "दर्शपौर्णमासाभ्यामिष्ट्वा अन्येन यजेत"[३] अयमभिप्रायः यद्यथा लोके जनाः पूर्वं लघुकार्याणि सम्पाद्य बृहत्कार्ये प्रवृत्ता भवन्ति तथैव यज्ञेष्वपि दर्शपौर्णमासादीन् लघ्वनुष्ठानानि पूर्वं सम्पाद्यानन्तरं जटिलाय बृहत्तमाय सोमयागाय प्रवृत्ता भवन्तीति। एषु सर्वेष्वपि लघुबृहत्तमेष्वनुष्ठानेषु वनस्पतीनां वैज्ञानिकदृष्ट्या प्रयोगो दृश्यते यथा खादिरः स्रुवः, औदुम्बरी आसन्दी, प्रादेशमात्री पलाशसमित्, शूर्पं वैणवम्, वारणकाष्ठनिर्मिता शम्या, बर्हिस्तरणम्, मौञ्जं योक्त्रम्, पलाशविल्वखदिरस्य वा यूपः, खादिरं मुसलम्, वारणकाष्ठनिर्मिता प्रणीता, पालाशः स्यादुलूखलः, आश्वत्थ्युपभृत्, वारणी इडापात्री, अश्वत्थशमीगर्भारणी इत्यादीन्यनेकानि यज्ञपात्राणि विविधवृक्षवनस्पतिभिर्निर्मीयन्ते। तत्कथमिति वैज्ञानिकदृष्ट्याऽनुशीलनेनैव ज्ञातुं शक्यते।

शुक्लयजुर्वेदस्य प्रथमेऽध्याये उलूखलमुसलाभ्यां "अद्रिरसि वानस्पत्यः"[४] इति शब्दस्य प्रयोगो दृश्यते, तत्र आदृणाति विदारयति व्रीह्यादिकमित्यादिः, वनस्पतेर्विकारो वानस्पत्यः इत्युक्तः। तात्पर्यमिदं वर्तते यत् व्रीहीणां तुषानिरसनं कर्म अन्यैः अपि साधनैः कर्तुं शक्यते किन्त्वत्र पलाशकाष्ठनिर्मितेनोलूखलेन, खादिरेण मुसलेनैव च कथमेतत्कार्यं सम्पाद्यत इत्यस्मिन् विषये किं वैज्ञानिकत्वम्? अत्रोच्यते यत् सर्वेऽपि यज्ञाः केषाञ्चिद्देवतानां प्रीत्यर्थं क्रियन्ते। ऐतरेयब्राह्मणानुसारं "अग्निर्वै देवानामवमो परमो विष्णुः"[५] अग्निर्वै देवानां मुखम्, मुखमेव च मुख्यम्। तस्मात् सर्वासु देवतासु प्रमुखोऽयमग्निः। वनस्पतिषु चाग्नेः प्रामुख्यम्, तस्मात् प्रमुखदेवतासम्बन्धितैरेव यज्ञपात्रैः

१. मनु.- २/७
२. श.प.ब्रा.- ३/८/३/३३
३. का. श्रौ. सू. ७/१/१
४. शु. य. सं.- १/१४-१५
५. ऐ. ब्रा.- १/१/१

तत्तत्कर्म सम्पाद्यते। एतस्मादेव कारणात् द्रव्यदेवतादिसम्बन्धस्थापनाय विविधैर्वानस्पत्यैः यज्ञपात्रैः विविधिः क्रियाः सम्पाद्यन्ते।

एवमेव सूर्यकिरणेभ्यः बहिर्भूताभ्यः चुम्बकीयशक्तिभ्यः पृथिव्याः सकाशादुत्पद्य-मानेभ्यश्चाकर्षणबलेभ्यः यज्ञे प्रयुज्यमानानि हविर्द्रव्यानि संरक्षणाय भूमौ बर्हिस्तरणं उपरिष्टाच्च बर्हिभिराच्छादनं विहितम्भवति। एतेनोभयत्र बर्हिषः प्रयोगेण सोमीयतत्त्वेषु सौम्यत्वं सुरक्षितं भवति तेनैव अग्नौ सोमाहुतिर्जायते। अत एवोक्तं कात्यायनेन– "द्रव्यं देवता त्यागः"[१] इति। अर्थादग्न्यादीन् देवानुद्दिश्य हविर्द्रव्यादीनां सोमतत्त्वानामाहुत्या यज्ञः सम्पद्यते।

अथर्ववेदस्यैकस्मिन् मन्त्रे "अश्वत्थो देवसदनः"[२] इति पाठ उपलभ्यते तेन ज्ञायते यत् अश्वत्थवृक्ष एव देवसदनत्वेनोक्तः यतस्तु वृक्षेऽस्मिन् ऑक्सीजन (आग्नेय) तत्त्वस्याधिक्यं भवति। अग्निरेव हि ऊर्जाशक्तेः मूलस्रोतः तस्मादूर्जायाः बृहत्तमभण्डारत्वादत्र सर्वासां देवतानामुपस्थितिर्वर्तत इति मन्यते। तस्मादेव कारणात् अश्वत्थो देवसदन इति उक्तः।

अन्नेष्वपि आग्नेयतत्त्वप्रधानत्वं सोमीयतत्त्वप्रधानत्वमिति विभागद्वयं वर्तते। आग्नेयतत्त्वप्रधानानि प्राणशक्तियुतान्युक्तानि सोमीयतत्त्वप्रधानानि चापानशक्तियुतानीति तदुक्तं वेदे– "यवे ह प्राण आहितोऽपानो व्रीहिरुच्यते"[३] तथा च– "व्रीहिर्यवश्च भेषजौ"[४] इति। प्राणशक्तिबहुलेष्वन्नेषु यवगोधूमादीनि वसन्तर्तौ लवनीयानि एवमेवापानशक्तिबहुलेष्वन्नेषु व्रीह्यादीनि शरदर्तौ लवनीयान्युक्तानि। श्रुतिष्वेषोक्तिः बहुत्रोपलभ्यते– "वसन्ते-वसन्ते ज्योतिषा यजेत" इति तथा च– "वसन्ते ब्राह्मणाः अग्निमादधीत ग्रीष्मे राजन्यः शरदि वैश्यः" इति। वसन्तर्तौः प्राणशक्त्या सह साक्षात्सम्बन्धोऽत्र दृश्यते प्राणशक्तिश्चाग्निना सह सम्बद्धा। अत एवोक्तं वेदेषु "ब्राह्मणोऽस्य मुखमासीत्" "मुखादग्निरजायत" इति। अर्थात् परब्रह्मपरमात्मनः मुखात् ब्राह्मणस्याग्नेश्चोत्पत्तिर्व्याख्याता तथा चाग्नेः सर्वदेवतानां मुखत्वं पूर्वमेवोक्तम्। अत एतेनैव वैज्ञानिकतथ्याधारेण यज्ञस्वरूपाणि कल्पितानि। श्रूयते यत्पुरा– "भक्तमेव भोजनम्" इत्युक्तिः प्रसिद्धा आसीत्। तत्र कारणमिदमेवासीद्यत् मुखमग्निस्थानं तत्र सोमीयतत्त्वप्रधानस्य व्रीह्यन्नस्याहुतिर्दीयते तेन भोजनयज्ञः सम्पद्यते। तदुक्तं भगवता श्रीकृष्णेन "अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्"[५] इति।

मानवानां स्वाभाविकी क्रिया भवति श्वासग्रहणमिति "पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् इति सर्वास्ववस्थासु मानवैः स्वासग्रहणं क्रियत एव। श्वासग्रहणकाले ऑक्सीजनतत्त्वस्य

---

१. का. श्रौ. सू. १/२/२

२. अ. ६/९५/१

३. अ. ११/४/१३

४. अ. ८/७/२०

५. गीता १५/१४

ग्रहणम् उच्छ्वासकाले च कार्बन-डाइ-ऑक्साइडतत्त्वस्योत्सर्जनं क्रियते। वनस्पतीनामेषः स्वभावः यत् ते दिवा ऑक्सीजनतत्त्वमुत्सर्जयन्ति कार्बन-डाइ-ऑक्साइडतत्त्वञ्च गृह्णन्ति तेन वायुमण्डले प्राणापानयोरुभयोः तत्त्वयोः सामञ्जस्यं स्थापितं भवति। उपर्युक्तेन विवेचनेन वृक्षादिभिः प्राणतत्त्व-स्योत्सर्जनत्वान्मानवैश्च तद्ग्रहणत्वाद् वृक्ष-वनस्पतयः प्राणरूपा उक्ताः। तदुक्तं श्रुतौ- "प्राणो वै वनस्पतिः"[१] यजुर्वेदस्यैकस्मिन् मन्त्रे- "वनस्पतिः शमिता"[२] अर्थाद्वृक्षवनस्पतयः प्राणतत्त्वमुत्सृज्यापानतत्त्वं गृह्णन्ति। अपानवायुः मानवैरुत्सर्जितस्सन् प्रदूषितो भवति वायुमण्डले यदि तस्याधिक्यं भविष्यति चेत्सर्वमिदं जगत्प्रदूषितं भविष्यति, तस्मात् प्रदूषणग्रहणेनैमे वायुमण्डलं संशोधयन्ति। अत एव वनस्पतीनां कृते शमिता शब्दस्य प्रयोगो विहितः। शमिता = शमनकर्ता वनस्पतयः प्रदूषणानि शमयित्वा प्राणतत्त्वानि प्रयच्छन्तीति। कार्यमिदं मातृवत् दृश्यते। यथा लोके माता शिशूनां संरक्षणं सम्वर्धनञ्च सर्वविधप्रयत्नैः करोति तद्वदेव वृक्ष-वनस्पतयोऽपि जगत्कल्याणाय मातृवत् प्रदूषितानि तत्त्वानि शमयित्वा शिशुसदृशान् मानवादीन् जीवान् संरक्षन्ति। तस्मादुक्तं वेदे- "ओषधीरिति मातरः"[३] इति। वनस्पतयः विविधं विषं नाशयन्ति, प्रदूषणानि च शमयन्ति तस्मादेषां कृते वेदेषु 'विषदूषणी' शब्दस्य प्रयोगो दृश्यते। तद्यथा- "उग्रा या विषदूषणी.......ओषधीः"[४] इति।

वनस्पतय ओषधिरुक्ताः। ओषधिशब्दस्यार्थं कुर्वता श्रीमता यास्काचार्येणाभिहितम्- "ओषधयः ओषद् धयन्तीति वा। ओषत्येना धयन्तीति वा। दोषं धयन्तीति वा।"[५] इति। श्रुतावपि- "ओषं धयेति तत ओषधयः समभवन्"[६] इति। तथा च- "ओषधयः फलपाकान्ताः" सायणाचार्योऽपि- "ओषः पाकः फलपाकः यासु धीयत इति ओषधयः" इत्युक्तः भाष्ये। अर्थाद्येषां फलानि पक्वानि भवन्ति ते ओषधय उच्यन्ते।

ओषधीनामुत्पत्तिस्थानानि

वेदेषु वैदिकसाहित्येषु चौषधीनामनेकान्युत्पत्तिस्थानान्युक्तानि। तानि यथा- "अधि पर्वतात्"[७], "या रोहन्ति पर्वतेषु समेषु च"[८], "अवकोल्बाः"[९], "उदकात्मान ओषधयः"[१०], "उपजीका उद्भरन्ति

---

१. ऐ. ब्रा. २/४
२. यजु.- २९/३४
३. ऋ. १०/९७/४
४. अ. ८/७/१०
५. निरु. ९/२७
६. श.प.ब्रा. २/२/४/५
७. अ. २/३/१
८. अ. ८/७/१७
९. अ. ८/७/९
१०. अ. ८/७/९

समुद्रादधि भेषजम्"[१], "नीचैः खनन्त्यसुराः अरुस्त्राणम्"[२], "पृथिव्या अध्युद्भृतम्"[३], "हरिणस्य अधिशीर्षाणि भेषजम्"[४] इति। अर्थात् काश्चन ओषधयः पर्वतेषूत्पद्यन्ते, काश्चन समतलभूमिषु काश्चनावकेषु (शैवालेषु), काश्चन नदीषु तडागेषु च, समुद्रस्यान्तः स्थले भूमेः अन्तः स्थले च, काश्चन भूगर्भाद्प्राप्यन्ते खनिजाः, काश्चन प्राणिजाः सन्ति ये मृगशृंगादिषु प्राप्यन्ते। काश्चन प्राकृतिकाश्च सन्ति। प्राकृतिकतत्त्वानि– सूर्यः-चन्द्रः, वायुः, अग्निः, जलं पृथिवी च स्वयमौषधिरूपाणि सन्ति। तदाधारेणैव सूर्यकिरणचिकित्सा, वायुचिकित्सा, मृच्चिकित्सा, जलचिकित्सादीनां वर्णनमुपलभ्यते।

एवमुक्तप्रकारेण विभिन्नौषधयः निम्नरूपेषूपलभ्यन्ते–

१. प्राकृतिकाः– सूर्य-चन्द्र-वायु-जल-मृद्भ्यः सकाशादुत्पन्नाः।

२. उद्भिज्जाः– (औद्भिदाः)– पृथिवीं विदार्योत्पद्यमानाः वृक्ष-वनस्पत्यौषधयः।

३. खनिजाः– अज्जन-सुवर्ण-रजतादयः।

४. प्राणिजाः– मृगशृंगादयः।

५. समुद्रियाः– शंखादयश्च।

अत एवोक्तं ऋगादिवेदेषु–

"या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा।
शतं वो अम्बधामानि सहस्त्रमुत वो रुहः।।"[५]

औषधीनां शिवरूपत्वम्

"ओषधयो वै पशुपतिः"[६] इत्यनेन श्रौतवचनेनेदं स्पष्टं यदोषधयः शिवस्वरूपाः सन्ति। शिवशब्दस्य कल्याणं, मंगलं, शुभम्, शान्तस्वरूपमित्यादयोऽनेकेऽर्थाः भवन्ति। शुक्लयजुर्वेदस्य षोडशतमेऽध्याये शिवः वृक्ष-वनस्पति-वनौषधि-लतागुल्मादीनाञ्च स्वामी उक्तः। तद्यथा– "अन्नानां पतये नमः", "जगतां पतये नमः", "वनानां पतये नमः", "वृक्षाणां पतये नमः", "आरण्यानां पतये नमः"[७] इति। पुराणेषु शिवेन हालाहलनामकस्य विषस्य पानविषयिणी कथा श्रूयते। तेनेदं स्पष्टं यच्छिवः विषं पीत्वाऽमृतं वर्षति तदेव शिवस्य शिवरूपत्वम्। स्वयं विषं पीत्वा संसारिणां कल्याणं

१. अ. २/३/४
२. अ. १/३/३
३. अ. २/३/५
४. अ. ३/७/१
५. ऋ. १०/९१/१-२
६. श. प. ब्रा. ६/१/३/१२
७. यजु. सं. १६/१८-२०

करोति। वृक्षवनस्पतीनामपि शिवत्वमेतदेव यत्तेऽपि कार्बन-डाइ-ऑक्साइड-रूपं विषं पीत्वा ऑक्सीजनसदृशममृतमयं प्राणवायुं संसाराय प्रयच्छन्ति। शिवस्यापरं रूपं रुद्रत्वं (भयंकरः) वर्तते। तद्रूपमेव संसारस्य नाशकं संहारकञ्चास्ति। यदि वृक्षाणां कर्तनं अधिकाधिकं क्रियते चेत् वृक्षाणामुपस्थितिरत्राल्पा भविष्यति तेन ऑक्सीजन-तत्त्वस्याभावो भविष्यति। फलतः प्राणवायोरभावे संसारस्य स्वयं विनाशः सुनिश्चित एव।

वृक्ष-वनस्पतिभिरन्येऽपि लाभाः भवन्त्येव यथा- वृक्षाः मधुराणि फलानि प्रयच्छन्ति। ते वर्षकान् मेघान् स्वसम्मुखमाकर्षयन्ति, पृथिवीं च द्रढयन्ति। एते सर्वे विषयाः संसारकल्याणायोपयुक्ताः। तस्मादुक्तं यजुर्वेदे- "माऽपो मौषधीर्हिं ꣳसीः" "सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः।"[१] अर्थाद्वृक्षाणां हिंसनं न कर्तव्यम् "अपः पिन्व, ओषधीर्जिन्व"[२] जलसिञ्चनेन वृक्षाणां रक्षणं करोत्विति।

अनेनोक्तप्रमाणेनेदं सिध्यति यद्वृक्षा अस्माकं रक्षणं कुर्वन्ति अस्माभिश्च वृक्षाणां रक्षणं सर्वविधप्रयत्नेन कर्तव्यम्। यथा लोके सर्पपालकाः महाविषधरान् सर्पान् स्वोदरपूर्तये दुग्धादिकं पाययित्वा पालयन्ति। विषधराणां विषनिक्षेपकान् दन्तान् च भञ्जयित्वा विश्वासेन तान् रक्षन्ति। सर्पाश्चापि इमे अस्माकं हिंसां न करिष्यन्तीति मत्वा तैः सह सभासु नृत्यादिकं कुर्वन्ति। तेन सर्पपालकानां सर्पाणामुभयेषां परस्परं पालनेन रक्षणेन च जीवनं प्रचलति। एवमेव वृक्षा अस्माकं प्राणदायकाः इति मत्वा अस्माभिः वृक्षाणां पालनं कर्तव्यम्।

ऋग्वेदे मानवानां रक्षकत्वेन वृक्षवनस्पत्यौषधयः पर्वताश्च वर्णिताः सन्ति। तद्यथा- "आप ओषधीरुत नोऽवन्तु, द्यौर्वना गिरयो वृक्षकेशाः"[३] इति। वनेषु विविधेषु वृक्षेषु सुगन्धितानि पुष्पाणि मधुराणि फलानि चोत्पद्यन्ते। येन वनेषु मानसिकीशान्तिर्लभ्यते। विषयेऽस्मिन् राज्ञः भर्तृहरेर्पद्यमत्यन्तमुपयुक्तं दृश्यते-

मही रम्या शय्या विपुलमुपधानं भुजलता।
वितानं चाकाशं व्यजनमनुकूलोऽयमनिलः।।

शरच्चन्द्रो दीपो विरतिवनिता सङ्गमुदितः।
सुखी शान्तः शेते मुनिरतनुभूतिर्नृप इव।।[४]

---

१. यजु. ६/२२
२. यजु. १४/८
३. ऋ. ५/४१/११
४ भर्तृहरि वैराग्यशतकम् ९४

राज्ञा वन्यस्य सुखस्य वर्णनं राजगृहादप्युत्तमतया प्रस्तुतम्। अत: वन्यं जीवनं सर्वविधसुखशान्त्यर्थ-मत्युपयुक्तमस्तीति सिद्ध्यति। अथर्ववेदस्यैकस्मिन् मन्त्रे वृक्ष-वनस्पतीनां मातापित्रो: वर्णनं कृतं दृश्यते। तद्यथा– "यासां द्यौ: पिता, पृथिवी माता, समुद्रो मूलं वीरुधां बभूव।।"[१] अनेन मन्त्रेणेदं सुस्पष्टं यत् वनस्पतीनां पिता द्युलोकोऽस्ति, पृथिवी माताऽस्ति, समुद्रश्च वृष्टेराधारत्वादोषधीनां मूलमस्तीत्युक्तम्। वृष्टिस्तु सृष्टेराधार:, यत: वृष्ट्यैव वृक्ष-वनस्पतीनामुत्पत्तिर्भवति तेनैव च वनस्पतय: जीवनीशक्तिमाप्नुवन्ति। वृष्टिरोषधीनां प्राणदाता रक्षकश्चास्ति। तदुक्तं वेदे– "यदा प्राणो अभ्यवर्षीत्, ओषधय: प्रजायन्ते।"[२] वृष्टिकारकेषु मरुद्गणानां मुख्या भूमिका भवति, ते समुद्राज्जलं वाष्परूपेण ऊर्ध्वमारोहयन्ति, मेघानां रचनां च कृत्वा जलानि वर्षन्ति। तस्मान्मरुद्गणानां स्तुति: वेदेषूपलभ्यते तद्यथा– "य आसिञ्चन्ति रसमोषधीषु"।[३]

अथर्ववेदस्यैकस्मिन् मन्त्रे "ओषधीषु प्रतितिष्ठा शरीरै:"[४] इदमुक्तं यज्जीवा: मृत्योरनन्तरं ओषधिरूपेष्वपि पुनर्जन्म गृह्णाति। यथा– "यमलार्जुनौ" कस्माच्चित् शापवशाद्वृक्षरूपमवाप्तवन्तौ कालान्तरे भगवता श्रीकृष्णेन लीलया तयोरुद्धार: कृत:। बृहदारण्यकोपनिषदि च–

यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा।
तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहि:।।[५]

अर्थाद् वृक्ष-वनस्पतयोऽपि मनुष्यसदृशा एव सन्ति, यथा मनुष्यशरीरे लोमानि तथैव वृक्षेषु पत्राणि भवन्ति, उभयोरपि शरीरयो: त्वक् भवन्ति। मनुष्यस्य त्वक्कर्तनेन रक्तं नि:सरति वृक्षाणां च त्वचाभि: रस: नि:सरति, मानवशरीरे मांसो भवति वृक्षशरीरे शर्करा, मानवशरीरे अस्थि वृक्षशरीरे काष्ठानि उभयो: व्रणानि च पूरितानि भवन्ति।

महाभारतस्य शान्तिपर्वणि वृक्ष-वनस्पतिषु पञ्चमहाभूतस्य दर्शनशास्त्रे विवेचितस्य पञ्चीकरणस्य च स्थिति: कथं वर्तत इत्यस्मिन् सन्दर्भे निम्नपद्यान्युक्तानि सन्ति, तानि यथा–

वक्त्रेणोत्पलनालेन यथोर्ध्वं जलमाददेत्।
तथा पवनसंयुक्त: पादै: पिबति पादप:।।(१६)

घनानामपि वृक्षाणामाकाशोऽस्ति न संशय:। (१०)
म्लायते शीर्यते चापि स्पर्शस्तेनात्र विद्यते। (११)

---

१. अथर्व ३/२३/६
२. अ. ११/४/१९
३. अ. ४/२७/२
४. अ. १८/२/७
५. वृदहा. ३/९/२८

वाय्वग्न्यशनिनिर्घोषैः .... तस्मात् शृण्वन्ति पादपाः। (१२)
वल्ली वेष्टयते वृक्षं .... तस्मात् पश्यन्तिपादपाः।। (१३)

पुण्यापुण्यैस्तथा गन्धैः .... तस्मात् जिघ्रन्ति पादपाः।। (१४)
पादैः सलिलपानाच्च .... विद्यते रसनं द्रुमे।। (१५)

सुखदुःखयोश्च ग्रहणात् छिन्नस्य च विरोहणात्।
जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते।। (१७)

अनेन पुराणोक्तवचनेनेदं सिद्ध्यति यद्वृक्ष–वनस्पतिषु चैतन्यं जीवत्वं मानवैरिव पञ्चीकरणत्वञ्च निश्चितरूपेण विद्यत एव। तथा च यथा हि मानवेषु लिंगभेदो दृश्यते तदुक्तं महर्षिणा हारीतेन–

संयोगेन विना प्राज्ञ कथं गर्भो न विद्यते।
संयोगेन विना पुष्पं फलं वा न कथं भवेत्।।

तत स्त्री-पुरुष-गुणा वर्तन्ते समयोगतः।
आम्रपुष्पं फलं तद्वद् बीजं शुक्रमयं विदुः।।[१]

चरकसंहिताया कल्पस्थानप्रकरणे वृक्षवनस्पतिषु स्त्री–पुरुषात्मकः लिंगभेदः कृतः दृश्यते। तत्र विशेषेण वत्सकपादपसम्बन्धे एवमुक्तं यत्–

बृहत्फलः श्वेतपुष्पः स्निग्धपत्रः पुमान् भवेत्।
श्यामाचारुणपुष्पास्त्री फलवृन्तैस्तथाऽणुभिः।।[२]

अत उपर्युक्तेन विवेचनेनेदं सिध्यति यत् यथा मानवानां रक्षणं सर्वकारीय तन्त्रस्य महत्त्वपूर्णं प्रमुखं च कार्यं तद्वदेव वनानां वृक्षवनस्पत्यौषधीनां संरक्षणमत्यावश्यकमेव। न केवलं सर्वकारीयतन्त्रैरेवापितु सर्वैः मानवैरपि तत् प्राणदातृत्वात् जीवनी शक्तेरुत्सर्जकत्वाच्च सदा सर्वदा संरक्षणीयमिति शम्।

---

१. हारीत–शरीर–१

२. चरक. कल्प ५/५

नञर्थविचारः

डॉ. रामसलाहीद्विवेदी

संस्कृतस्य महिमानमपारेऽपि संसारे को न वेत्ति इति सुविदितमेव। समस्तमपि जगत् स्थावरजङ्गमादिभेदसंयुक्तमपि आर्यम्लेच्छभेदात् द्विधा विभक्तम्। अयञ्च भेदः वक्तृगतः। तत्राऽपि आर्याः धर्मं लभन्ते नेतरे, आर्याः यशो लभन्ते नेतरे। तदेव मनस्याधाय गोनर्दीयेन आचार्येण साग्रहमिदं सम्वुक्तम्-**'म्लेच्छा मा भूमेत्यध्येयं व्याकरणम्।'**[1] मीमांसायामपि आर्यम्लेच्छाधिकरणे[2] यवपदस्य दीर्घशूके एव शक्तिः समवधारिता, आर्याणां प्रसिद्धेः बलवत्वात्। तस्मात् म्लेच्छभियो परित्रातुं समर्थञ्चेत् किमपि शास्त्रं तच्च शास्त्रं व्याकरणमेव। इदञ्च शास्त्रम् आगममूलकम् ऋषिभिर्दृष्टत्वेन श्रुतिरूपञ्च। उक्तञ्च हरिणा-

आविर्भूतप्रकाशानामनुपप्लुतचेतसाम्।
अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते।।[3]

अभिप्रायश्चायमस्याः कारिकायाः यत् सर्वमपि वस्तु ऋषीणां कृते प्रत्यक्षाद्व्यतिरिक्तन्न, यतः ये ऋषयः निर्दग्धकिल्विषा अनावरणख्यातयः तेषां ज्ञानमतीतानागतकार्यानुकूलमदपि अस्मदादीनां यत्प्रत्यक्षं तदपेक्षया विलक्षणन्न। किन्तु अलौकिकत्वेऽपि प्रत्यक्षजात्या तुल्यमेव। अत्र तावदिदं विभावनीयं भवति यत् असत्कार्यवादिनः तार्किकाः उत्पत्तेः प्राक् असतां भावानां स्वकारणसामग्रीसमवधाने समुत्पत्तिर्भवति इति मन्वते।

अतस्तेषां मते निरूपाख्यतया क्वचिदपि उपादानकारणे न सम्बद्धं तत्। स्वरूपाभावात् अवस्तु एव इति। अत एव निस्स्वभावम्। एवमेव पूर्ववता शेषवता अनुमानेन तदधिगन्तुं न शक्यते। अन्ये च तदानीं कार्यमस्ति इति मन्यन्ते। परं तद्रूपं कार्यम् अतिसूक्ष्मं सत् तिष्ठति। अतः न प्रत्यक्षसमधिगम्यम्। येन अस्मदादयः शशविषाणादिवत् कार्यमपि तदानीं न प्रत्यक्षं कुर्वन्ति इति। परन्तपसा निर्दग्धकिल्विषा

१. व्याकरणमहाभाष्यम्, पस्पशाह्निकम्, पृ. सं. १२ (सं.-युधिष्ठिरमीमांसक, चौखम्भा विद्याभवन, वाराणसी)

२ आर्यम्लेच्छाधिकरणस्य तु इदं तात्पर्यम्। तत्र हि यद्यपि आर्याः 'यव' शब्दं दीर्घशूके प्रयुञ्जते तमेव च बुध्यन्ते म्लेच्छास्तु प्रियङ्गौ प्रयुञ्जते तमेव च बुध्यन्ते। 'म्लेच्छ'पदेनानार्याः। तथापि आर्यप्रसिद्धेर्बलवत्वाद् वेदे दीर्घशूकपरतैवेति सिद्धान्तितम्। वै. सि. ल. म., शक्तिनिरूपणम्, पृ. सं. ६० (चौखम्भा संस्कृत सिरीज, १९६३)

३. वाक्यपदीयम्, ब्रह्मकाण्डम्, श्लोकसं. ३७

निरावरणख्यातयः श्रेष्ठाः बहिरसतः अपि अतीतादीन् पदार्थान् प्रतिबिम्बवत् स्वबुद्धिषु सङ्क्रान्ताकारपरिग्रहान् वासनारूपेण स्थितान् अव्यभिचारेण प्रत्यक्षमवलोकयन्ति।

अस्यां स्थितौ एवम्भूतं शास्त्रं स्वतः प्रमाणसिद्धं नितान्तम् अपेक्षितं भवति। तदेव शास्त्रं व्याकरणमिति सुधियः वदन्ति। उक्तञ्च हरिणा-

तस्मादकृतकं शास्त्रं स्मृतिं च सनिबन्धनाम्।
आश्रित्यारभ्यते शिष्टैः शब्दानामनुशासनम्॥[१] इति

अत एव शास्त्रेऽत्र सर्वं वचनेनैव प्रमाणितम्भवति। तेनैव भाष्यकृता तत्तत्सूत्रव्याख्यावसरे 'तत्तर्हि वक्तव्यं न वक्तव्यम्, कथम् अनुच्यमानं गंस्यते'[२] इत्यादिपदावलिः बहुशः प्रयुज्यते। न्यायादिनये तु तर्कस्यैव प्राधान्यात् परिष्कारादिकौशले 'इति कुत्रोल्लिखितमि'ति नापेक्ष्यते। अपितु दोषवारणमेव फलमुपादाय लक्षणस्य गरीयस्त्वमधिगम्यते। तत्र वचनस्य निर्मूलत्वात् अत्यन्तं लौकिकत्वाच्च कथञ्चित् दृष्टफलकत्वं विभाव्य अदृष्टफलकत्वन्तु सुदूर एव। अत एव पारायणादौ न पुण्यजनकत्वं तस्य। 'एकः शब्दः'[३] इत्यादिवचनस्याऽपि शास्त्रमूलकत्वे एव शरणमिति विभावनीयम्। शास्त्रञ्चाऽत्र ऋषिनिगदितं व्याकरणमेव। एवम्भूतस्य चाऽस्य गौरवम् आदधानस्य शास्त्रस्य उत्सर्गापवादमूलिकापद्धतिः सर्वत्राऽपि बर्भर्ति। सामान्यधर्मावच्छिन्नोद्देश्यताकशास्त्रमुत्सर्गशास्त्रम्। विशेषधर्मावच्छिन्नोद्देश्यताकशास्त्रं निषेधशास्त्रम्। तत्राऽपि अपवादशास्त्राणां प्रवृत्तिः विधिमुखेन निषेधमुखेन च भवति। तत्र निषेधस्तु नञैव प्रतिपाद्यते। अतः प्रसङ्गोऽपात्तः नञर्थः कीदृशः इति निरूप्यते। नञर्थमधिकृत्य कश्चित् प्रवादः सुप्रसिद्धः -

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥[४] इत्यादिरूपः।

तत्सादृश्यमित्यस्य 'अब्राह्मणः', 'अभावश्च' इत्यस्य 'अपापम्', तदन्यत्वमित्यस्य 'अनश्वः', तदल्पता इत्यस्य 'अनुदरा कन्या', अप्राशस्त्यमित्यस्य 'अपशव', विरोध इत्यस्य 'अधर्म' इत्यादीनि उदाहरणानि। अयमभिप्रायः 'अब्राह्मणः' इत्यस्य 'अब्राह्मणमानय' इत्यादौ ब्राह्मणसदृशं सादृश्यञ्च सन्ध्योपासनादिकर्मणामर्हत्वेन इति सादृश्यमुपादाय शूद्रभिन्नः द्विजः क्षत्रियादिः एव गृह्यमाणो भवति। तस्यैव आनयनं विधीयते। अतोऽत्र सादृश्यं नञर्थत्वेन ग्राह्यम्। इदन्तु पर्युदासपदेनाऽपि अभिधीयते।

---

१. वाक्यपदीयम्, ब्रह्मकाण्डम्, श्लोकसं. ४३

२. व्याकरणमहाभाष्यम्, तृतीयाह्निकम्, पृ. सं. २४९-५० (सं.-युधिष्ठिमीमांसक, चौखम्भा विद्याभवन, वाराणसी)

३. यद्यपीदं वेदवचनन्तथापि व्याकरणमहाभाष्यस्य सुप्रसिद्धप्रदीपटीकायां शब्दज्ञानस्य धर्मजनकताधिकरणे कैयटेन प्रयुक्तम्। व्याकरणमहाभाष्यम्, प्रदीपटीका, पृ. सं. ५४ (सं.-युधिष्ठिमीमांसक)

४. वैयाकरणभूषणसारे, पृ. सं. २९३ (व्या.-चन्द्रिकाप्रसादद्विवेदी, चौखम्भा संस्कृत प्रतिष्ठान, वाराणसी)

कुत्रचित् भेदविशिष्टसादृश्यबोधकत्वमपि नञ उपलभ्यते। यथा–'मृगो न भीमः'। यत्र निषेधः तत्तु प्रसज्यप्रतिषेध इतिपदेन प्रतिपाद्यते। प्रसज्यप्रतिषेधे तु यद्यपि गौरवं यथा–वाक्यभेदः प्रथमन्तावत् प्राप्तिकल्पनं, द्वितीयं निषेधवाक्यकल्पनम्। अथ च वक्तुरप्रामाण्यापत्तिः। एवञ्च 'उदिते जुहोति अनुदिते जुहोति' इत्यादिवत् पर्यायतापत्तिः, समासादौ असमर्थकल्पना च करणीया भवति। काव्येषु वक्तुराप्तत्वं परिकल्प्य कविभिर्पर्युदासस्यैव अङ्गीकारः कृतः। उक्तञ्च रघुवंशे षोडशे महाकविकालिदासेन–

का त्वं शुभे! कस्य परिग्रहो वा किं वा मदभ्यागमकारणं ते।
आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्तिः॥[१] इति

अत्र अर्थतः पर्युदासः लभ्यते 'वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्तिरिति मत्वा सर्वम् आचक्ष्व' इत्यादि। फलमुखगौरवं न दोषास्पदमिति मत्वा शास्त्रेऽत्र प्रसज्यप्रतिषेधोऽपि क्वचिदङ्गीक्रियते सति विनिगमके यथा "**अनचि च**"[२] इत्यादौ अचि द्वित्वन्न इति व्याख्याय अवसाने 'वाक्क्' 'वाग्ग्' इत्यादौ द्वित्वं परिकल्प्य फलमुपात्तम्।

एतेन अयं निष्कर्षः सिद्ध्यति यत् समासस्थले सर्वत्र नञः पर्युदासत्वमेव अङ्गीकार्यम्। सति विनिगमके तु प्रसज्यप्रतिषेधस्याऽपि कल्पना कर्त्तव्या। अत एव 'असूर्यम्पश्याः राजदाराः' इत्यत्र राजदाराः सूर्यं न पश्यन्ति' इत्यर्थः उपकल्प्यते। अत्र धर्मिग्राहकमानात् समासादिकल्पनाऽपि सम्भवत्येव। यद्यपि केचन आचार्याः "**अर्थवदधातुरप्रत्ययः प्रातिपदिकम्**"[३] इत्यत्र अर्थवद्ग्रहणात् "**नञिवयुक्तमन्यसदृशे तथा ह्यर्थगतिः**"[४] इति न्यायस्य अनित्यत्वमुपकल्प्यते। तथापि दृढतरप्रमाणाभावात् इदं न साम्प्रतं प्रतिभाति। अत एव भगवता पतञ्जलिना "**अनचि च**" इत्यादौ प्रसज्यप्रतिषेधस्यैव न्यायं संसूचितम्। "**स्थानिवदादेशोऽनल्विधौ**"[५] इत्यादौ 'रामान्' इत्यादौ समापतितस्य दोषस्य निराकरणं "**वेः स्कन्देरनिष्ठायाम्**"[६] इत्यत्र 'अनिष्ठायाम्' इत्यादिपर्युदासबलात् करणीयम् इत्यादि।

अत्र इदम् अवधेयं यत् इमे अर्थाः अर्थतः उपलभ्यन्ते न तु वाच्यार्थरूपेण यथा 'अब्राह्मणः' इत्यादौ आरोपितः ब्राह्मणः इति शाब्दबोधोत्तरमेव सादृश्यादेः बोधः मानसः भवति। 'अनुदरा कन्या' इत्यादौ तु अल्पत्वादिप्रयोज्योदराभावरूपेण नञ्साहित्येन अल्पत्वस्य लाभः प्रतीयते। तेन सर्वत्राऽपि प्रतीयमानाः अर्थाः शब्दस्य न विषयाः भवन्ति। अत एव नञः आरोपितत्वमर्थ इति। तेनैव 'असर्वस्मै'

---

१. रघुवंशम्, १६/८
२. पाणिनिसूत्रसंख्या ८/४/४७
३. पाणिनिसूत्रसंख्या १/२/४५
४. परिभाषेन्दुशेखरः, परिभाषासंख्या – ७५
५. पाणिनिसूत्रसंख्या १/१/५६
६. पाणिनिसूत्रसंख्या ८/३/७३

इति प्रयोगस्य सिद्धिः। अन्यथा नञः विशेष्यत्वे सर्वस्य अभावः इति प्रतीतौ अभावार्थनिष्ठविशेष्यता-निरूपितप्रकारतायाः आश्रयत्वात् उपसर्जनत्वेन प्रतिबन्धकस्य समवस्थानेन सर्वनामत्वं न स्यात्। अतः आरोपितत्वं नञर्थ इति केषाञ्चिन्मतं सुसम्पन्नम्। परन्तु 'घटः नास्ति' इत्यत्र 'आरोपितो घटः' इत्याकारकबोधः सर्वानुभवविरुद्धः। अतः अभावः नञर्थः इति केषाञ्चिन्मतम्। उक्तञ्च वैयाकरणभूषणे-

अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात्।
विशेषणं विशेष्यो वा न्यायतस्त्ववधार्यताम्॥[१]

अत्र मते भाष्यमेव प्रमाणं भवति। तच्च भाष्यम् ''**नञ्**''[२] इति सूत्रस्थमेव। तत्र भाष्ये 'निवृत्तपदार्थकः' इत्युक्तं यस्य 'निवृत्तं पदार्थो यस्य' इति विग्रहः '**नपुंसके भावे क्तः**'[३] इति क्तः। यद्यपि अस्य पदस्य कैयटेन व्याख्यानम् अन्यथैव साधितम्। तत्तु 'निवृत्तः पदार्थः यस्मिन्' अर्थात् 'अब्राह्मणः' इत्यादौ अध्यारोपितब्राह्मण्याः क्षत्रियादयः अर्थाः यस्य' इति। तत्तु न क्षत्रियादेः वाच्यत्वं यथा निरस्तीकृतम् अस्माभिः। तेनैव अस्यापि खण्डितत्वात्। इदन्तु अवधेयमेव यत् नञः वाच्यस्य अभावस्य विशेषणत्वमेव उपकल्पनीयम्भवति। तेन 'असर्वस्मै' इत्यत्र असर्वत्वसिद्धिः 'सेव्यते अनेकया सन्नतापाङ्ग्या' 'अनेकमन्यपदार्थे' इत्यत्र एकवचनोत्पत्तिः, 'अब्राह्मणः' इत्यत्र उत्तरपदार्थस्य प्राधान्यम्, 'अत्वं भवसि', 'अनहं भवामि' इत्यत्र मध्यमोत्तमसिद्धिः। अयं भावः अनेकम् इत्यस्य एकत्वप्रतियोगिकोऽभावः इत्यर्थे तदभाववत्ताबुद्धिः तद्वत्ताबुद्धेः प्रतिबन्धकत्वात्। एकत्वस्य अभावेन एकवचनं नोपपद्येत। अतः अभावः विशेषणमेव।

अन्ये तु अभावः विशेष्यमेव इति वदन्ति। न चाऽत्र मते पूर्वोक्तानां दोषाणाम् अनुद्धारो भवति। सर्वत्राऽपि उद्धारस्य सत्वेन दोषाभावात् तत्प्रकारस्तु अवलोक्यताम्। तत्र प्रथमं 'असर्वः' इत्यस्य ''**एतत्तदोः सुलोपोऽकोरनञ्समासे हलि**''[४] इत्यत्र अनञ्समासे इति ज्ञापकेन दोषाभावः उपपादनीयः। तद्यथा अत्र सूत्रे 'अकोः' इति पर्युदासबलात् ''**न हि यूथभ्रष्टा मृगी गर्दभिषु मृग्यते**''[५] इति नयेन च 'एतत्तदोः' सर्वनामत्वविशिष्टयोरेव ग्रहणं कर्तव्यम्। 'असः शिवः' इत्यत्र तु नञर्थप्राधान्यानुरोधेन तदित्यस्य उपसर्जनत्वे सर्वनामत्वाभावादेव सुलोपाप्राप्तिः, किमनेन अनञितिपर्युदासेन। तेनैव ज्ञाप्यते यत् नञर्थाभावनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वेऽपि सर्वनामत्वस्य परित्यागः न भवति इति। तेन अत्राऽपि न दोषः। ''**अनेकमन्यपदार्थे**''[६], 'अनेकया सन्नतापाङ्ग्या' इत्यादौ

१. वैयाकरणभूषणसारे, पृ. सं. २९०
२. पाणिनिसूत्रसंख्या २/२/६
३. पाणिनिसूत्रसंख्या ३/३/११४
४. पाणिनिसूत्रसंख्या ६/१/१३२
५. वाल्मीकिरामयणम्, सुन्दरकाण्डम्
६. पाणिनिसूत्रसंख्या २/२/२४

अन्यपदार्थानुरोधेन साधुत्वार्थकैवचनोपादानेन वा सङ्गतिः करणीया। 'अत्वं भवसि' इत्यादौ तु युष्मद्शब्दस्यैव युष्मदन्ये लक्षणा नञितिपदं तत्र तात्पर्यग्राहकं "**गभीरायां नद्यां घोषः**"[१] इत्यादौ गभीरपदवत्। तेन भिन्नार्थस्यापि युष्मदर्थत्वेन तिङ्वाच्यवाचकत्वात् 'अत्वं भवसि' इत्यत्र मध्यमः 'अनहं भवामि' इत्यत्र तूत्तमः सिद्ध्यतः। अतः अनुभवानुरोधेन भाष्यानुरोधेन वा न्यायतः अभावार्थस्य विशेष्यत्वमेव उपकल्पनीयम्। वैयाकरणनिकाये अवश्यमेव नञः द्योतकत्वमेव अङ्गीकरणीयम्। अन्यथा 'ग्रामं न गच्छति', 'फलं न खादति' इत्यत्र कर्मसञ्ज्ञा न स्यात्। मम मते तु उत्तरदेशसंयोगाभावानुकूलव्यापाररिति गमेरर्थस्वीकारे न कश्चिद्दोषः। उत्तरदेशसंयोगाभावाश्रयत्वं ग्रामादीनामस्त्येव। तेन प्रकृतधातूपात्तप्रधानीभूतव्यापारप्रयोज्यफलाश्रयत्वेन अत्यन्तमाप्तुमिष्यमाणत्वात् तस्य कर्मत्वं निर्बाधम्भवति, यतः ईप्सिततमत्वं स्वप्रयोज्यत्व[२] स्ववाचकधातुवाचकत्वम् इत्युभयसम्बन्धेन व्यापारविशिष्टफलाश्रयत्वम् इत्यादिरूपेण सुप्रसिद्धमेव। अत्र यद्यभावः नञर्थः स्यात्तर्हि स्ववाचकधातुवाच्यत्वाभावात् 'एकसत्वेऽपि द्वयं नास्ति' इति लौकिकप्रतीत्या ईप्सिततमत्वस्य अभावेन कर्मत्वं सर्वथा असम्भवि परिकल्पितं स्यात्। 'अभावश्चात्र अत्यन्ताभाव एव। स च संयोगानुकूलव्यापारस्याभावः। तदनुकूलता च प्रधानव्यापारे न तज्जनकतारूपा, अपि तु तदभावप्रयोजकाभावप्रतियोगितारूपा। तथा च संयोगानुकूलव्यापाररूपतदभावाभावप्रयोजकाभावप्रतियोगित्वं निवारकवृत्तिव्यापारेऽक्षतम्। अभावयोः प्रयोज्यप्रयोजकभावश्च स्वरूपसम्बन्धविशेष एव। व्यापकाभावप्रयोज्यत्वस्य व्याप्याभावे व्यवहारात्। यथा-वह्न्यभावप्रयोज्यो धूमाभाव इति।'[३] यद्यप्ययं विषयः 'अग्नेर्माणवकं वारयति'[४] इत्यादिप्रयोगावसरे चर्चितः। तथापि धात्वर्थकुक्षौ अभावस्तु अङ्गीकृतः एव। अनेनैव प्रकारेण सर्वत्राऽपि नञः समभिव्याहारे धातोः अभाववाचकत्वम् उपकल्पनीयमेव। अत एव सकर्मकत्वाकर्मकत्वविभागोऽपि अञ्जसोपपन्नो भवति। वैयाकरणभूषणेऽपि-

संबोधनान्तं कृत्वोर्थाः कारकं प्रथमो वतिः।
धातुसम्बन्धाधिकारनिष्पन्नमसस्तनञ् ॥

तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम्।
साधुत्वमष्टकस्यास्य क्रिययैवावधार्यताम्॥[५]

इति कारिकाद्वये नञर्थमादाय किमपि विशिष्टमेव परिचर्चितम्। तत्र इदमुक्तं यत् 'प्रकारतासम्बन्धेन नञर्थविशेष्यबोधे धातुजन्यभावनोपस्थितेः हेतुत्वस्य क्लृप्तत्वात्'।[६] परिष्कृतञ्चेदं पूज्यैः श्रीगुरुचरणैः

१. लक्षणायाः उदाहरणम्
२. लघुशब्देन्दुशेखरः, 'कर्तुरीप्तितमं कर्म' सूत्रस्थदीपिकायाम्, पृ. सं. ४४३ (चौ. प्र. वाराणसी)
३. तदेव
४. सिद्धान्तकौमुदी, 'वारणार्थानामीप्सितः' इत्यस्योदाहरणम्
५. वैयाकरणभूषणसारः, धात्वर्थनिर्णयः, कारिका संख्या-१६-१७
६. वैयाकरणभूषणसारः, धात्वर्थनिर्णयः, पृ. सं. ३९ (व्याख्याकारः- पं. श्री गोपालशास्त्री नेने, श्रीहरिकृष्णनिबन्ध भवनम्, वाराणसी, १९७६)

महामहोपाध्याय पं. श्रीगोपालशास्त्रिनेनेमहाभागैः सरलाव्याख्यायां 'नञर्थनिष्ठविशेष्यता-निरूपितप्रकारतासम्बन्धेन शाब्दबोधं प्रति भावनात्वावच्छिन्नविषयिणी धातुजन्योपस्थितिः कारणम् इति कार्यकारणभावस्य क्लृप्तत्वादित्यर्थः।'[१] परन्तु नव्यनये 'ग्रामं न गच्छति' इत्यादौ कर्मत्वसिद्धये नञर्थस्याऽपि धात्वर्थत्वेन प्रतीतेः नितरामपेक्षितत्वात् मदुक्तः एव अर्थः अङ्गीकरणीयः। अतः नञः तात्पर्यग्राहकत्वमेव अङ्गीकरणीयमिति। श्रीदीक्षितोऽपि 'शेषं नञर्थनिर्णये वक्ष्यते'[२] इति सम्मुलेखेन 'न त्वं पचसि' इत्यादौ च मध्यमदर्शनेन नञः तात्पर्यग्रहकत्वमेव समर्थितवान्। अत एव तेनाऽपि 'त्वं न पचसि' इत्यत्र त्वदभिन्नाश्रयकपाकानुकूलभावनाभावः इत्यादिरूपेण शाब्दबोधोऽपि अङ्गीकृतः।

एवं प्रकारेण नञर्थः मया परिशीलितः। तत्र एतावान् निष्कर्षः -

- यन्नञर्थः न आरोपः।
- सादृश्यभावादीनाम्प्रतीतिरपि औपाधिकी।
- असति प्रतिबन्धके विशेषत्वमेव।
- सिद्धान्तस्तु नञर्थः द्योत्यः न तु वाच्यः इत्यादि।

  मन्येहं सुधियः मुदमवाप्स्यन्तीति।

---

१. वैयाकरणभूषणसारः, सरलाव्याख्या, पृ. सं. ३९ (व्याख्याकारः-पं. श्री गोपालशास्त्री नेने)

२. वैयाकरणभूषणसारः, धात्वर्थनिर्णयः, पृ. सं. ३९ (व्याख्याकारः- पं. श्री गोपालशास्त्री नेने)

भाषातत्त्वम्

डॉ॰ श्रेयांशद्विवेदी

मानवजीवने भाषाया: महत्त्वपूर्णं स्थानं विद्यते। भाषा मानवानां श्रेष्ठा ज्योति:। वस्तुत: मानवानां व्यवहारसम्पादनाय भाषा एव तत्त्वम् उक्तमपि–

वाग्रूपता चेन्निष्क्रामेदवबोधस्य शाश्वती।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्षिणी।।[१]

अस्यायं भाव:–यथा प्रकाशकत्वमग्ने: स्वरूपं यथा वा चैतन्यम् अन्तर्यामिण: परमेश्वरस्य स्वरूपं, तथा सकलमपि ज्ञानं सूक्ष्मतया वाग्रूपतया स्थूलशब्दस्योपादानभूतया स्वरूपभूतयानुगतम्। यापि च सुषुप्तिरूपाऽसंचेतितावस्था तस्यामपि च सुखविषयके मोहविषयके चाविद्यावृत्तिरूपे ज्ञाने सूक्ष्मो वाग्धर्मानुगमोऽभ्यावर्तते। अन्यथा सौषुप्तज्ञाने शब्दानुवेधाभावे तत्समानविषये तज्जन्यसंस्कारे तज्जन्ये स्मरणे च तत्समानविषये शब्दानुवेधाभावे 'सुखमहमस्वाप्सं न किंचिदवेदिषम्' इति स्मरणस्याभिलापो नोपपद्येत। अतस्तत्रापि सूक्ष्मालब्धवृत्ति: शब्दभावनाज्ञानेऽनुवर्तत एवेति मन्तव्यम्[२]। अतएव वेदे निगदितं यत् **'अक्षरेण प्रति मिम एताम्'**[३] अहम्=परमात्मा अक्षरेभ्य: भाषाया: निर्माणं करोमि। वयमपि सर्वे प्रतिदिनं भाषाया: प्रयोगं कुर्म:। भाषा अस्माकं जीवनस्य अविभाज्यम् अङ्गं वर्त्तते। उक्तमपि **'तां द्योतमानां स्वर्यं मनीषाम्'**[४] भाषा तेजोमयी सुखदात्री च अस्ति। अस्माकं जीवनस्य भाषां विना कीदृक् स्वरूपं भविष्यति इति वयं कल्पनामपि कर्तुं न शक्नुम:। मानवानां कृते भाषा परमात्मन: प्रदत्तं वरम् अस्ति। उक्तमपि **'ततान श्रवो देवेष्वमृतमजुर्यम्'**[५] भाषा देवेभ्यो मानवेभ्यश्च यशोऽमरत्वं च यच्छति। **'तस्या: समुद्रा अधिविक्षरन्ति'**[६] वाक्तत्त्वस्य सागर: परितो व्याप्तोऽस्ति। मानवै: सहस्राधिकवर्षेभ्य: कृताया: साधनाया: फलत: ज्ञान–विज्ञानक्षेत्रे सफलता समधिगता। उक्तमपि

१. वाक्यपदीयं ब्रह्मकाण्डे १२४
२. वाक्यपदीयं ब्रह्मकाण्डे १२४
३. ऋग्वेदे १०.१३.३
४. ऋग्वेदे १०.१७७.२
५. ऋग्वेदे ३.५३.१५
६. ऋग्वेदे १.१६४.४५

'येना नः पूर्वे पितरः पदज्ञाः'[१] अस्माकं पूर्वजाः भाषातत्त्वस्य पदतत्त्वस्य ज्ञातर आसन्। अनवरतं सूचना प्रौद्योगिकी युगे कियन्त्यः विद्या विकसन्ति च। न्यायमीमांसा प्रभृतयः प्राचीनतमाः ग्रन्थाः सन्ति। साम्प्रतं विभिन्नानां नवीनशास्त्राणां विकासः अनुदिनं जायमानम् अस्ति। एतत् सर्वं विकासः भाषाविकासः। उक्तमपि–

अहमेव वात इव प्र वामि, आरभमाणा भुवनानि विश्वा।
परो दिवा पर एना पृथिव्यैतावती महिना सं बभूव।।[२]

अखिलब्रह्माण्डे भाषा सर्वशक्तिसम्पन्ना वायोरिव सर्वत्रगतिमती लोकनिर्मात्री नूतनसृष्टिनिर्मात्री च चेतनाविरहिते मानवे समाजे च चेतनां प्रकटयन् आह्लादं जनयति।

वागेव विश्वा भुवनानि जज्ञे, वाच इत् सर्वममृतं यच्च मर्त्यम्।
अथेद् वाग् बुभुजे वागुवाच पुरुत्रा वाचो न परं यच्च नाह।।[३]

वागेव बुद्ध्यात्मना स्थितं सूक्ष्मं वाक्तत्त्वमेव विश्वा भुवनानि सर्वाणि भुवनानि वाच्यवाचकोभयात्मकानि जज्ञे जाता इन्द्रियाणि प्राणं च द्वारीकृत्य, वाच इत् वाच एव इदिति अवधारणेऽव्ययम्। यदमृतमाकल्पान्तं स्थायि वियदादिकं यच्च मर्त्यं मध्ये एव विनाशि कार्यजातम्, तज्जज्ञे। न केवलं वाग् मर्त्यामर्त्योभयरूपभोग्यात्मनैव जाता इत्याह–अथेद् वाग् बुभुजे। अथ वाग् इद् वागेव, बुभुजे आन्तरज्ञातृरूपेणावस्थिता बुभुजे भोक्त्री, वागेव पुरुत्रा बहुभिः प्रकारैः, पुरुशब्दाद् बह्वर्थात् त्रा प्रत्ययःप्रकारे।[४] उवाच वक्त्री प्राणं द्वारीकृत्य शब्दानां बहुधा प्रयोक्त्री। यच्चन चनेत्यप्यर्थे निपातः। यत् किंचिदपि आह वक्ति जनः, तत्सर्वं शब्दाभिधेयमर्थजातं वाचो न परं न भिन्नम्, परं वागात्मकमेव, वागुपादानकत्वादिति।[५]

भाषा स्वयमेव सत्तां दधाति। उक्तमपि-तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम्।[६] भाषाणामनेकरूपता पृथक्–पृथक् संराजते। भाषा सामान्यजनजीवनेषु प्रविश्य जीवति। भाषैव एतादृक् शक्तिमती या हि सम्पूर्णं संसारं एकसूत्रे समायोजयितुं समर्था। स्वभाषा भाषाविद् जनान् एकसूत्रे बध्नाति। तस्मात् भिन्नाः सन्तोऽपि जनाः एकतामनुभवन्ति। विश्व–भाषा विश्व–मानवान् एकस्मिन् सूत्रे संयोज्य विश्वबन्धुत्वभावनां प्रति नयति। उक्तमपि-अहं राष्ट्री संगमनी वसूनाम्।[७]

---

१. यजुर्वेदे ३४.१७
२. ऋग्वेदे १०.१२५.८
३. हरिवृषभटीका, वाक्यपदीयं ब्रह्मकाण्डे १२०
४. देवमनुष्य पुरुष ...... पा.अ. ५–४–५६
५. अम्बाकर्त्रीटीका, वाक्यपदीयं ब्रह्मकाण्डे १२०
६. ऋग्वेदे १०.१२५.३
७. ऋग्वेदे १०.१२५.३

शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी।
यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते।।[1]

वस्तुतः सभ्यतायाः संस्कृतेश्च आधारः भाषा एव अस्ति। वस्तुतः भाषामाश्रित्य एव मानवाः पशुतामपहाय मानवतायाः सोपाने आरूढाः अभवन्। मानवस्य सर्वविधप्रगतेराधारः भाषा एव अस्ति। भाषायां कर्तृत्वं धर्तृत्वं हर्तृत्वं च विद्यते। रचनात्मकं कार्यं विभिन्नाश्च योजनाः निर्वाचनादिकं शिक्षणं रक्षणं वैज्ञानिकं यात्रा व्यापारः चिकित्सादिकं प्रौद्योगिकं यत्किमपि कार्यं तत्सर्वं भाषया एव सम्पद्यते। भाषा एव समाजं दधाति यदि भाषा न अभविष्यत् तर्हि मानवसमाजस्य उन्नतिः न अभविष्यत्। यतोहि भाषा एव मानवानां तत्त्वं यस्मात् सर्वविधव्यवहारः प्रवर्त्तते। उक्तमपि **'तेन जीवन्ति प्रदिशश्चतस्त्रः'**[2] भाषायाः प्रभावात् चतस्त्रः दिशाः व्यवस्थिताः सन्ति।

भाषायाः प्रभावेणैव मानवाः ज्ञानविज्ञानवार्तानां संकलनं संरक्षणं च अकुर्वन्। पूर्वसंचितज्ञानम् अपि ग्रन्थरूपेण संरक्षितवन्तः। इदमेव न इण्टरनेटमाध्यमेन सर्वं सुलभं वर्त्तते। साम्प्रतं विश्वस्य विविधासु भाषासु कियन्तः ग्रन्थाः समुपलभ्यन्ते? यदि इमे ग्रन्थाः अधुना विद्यार्थिनां कृते सुलभाः न अभविष्यन् तर्हि विभिन्नेषु क्षेत्रेषु कथम् उन्नतिपथे आरूढाः अभविष्याम। अनेकेषां ग्रन्थानां साहित्यम् अमूल्यं महत्त्वपूर्णं च अस्ति। एषा ग्रन्थराशिः भाषायाः लिखितं सार्थकं स्थिररूपं च अस्ति। भाषायाः माध्यमेनैव अस्माकं पूर्वजाः विचारविमर्शं कृतवन्तः। उक्तमपि 'ऋतस्य धीतिं ब्रह्मणो मनीषाम्'[3] वाक्तत्त्वं ऋतं धारयति ब्रह्म विच्चास्ति। खण्डन-मण्डनपरम्परामनुसृत्य कस्यापि विषयस्य पूर्णं चिन्तनं कृतवन्तः। भाषां विना चिन्तनस्य प्रक्रिया अवरुद्धा भवति। अतः एतत् कथनं पूर्णतया सत्यमस्ति यत् सर्वाणि शास्त्राणि सम्पूर्णं साहित्यं च भाषया एव विकसितम्। इत्येव न 'जनं बिभ्रती बहुधा विवाचसम्'[4] इयं पृथिवी भाषाविद् जनान् अङ्के स्थापयति। मानवजीवने भाषायाः अद्वितीयं महत्त्वं वेदज्ञैः सम्यगनुभूय स्वीकृतं यत् 'सहस्राक्षरा भुवनस्य पंक्तिः'[5] इयं सृष्टिपरम्परा वाक्तत्त्वस्यैव सहस्राक्षराणि सन्ति।

ऋग्वेदस्य एकस्मिन् मन्त्रे भाषायाः विषदता सम्यक् प्रतिपादिता। इममेव मन्त्रम् आदाय भाषाविषये व्याकरणमहाभाष्यभूमिकायां व्याख्या विहिता।

चत्वारि शृंगा त्रयो अस्य पादाः द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महा देवो मर्त्या आविवेश।।[6]

१. वाक्यपदीयं ब्रह्मकाण्डे ११८
२. ऋग्वेदे १.१६४.४२
३. सामवेदे ५२५,८५९
४. अथर्ववेदे १२.१.४५
५. अथर्ववेदे २१.१०.२१
६. ऋग्वेदे ४.५८.३

अस्यायम् अभिप्रयो यत् एकः वृषभः उच्चैः स्वरेण किमपि भाषमाणः विलक्षणस्वरूपवान् अस्ति। अस्य वृषभस्य चत्वारिश्रृंगा त्रयो पादाः द्वे मस्तके सप्त हस्ताः च सन्ति। अयं त्रिधा त्रिषु स्थानेषु बद्धः अयं भाषते यत् महादेवः मर्त्यान् आविर्भूतः।[१] अनेन ज्ञायते श्लोकोऽयं एका प्रहेलिका अस्ति।

निरुक्तकारो यास्कः अस्य मन्त्रस्य याज्ञिकपरम्परानुसारं व्याख्यां कृतवान्। भाष्यकारः पतंजलिः व्याकरणपरम्परानुसारं व्याख्यां कृतवान्। उभावपि आदर्शभूतौ। यद्यपि पतंजलेः व्याख्या भाषायाः महत्त्वं प्रतिपादयति सर्वमान्या च अस्ति।

अत्र भाषा एव वृषभ इति रूपेण कथिता। उपमेयरूपेण भाषा उपमानरूपेण च वृषभः वर्णितः। आलंकारिकाणां कथनमस्ति यत् उपमानोपमेययोः यत्र पृथगुल्लेखः क्रियते तथा च भेदगर्भोल्लेखविधानं क्रियते तत्र उपमालंकारो भवति।[२]

भाषा वृषभ इव अस्ति। अस्मिन् वाक्ये उपमायाः प्रयोगः अभवत्। परं यत्र उपमाने च अभेदस्य आरोपो भवति तत्र रूपकालंकारो भवति। यथा– तद्रूपकम् अभेदो य उपमानोपमेययोः।[३] अनेन लक्षणेन सिद्ध्यति यत् रूपकालंकारेऽपि उपमानोपमेययोः पार्थक्येन निर्देशोऽपेक्षते। यद्यपि क्वचित् उपमेयस्य निर्देशो न विधीयते। केवलम् उपमानस्य एव निर्देशो विधीयते। तत्र धर्मम् आदाय उपमानेन उपमेयस्य ज्ञानं क्रियते। उपमेयस्य तिरोधानम् एव निगरणम् इति कथ्यते। अस्योदाहरणमस्ति– वापी क्वापि स्फुरति गगने। अत्र गगनं नायिकायाः कृशमध्यभागस्य उपमानं वापी च नाभिभागस्य उपमानम् अस्ति। आलंकारिकाः इत्थं जायमानम् आदेशमेव अध्यवसानम् इति नाम्ना व्यवहरन्ति। इत्थम् उक्तौ रूपकातिशयोक्ति अलंकारः भवति। लिखितम् अपि कुवलयानन्दे यत्–'रूपकातिशयोक्तिः स्यात् निगीर्याध्यवसानतः'[४] उपर्युक्तमन्त्रे उपमेयरूपायाः भाषायाः निर्देशनं विधाय उपमानरूपस्य वृषभस्य ग्रहणवशात् अत्र रूपकातिशयोक्तेः उदाहरणं स्वीकर्तुं शक्यते। वृषभश्च भाषायाः प्रतीकरूपेण स्वीकर्त्तव्यम्। **भाषावृषभयोस्तुलनायां हेतुः–**भाषाशब्दः स्त्रीलिंगे वृषभ शब्दश्च पुंल्लिंगे उभयोः समानधर्मता नास्ति तर्हि उपमायाः निष्पत्तिः कथम्? इति प्रश्ने समुदिते भाष्यकारेण वृषभशब्दस्य व्युत्पत्तिः एवं प्रदर्शिता–वृष् धातोः[५] वृषभशब्दस्य निष्पत्तिर्जायते। वर्षणात् वृषभः[६] अस्यायम् अभिप्रायो यत् वृषभः यत्र तिष्ठति तत्रैव वर्षति। लघुशङ्कां करोति। अतः तस्य वृषभः इति संज्ञा। अयं शब्दो योगरूढः अतः वृषभः अस्मिन्नेवार्थे प्रयुज्यते। भाषायाः सन्दर्भे वृषभ शब्दस्य यौगिकार्थः स्वीकर्त्तव्यः।

१. महाभाष्यपस्पश. पृ० ३०
२. साधर्म्यमुपमाभेदे काव्यप्रकाशदशमोल्लासे
३. काव्यप्रकाशदशमोल्लासे
४. कुवलयानन्दे
५. पा. धातुपाठ भ्वादि ४५३
६. महाभाष्यपस्पशाह्निकम् पृ० ३०

भाषा अपि वर्षति। साम्प्रतं वर्षाया: अर्थे लक्षणानुसारं व्यापकताया: दिग्दर्शनं भवति। अस्मिन्नर्थे वर्षाया: अर्थो भवति मानवानाम् इच्छापूर्ति। वक्ता स्वीयाम् इच्छां भाषाया: माध्यमेन यदा प्रकटयति तदा तस्य पूर्त्तिः भवति:। अभिव्यक्तय: हस्तसंचालनादि संकेतेन भवन्ति। यद्यपि संकेता: न्यूना: सन्ति। केवलं संकेतै: सम्पूर्णा: इच्छा: दु:साध्या। बहूनां सूक्ष्मतम विचाराणां भावानां च भाषां विना अन्येन केनापि साधनेन उपस्थापनम् असम्भवम्। भाषा तु अस्माकं सर्वेषां सर्वान् विचारान् भावान् च प्रकटयति। इत्थं साधनं जगतीतले अन्यत् किमपि नास्ति। अतएव सकलान् कामान् अभिवर्षतीति वृषभ:[१] इति व्युत्पत्तिम् अनुसृत्य भाषां वृषभ इति उच्यते। अथ च लौकिकवृषभेण उक्षेण वा तुलना विधीयते। अनेन प्रकारेण भाषावृषभयो: लिंगभेद: रूपकातिशयोक्ति अलंकारस्य निष्पत्तौ नास्ति काचन बाधा। चत्वारिश्रृंगा इत्यस्य तात्पर्यमस्ति यत् शब्दस्य चत्वारो भेदा: भवन्ति। ते च भाषारूपी वृषभस्य चत्वार: शृंगा: स्वीक्रियन्ते इमे शब्दभेदा: सन्ति। नाम-आख्यात-उपसर्ग-निपातभूताश्च। नामान्तर्गता: संज्ञा सर्वनाम विशेषणाश्च सुबन्तम्, आख्यात एव क्रिया सा च तिङन्तं भवति। अव्यया: एव निपाता: भवन्ति। उपसर्गा: लघुवर्गरूपेण प्रसिद्धिं गता: तेषां भेदा: परिगणिता: सन्ति। एतेषां पृथग्रूपेण परिगणनं महत्त्वं विदधाति यतोहि इमे निश्चितार्थस्य वाचका: एकाकिन: न भवन्ति परं यया क्रियया सह प्रयुज्यन्ते तस्या: क्रियाया: अर्थे परिवर्तनं परिवर्द्धनं च कुर्वन्ति। अस्यायं भावो यत् पाश्चात्य परम्परायां शब्दभेदा: अष्टौ भवन्ति।

तेषां उपर्युक्तेषु चतुर्षु अन्तर्भावो जायते। वस्तुत: आंग्लभाषायां व्याकरणस्य noun, pronoun, adjective एते सर्वे नामवर्गस्य अन्तर्गते आयान्ति। verb इति तु आख्यातपर्याय। preposition इत्यस्य कार्यं विभक्तिप्रत्ययेन विधीयते। अधिप्रभृति उपसर्ग निपाताश्चापि विभक्त्यर्थस्य प्रत्यायनं कुर्वन्ति। अत: संस्कृत भाषायां स्वतन्त्ररूपेण preposition इत्येतदर्थं पृथक् वर्गस्य कल्पनं न अपेक्षते। adverb, conjection, interjection इति निपातानां एव अवान्तरभेदा: सन्ति। आंग्लभाषायां उपसर्गसदृश: कश्चन अन्य: वर्ग: न कल्पित:। क्रियाया: विशेषार्थ-द्योतकोपसर्गार्थं आंग्लभाषायां preverb इति भेद: कल्पित:।

अनेन प्रकारेण पाश्चात्यपरम्पराया: अष्टौ शब्दभेदा: वैदिकपरम्पराया: चतुर्षु भेदेषु अन्तर्भूता: सन्ति। शब्दभेदानां अन्यामपि व्याख्यां पश्यन्तु। चत्वारिवाक्परिमिता पदानि अस्य मन्त्रस्य व्याख्यायां पतंजलिना उक्तं यत् चत्वारिश्रृंगाणि-चत्वारि पद जातानि नामाख्यातोपसर्गनिपाताश्च[२] अत्र चकारपदस्य किं तात्पर्यमस्ति? चकारस्तु समुच्चयार्थकरूपे प्रसिद्ध 'समुच्चयार्थकश्चकार: अन्यथा तत्र चकारोपादानं व्यर्थमेव स्यात्'।[३] अस्मिन् वाक्ये कस्य केन सह समुच्चयं प्रदर्शयति? नामाख्यातोपसर्ग निपाता: इति

१. महाभाष्यपस्पशाह्निके पृ० ३०
२. महाभाष्यपस्पशाह्निके पृ० ३०
३. महाभाष्यपस्पशाह्निके उद्योग पृ० ३१

पदं चतुष्पद द्वन्द्वोऽस्ति अत्र द्वन्द्वाभिहितचतुर्विधानां पदानां अन्येन सह समुच्चयः चकारात् प्रतीयते। अन्यथा अयं चकारः प्रकृतसन्दर्भे निरर्थकः स्यात्। अत्र नागेशभट्टेन अस्य वाक्यस्य व्याख्यानावसरे परा–पश्यन्ती–मध्यमा–वैखरीति[१] वाचः चत्वारो भेदाः प्रदर्शिताः। हरिणाप्युक्तम्–

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम्।।[२]

तत्र श्रोत्रविषया वैखरी। मध्यमा हृदयदेशस्था पदप्रत्यक्षानुपपत्या व्यवहारकारणम्। पश्यन्ती तु लोकव्यवहारातीता। योगिनां तु तत्रापि प्रकृतिप्रत्ययविभागावगतिरस्ति। परायां तु नेति 'त्रय्या' इत्युक्तम्[३]

स्वरूप ज्योतिरेवान्तः परा वागनपायिनी।
तस्यां दृष्टस्वरूपायामधिकारो निवर्त्तते।।[४]

इत्युक्तेः। अनेकतीर्थभेदायाः–नामाख्यातादिवीणावेणुमृदंगशब्दादिरूपानेकभेदायाः–आह खल्वपि–चत्वारिवाक्परिमिता पदानि इति।[५] एतेषामेव समुच्चयप्रदर्शनार्थं भाष्यकारेण पतंजलिना चकारः प्रयुक्तः। त्रयो अस्य इत्यत्र 'प्रकृत्यान्तःपादमव्यपरे'[६] इति सूत्रेण प्रकृतिभावात् 'एङः पदान्तादति'[७] इति सूत्रेण पूर्वरूपसन्धिर्न। त्रयो अस्य त्रयो पादाः इदमपि एकम् उदाहरणम्। भूतभविष्यद्वर्त्तमानकालाः एव वृषभस्य त्रयोपादाः सन्ति। द्वे शीर्षे। 'उत्तमांगं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्'[८] इति कोशादकारान्तः शीर्षशब्दः क्लीबेऽस्ति तस्येदं रूपम्। द्वे शीर्षे–द्वौ शब्दात्मानौ नित्यः कार्यश्च।[९]

वृषभस्य द्वे शीर्षे स्तः। शीर्षः=प्रधानः इति भाष्यकारेण प्रतिपादितम्। वस्तुतः भाषायाः प्रधानस्वरूपे द्वे स्तः। एको नित्यस्वरूपः अपरश्च अनित्यस्वरूपः 'व्यंग्यव्यंजकभेदेन'।[१०]

यो हि नित्यस्वरूपः सः उत्पत्ति विनाशरहितः स एव शब्दब्रह्म–

---

१. महाभाष्यपस्पशाह्निके पृ॰ ३०
२. वाक्यपदीयं ब्रह्मकाण्ड १४२
३. महाभाष्यपस्पशाह्निके उद्योत पृ॰ ३३
४. वाक्यपदीयं ब्रह्मकाण्डे १४२
५. महाभाष्यपस्पशाह्निके उद्योत पृ॰ ३३
६. पा॰अ॰ ६.१.११३
७. पा॰अ॰ ६.१.१०७
८. अमरकोशे मनुष्यवर्गः श्लोकसं॰ ९५
९. महाभाष्यपस्पशाह्निके पृ॰ ३०
१०. महाभाष्यपस्पशाह्निके प्रदीप पृ॰ ३१

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।[१]

ब्रह्मणो हि दशाद्वयी शास्त्रे प्रसिद्धा। एका विद्ययाऽप्रविभागदशाऽपरा चाविद्ययाप्रविभागदशा। तत्र यद्यपि प्रविभागदशायां ब्रह्मविविधविकल्पगोचरम्, तथाहि तस्यां दशायामेकस्यैव ब्रह्मणो धर्मधर्म्यादिरूपेण विकल्पः। जगद्रूपेण विवर्तावस्थायामपि ब्रह्म अनादिनिधनमेव। तच्च ब्रह्म शब्दतत्त्वं।[२]

तदेव वैयाकरणानां स्फोटः इति। स्फोटादेव अर्थज्ञानं भवति। स्फुटति प्रकाशते अर्थः अस्मात् इति स्फोटः।[३] स्फोटो नित्योऽनित्यस्वरूपश्च।

स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः।
ग्रहणोपाधिभेदेन वृत्तिभेदं प्रचक्षते।।[४]

इह नित्यत्वादात्मतत्त्वस्य स्फोटानां स्थितौ नास्ति कालपरिमाणवृत्तेः स्वल्पोपि व्यापारः। ध्वनिना तु संसृष्टं स्फोटस्य स्वरूपमुपलभ्यते यस्मात् तस्मात् ध्वनेः स्थितिकालः स्फोटोपलब्धिरूपः परिवर्तते। तेन च स्फोटविषयेण ग्रहणेनोपाधिनाभिन्नकालेन प्रकल्पितभेदाः स्फोटस्य द्रुतविलम्बिता वृत्तयस्त्रिभागोत्कर्षेण युक्ताः समाख्यायन्ते।[५] अयं ध्वन्यात्मको रूपः। ध्वनयः उत्पद्यन्ते यद् ध्वनेः उच्चारणं तदेव ध्वनेः उत्पत्तिः अनन्तरं च ध्वनेः विनाशः भवति।

शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदं तु वैकृताः।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते।।[६]

तद्यथा प्रकाशोजन्मान्तरमेव घटादीनां ग्रहणे हेतुः, अवतिष्ठमानस्तु ग्रहणप्रबन्धहेतुर्भवति, एवमभिव्यक्ते शब्दे ध्वनिरुत्तरकालमनुवर्तमानो बुद्ध्यनुवृत्तिं शब्दविषयां विषय(नाभि) व्यक्तिबलाधाना-दुपसंहरति। तस्मादुपलक्षितव्यतिरेकेण वैकृतेन ध्वनिना संसृज्यमानोपि स्फोटात्मा ताद्रूप्यस्यानध्यारोपात् शास्त्रे ह्रस्वादिवत् कालभेदव्यवहारं नावतरति।[७]

उत्पत्तिविनाशान्तराले ध्वनीनां क्षणिकसत्ता प्रत्यक्षं दृश्यते। अतः भाषायाः इदं ध्वन्यात्मकं स्वरूपम् अनित्यम् इति प्रामाणिकं तथ्यम्।

---

१. वाक्यपदीयं ब्रह्मकाण्डे १
२. वाक्यपदीयं ब्रह्मकाण्डे १
३. वैयाकरणभूषणसारस्फोटनिर्णयः
४. वाक्यपदीयं ब्रह्मकाण्ड ७६
५. वाक्यपदीयं ब्रह्मकाण्डे ७६
६. वाक्यपदीयं ब्रह्मकाण्डे ७७
७. वाक्यपदीयं ब्रह्मकाण्डे ७७

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते।।[१]

इह द्वौ शब्दात्मानौ-नित्यः कार्यश्च। तत्र कार्यो व्यावहारिकः पुरुषस्य वागात्मनः प्रतिबिम्बोपग्राही। नित्यस्तु सर्वव्यवहारयोनिःसंहृतक्रमः सर्वेषामन्तः संनिवेशी प्रभवो विकाराणामाश्रयः कर्मणामधिष्ठानं सुखदुःखयोः, सर्वत्राप्रतिहतकार्यशक्तिर्घटादिर्निरुद्ध इव प्रकाशः परिगृहीतभोगक्षेत्रावधिः, सर्वमूर्तीनामपरिणामा प्रकृतिः, सर्वप्रबाधरूपतया सर्वप्रभेदरूपतया च नित्यप्रवृत्तप्रत्यवभासस्वप्नप्रबोधानुकारी प्रवृत्तिनिवृत्तिपदाभ्यां पर्जन्यवद् दावाग्निवच्च प्रसवोच्छेदशक्तियुक्तः सर्वेश्वरः सर्वशक्तिर्महान् शब्दवृषभः, तस्मिन् खलु वाग्योगविदो विच्छिद्याहंकारग्रन्थीनत्यन्तविनिर्भागेण संसृज्यन्ते।[२] अनेन ज्ञायते यत् स्फोटो ध्वनिश्च भाषारूपवृषभस्य द्वे शीर्षे भवत इति तात्पर्यम्।

सप्त हस्तासो अस्य। हस्तास इति देवास इतिवत् छान्दसं रूपम्।[३] अयं हस्त शब्दस्य प्रथमा बहुवचनान्तरूपम्। अस्य वृषभस्य भुजा सप्त। हस्तरूपेण सप्त विभक्तीनामेव परिगणनं विहितम्। यतोहि संस्कृतभाषायाम् प्रथमातः सप्तमीपर्यन्तं सप्तविभक्तयः सन्ति। प्रति विभक्तौ त्रीणिवचनानि सन्ति। एवं पदानां संख्या एकविंशतिः भवति। इत्थं विभक्तयः सप्त कारकाणि च षड् इति सर्वैरेव स्वीक्रियते। विभक्तिकारकयोः मध्ये मौलिको भेदः अस्ति। अत्र तु विभक्तीनामेव यतोहि सप्त हस्तासो अस्य इति कथितम्। त्रिधा बद्धः-त्रिषु स्थाने बद्ध उरसि कण्ठे शिरसीति।[४] कण्ठ इत्यनेन मुखान्तर्गतकण्ठादिस्थानमुपलक्ष्यते।[५] यत् भाषारूपी वृषभः त्रिषु स्थलेषु निबद्धः अनेन ध्वनीनाम् उच्चारणप्रक्रिया वर्ण्यते। यदा वयं विचाराभिव्यक्तये वाक्यप्रयोगं कुर्मः तदा मनसि विचारव्यक्तये इच्छा जागर्ति। इयं प्रक्रिया पाणिनिना इत्थं प्रदर्शिता-

आत्मा बुद्ध्यासमेत्यर्थान्मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।।[६]

अस्यायम् अभिप्रायो यत् आत्मा स्वबुद्धिं प्रयोज्य विवक्षितार्थानां संकलनं करोति। ततः परं वयं विचारं कुर्मः यत् किं कथनीयम्। अस्माकं कथनीयं विषयः अर्थः वा भवति। तदा आत्मा मनः प्रबोधयति यद् अस्य अर्थस्य विषयस्य वा वाक्यानां माध्यमेन उपस्थापनं कुरु। आत्मनः प्रेरितो मनः क्रियावान् भूत्वा शरीरस्थं तेजम्/शक्तिम् प्रेरयति। अग्निना प्रेरितो शरीरस्थो वायुः क्रियावान् भवति।

---

१. वाक्यपदीयं ब्रह्मकाण्डे १३०
२. वाक्यपदीयं ब्रह्मकाण्डे १३०
३. महाभाष्य पस्पशाह्निकम् पृ० ३०
४. महाभाष्य पस्पशाह्निकम् पृ० ३०
५. महाभाष्य पस्पशाह्निकम् उद्योतः पृ० ३१
६. पाणिनीयशिक्षा ६

अनेनैव वायुना उच्चारणे क्रिया सम्पन्ना भवति। वायोः प्रथमः उद्‌गम स्थलम् उरः तत्पश्चात् वायुः कण्ठदेशम् आगच्छति। अतः कण्ठं द्वितीयस्थानम् अस्ति। कण्ठतः उपरितने भागे ताल्वादयः विभिन्नानि उच्चारणस्थानानि सन्ति। तानि वयं शिरस् इति कथयामः। इमामेव मूर्धा इति नाम्ना जानीमः। इदं तृतीयं स्थानम् अस्ति। एतेषु त्रिषु स्थलेषु वायोः गतिना ध्वनीनाम् उच्चारणं भवति। उक्तमपि–"त्रिषु स्थानेषु बद्धः उरसि कण्ठे शिरसि"।[१] अनेन प्रकारेण भाष्यकारेण प्रतिपादितम्। अयं वृषभः उच्चस्वरेण घोषणां करोति(रोरवीति)। यन्महादेवो मर्त्येषु अवतारं गृहीतवान्। मह्यते पूज्यते इति महः। कर्मणि घञर्थे कविधानमिति कः। महच्छब्दपर्यायोऽयं महशब्दोऽस्मादेव प्रामाण्यादित्यवधेयम्।[२] महान् परब्रह्मस्वरूपः देवोऽन्तर्यामिरूपः[३]परमात्मा। वैयाकरणानां दृष्ट्या शब्दब्रह्म एव परमतत्त्वम्। वयं तु मरणधर्माः साधारणमानवाः स्म। जातस्य हि ध्रुवो मृत्युः। इदं भस्मान्तं शरीरम्। इत्थं मर्त्येषु परमात्मावतारः प्रवेशो वा कथम्? पतंजलिना उक्तम् यत्– महान् देवः शब्दः। मर्त्या–मरणधर्माणो मनुष्यास्तानाविवेश "महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम्"।[४] तेषां मतम् अस्ति यत् व्याकरणाध्ययनं विधाय शब्दानां सुष्ठु प्रयोगेन परमात्मनः सामीप्यं प्राप्तुं योग्याः भवामः। किमिदं परमात्मनः साम्यम्? मानवेषु भाषामाध्यमेन दैवीशक्तेः विकासो जायते।

मानवजीवनं अल्प कालिकं विद्यते। तस्य शक्तयः निर्धारिताः सन्ति। तथापि भाषायाः माध्यमेन मानवस्य कियान् विकासः संजातः। साम्प्रतं विश्वस्मिन् अनेकाः सामान्याः प्रायोगिकाः वा विद्याः विकासं गताः। मानवेन अप्रत्याशितं ज्ञानं विज्ञानं च वृद्धिं प्रति नीयते। विद्वांसः निरन्तरं ज्ञानसाधनायां रताः। अनेन प्रकारेण मानवसंस्कृतेः भव्यनिर्माणं जायते। एतदेव दैवीशक्तेः विकासः अनुप्रवेशो वा। जन्मतः मानवः पशुरेव भवति। आहार-निद्रा-भय-मैथुनप्रभृतिगुणेषु मानवे पशौ च अभेदः।

उक्तमपि– आहारनिद्राभयमैथुनं च, सामान्यमेतत् पशुभिर्नराणां।[५] तथापि मानवसविधेः अमूल्या निधिरस्ति भाषा। मानवः प्रयत्नेन भाषाम् अर्जयति। अनया भाषया मानवः ज्ञानसागरम् अधिगच्छति। सः सभ्यो संस्कृतो भूत्वा जीवनम् आनन्दप्रदं प्रकल्प्य पशुत्वं च परित्यज्य देवत्वमार्गम् अधिगन्तुं समर्थो भवति। उक्तमपि पतंजलिना– एकः शब्दः सुज्ञातः सुष्ठुः प्रयुक्तः स्वर्गे लोके कामधुग्भवती' ति।[६] भाषा एव पशुत्वं अपनेतुं देवत्वं च प्रदातुं समर्थास्ति। अस्मिन् प्रसंगे आचार्यः दण्डी स्वीये काव्यादर्शे उक्तवान् यत्–

१. महाभाष्ये पस्पशाह्निक पृ० ३०
२. महाभाष्ये पस्पशाह्निके पृ० ३०
३. महाभाष्ये पस्पशाह्निके पृ० ३१
४. महाभाष्ये पस्पशाह्निके उद्योतः पृ० ३०-३१
५. पंचतन्त्रम्
६. महाभाष्ये पस्पशाह्निके पृ० २८

इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारान् न दीप्यते।।[१]

दण्डिना अत्रोक्तं यत् शब्दो (भाषा)ज्योतिः अखिलब्रह्माण्डे प्रकाशं वितरति। प्रकाशः=असंदिग्धज्ञानम्। प्रकाशाभावे पदार्थाः दृष्टिपथं न आयान्ति। अल्पप्रकाशे च पदार्थाः अस्पष्टाः संदिग्धा वा भवन्ति। वस्तुतः सूर्यस्य रश्मयः वाह्य तमसा अपाकरणं कुर्वन्ति परं आन्तरिक अज्ञानरूप तमसः अपाकरणं तु भाषा एव करिष्यति नान्यः। उक्तमपि महाकविदण्डिना–

इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते।।[२]

शिष्टानुशिष्टानाम् इत्यस्यायमभिप्रायो यत् पाणिनिप्रभृतिभिः शास्त्रकारैरन्वाख्यातानामित्यर्थः।[३] भाषायाः विद्वत्सम्मतं शास्त्रसम्मतं मानकस्वरूपं च। शिष्टानाम् अर्थात् भाषायाः मानकेतरस्वरूपम्। लोके मानकेतरस्वरूपस्य प्रयोगः प्रचुरं भवति। अस्मिन्नेव स्वरूपे क्षेत्रीयाः भाषा वाचश्च विद्यन्ते। अनेनैव भाषायाः स्वरूपेण प्रायो लोकव्यवहाराः सम्पाद्यन्ते। अनेन ज्ञायते यद् भाषया अस्माकं जीवनस्य सर्वे लोकव्यवहाराः सम्पूर्णतां यान्ति। अशिक्षिताः जना अपि भाषया एव लोककार्याणि सम्पादयितुं समर्थाः, नान्यथा। यद्यपि तेषां भाषा व्याकरणानुसारं न भवति। अनेनैव कारणेन भारतीयैः मनीषिभिः वाचः सरस्वती देवी अस्ति इति स्वीकृत्य तस्याः उपासनायाः विधानं विहितम्। **वाचमुपासस्व** भाषायाः देवी वस्तुतः सर्वाषां विद्यानां देवी अस्ति। अतः दण्डिना काव्यादर्शे मंगलाचरणे विद्यादेव्याः स्तुतिः कृता–

चतुर्मुख मुखाम्बोज वनहंसवधूर्मम।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती।।[४]

'गीर्वाग् वाणी सरस्वती'[५] इमानि वाङ्नामानि। वैज्ञानिकदृष्ट्या भाषाया महत्त्वं विज्ञाय एव तां देवीं मत्वा सर्वैरेव उपासना विहिता न तु अन्धविश्वासेन अथवा परम्परया। अनेन ज्ञायते यत् भाषा एव मानवानां जीवनं निर्वहति। इति धिया सिद्धान्तितं भाषातत्त्वम्।

---

१. काव्यादर्शः १.४
२. काव्यादर्शः
३. काव्यादर्शः
४. काव्यादर्शः
५. अमरकोश शब्दादि वर्ग श्लोक सं १

संस्कृतव्याकरणशिक्षणे नूतनाविष्करणानि

डॉ॰ के॰ भारतभूषणः

लोके मातृकापाठादेव अकारादीनां वर्णानां ज्ञाने सिद्धे सति किमर्थं माहेश्वरसूत्राणि? इति शङ्का जायते।

तत्र समाधानम्–वृत्तिसमवायार्थम् उपदेशः इति। अत्र वृत्तिः शास्त्रप्रवृत्तिः इत्यर्थः। समवायः = वर्णानाम् आनुपूर्व्येनण सन्निवेशः। लाघवेन शास्त्रप्रवृत्यर्थम् 'अइउण्', ऋलृक्, –इत्यादीनि चतुर्दशमाहेश्वरसूत्राणि पठितानि। यथा, 'इको यणचि'–इत्यादौ यथासंख्यमनुदेशः समानामिति वर्णानामानुपूर्व्ये सन्निवेश मात्रेणैव प्रवर्तते। किञ्च, सति समवाये हलन्त्यमिति सूत्रेण इत्–संज्ञा भवति। इत्संज्ञायां सत्यामेव 'आदिरन्त्येन सहेता'–इति प्रत्याहारसंज्ञा। किञ्च, कालादि दोषरहितानाम् वर्णानाम् उपदेशार्थमपि माहेश्वरसूत्राणि पठितानि। अनया रीत्या माहेश्वरसूत्राणां प्रयोजनं प्रतिपादयितुं शक्यते।

व्याक्रियन्ते शब्दाः अनेन इति व्युत्पत्या येन शास्त्रेण शब्दानां व्याक्रियाः प्रकृतिप्रत्यय विभाग प्रदर्शनं भवति तत् व्याकरणम्।

"ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकल्यं पाणिनीयकम्।।"

इति श्लोकानुसारं नवविधानि व्याकरणानि सन्ति। एतेषां सर्वेषां व्याकरणानाम् उद्देश्य तु एकमेव यत्–असाधुशब्देभ्यः पृथक्कृत्य साधुशब्दप्रतियादनम्। इदञ्च उद्देश्यं व्याकरणेनैव सफलं भवति। न तु अन्यथा।

यास्कप्रणीते निरूक्ते ग्रन्थे। (१/१७) प्रातिशाख्यानां विषये "पदप्रकृतीनि सर्वचरणानां पार्षदानि" (१-१-७) इत्युक्तं भगवता यास्केन। तद् व्याख्याने पार्षदशब्दस्य प्रातिशाख्यमित्यर्थो वर्णितः दुर्गाचार्यैः।

शाखां शाखां प्रति प्रतिशाखं, प्रतिशाखं भवम् = प्राति शाख्यम्, इति च व्युत्पत्तिः तत्र प्रादर्शि।

अर्थात् वेदे प्रधानशाखासम्बन्धिग्रन्थः प्रातिशाख्यमिति वक्तुं शक्यते।

वेदेषु स्वरस्यैव प्राधान्यम्। स्वरहीनमन्त्रप्रयोगेण पापफलमेवानुभूयते। सुस्वरयुक्तमन्त्रप्रयोगेण तु सत्फलं भवति। अतः वेदरक्षकत्वेन आश्रितेषु पद–क्रम–जटा–घनादिपाठेषु स्वरैव प्राधान्यम्। संहितापाठात् पदपाठविरचनं नाम मूलमन्त्रस्थानि पदानि पृथक्कृत्य प्रदर्शनम्। अस्यैव पदच्छेदः इत्यपि नाम। पदच्छेदे च मूलमन्त्रापेक्षया पदानां स्वरूपं विद्यते, यथा– 'अग्निमीले'– इत्यादिमन्त्रे अग्निं, 'ईले'– इति भवति। स्वरेऽपि तत्र भेदो दृश्यते। अनया रीत्या संहितापाठात्–पदक्रमादिपाठ–विभागे पदान्ते - पदादौ च वर्णे भेदो दृश्यते। संहितायां दीर्घान्तानि कानिचन पदानि पदपाठे तस्वान्तानि भवन्ति। तैत्तिरीयप्रातिशाख्येषु तृतीयाध्याये भेदोऽयं निरूप्यते। यथा– प्रस्था, इन्द्रिया, द्रविणा इत्यादीनि दीर्घान्तानि प्रस्थ, इन्द्रिय, द्रविण इति ह्रस्वान्तानि दृश्यन्ते। कुत्रचित् कानिचित्पदानि प्रकृतिभावं भजन्ते। अनया रीत्या स्वरसन्धिकार्यसंबन्धिविशेषाः प्रातिशाख्यग्रन्थादेव ज्ञायन्ते।

किञ्च, वर्णोच्चारणस्पष्टतायै तत्तद्वर्णोत्पत्तिस्थानप्रयत्नादयोऽपि प्रातिशाख्यग्रन्थेषु विवृण्वन्ते। अनया रीत्या प्रातिशाख्यग्रन्थानां प्रयोजनानि प्रतिपादयितुं शक्यते–

अल्पाक्षरमसन्दिग्धं सार वद्विश्वतो मुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः।।

इति सूत्रलक्षणं। इदं लक्षणं पाणिनिसूत्रेषु सर्वात्मना संगच्छते। लोके प्रयुज्यमानानां शब्दानां साधुत्व–असाधुत्वप्रतिपादनमेव सूत्राणां परमं प्रयोजनम्। सूत्रैः तत्तत्पदानां प्रक्रिया प्रदर्श्यते। स्वल्पाक्षरघटितैः सूत्रैः बहूनां शब्दानां प्रक्रिया प्रदर्शयितुं शक्यते। यथा– 'इको यणचि'– इत्यादिना सुध्युपास्यः इत्यादीनां सहस्राधिकानां लक्ष्यानां साधनं दृश्यते।

वार्तिकलक्षणम्–

उक्तानुक्तदुरूक्तानां चिन्ता यत्र प्रवर्तते।
तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञा मनीषिणः।।

इति वार्तिकलक्षणं। सूत्रकारैः उक्तानाम् अनुक्तानां दुरूक्तानां च सूत्राणां विषये विमर्शः क्रियते वार्तिकग्रन्थे। सूत्रकाराणां प्राचीनत्वात् तदनन्तरकाले प्रयुक्तानां शब्दानां विषये तैः अन्वातुमशक्यत्वात् वार्तिकग्रन्थानामुद्भवो जातः। 'संयोगान्तस्य लोपः'– इति पाणिनिसूत्रानुसारं यकारस्य लोपे प्राप्ते "यणः प्रतिषेधो वाच्यः"– इति वार्तिकेन सः निषिध्यते। तत्र "यथोत्तरं मुनीनां प्रामाण्यम्"–इति वचनानुसारं वार्तिककारमतमेव प्रबलं भवति। अनया रीत्या वार्तिकानामुपयोगः वर्णितुं शक्यते।

भाष्यरचनाया: उद्देश्यम्–

गच्छंतिकाले सूत्रार्थ:, वार्तिकार्थश्च सुलभतया न ज्ञात: जनै: तदा भगवता पतञ्जलिना महाभाष्यं प्रणीतम्। तत्र–

सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः इति हि भाष्यलक्षणम्।

यत्र पाणिने: सूत्राणाम् उपरि आक्षेपपूर्वकं वार्तिकानि प्रणीतानि प्राय: सर्वाण्यपि तानि वार्तिकानि प्रत्याख्यातानि भाष्यकारेण। अत एवोच्यते–सूत्रेष्वेवहि च तत् सर्वं, यवृत्तौ यञ्च वार्तिके–इति। क्वचित् क्वचित् सूत्राण्यपि प्रत्याख्यातानि पतञ्जलिना यथा– 'न धातुलोप आर्धधातुके'–इति। इतरशास्त्रापेक्षया व्याकरणशास्त्रे भाष्यस्य अत्यन्तं प्राशस्त्यम् अस्ति। सर्वशास्त्राणां सिद्धान्ता: एकत्र गर्भिता: भाष्ये। अत: एव इदं महाभाष्यमित्युच्यते।

वृत्तिरचनाया: उद्देश्यम्–

सूत्र, वार्तिकभाष्यग्रन्थै: यद्यपि शब्दानां प्रक्रिया प्रर्दश्यते तथापि तेभ्य: ग्रन्थेभ्य: सुलभतया प्रक्रिया ज्ञातुं न शक्या इति मत्या वृत्तिग्रन्थानाम् उत्पत्ति: बभूव।

भगवान् पाणिनि: "अष्टाध्यायी"– इति नाम्ना प्राय: ३९८७ व्याकरणसूत्राणि रचयामास। पाणिने: अष्टाध्यायीक्रममाश्रित्यैव जयादिव्यवामनाभ्यां काशिकावृत्तिग्रन्थ: प्रणीत:। किन्तु तस्या प्रणाल्या: आश्रयणे शब्दसाधुत्वप्रतिपादनाय महान् क्लेश: भवति। यथा– 'राम:'– इति शब्दरूपस्य साधने "**ससजुषोरु:**"–"खरवसानयो: विसर्जनीय:"–इत्यादीनां सूत्राणाम् आवश्यकता अस्ति। इमानि च सूत्राणि अष्टमाध्याये सन्ति। अत: **संपूर्णत: प्रथमं** आरभ्य सप्तानाम् अध्यायानाम् अध्ययनानन्तरमेव तत् ज्ञानं सम्भवति। तदर्थं महान् काल: अपेक्ष्यते। इदञ्च गौरवम्। अत: इमां पद्धतिं तिरस्कृत्य वेदाविना भट्टोजिदीक्षितेन कश्चन नूतन: पन्थान: समाश्रित: येन अल्पीयसा कालेन बहूनां शब्दानां प्रक्रिया सुलभा। इमां पद्धतिमाश्रित्य यत्र कुत्रचित् स्थितानि सूत्राण्यपि तत्तत्सम्बद्धानुसारेण एकत्र समाविशन्ति। तेन तदितरेषामध्यायानां तत्र प्रसक्ति: अनावश्यकी एवम्। अनेन च सुलभोपायेन 'राम:'– इत्यादीनां शब्दानां प्रक्रियाप्रदर्शनं नैव क्लेशाय भवति। अत: पाणिने: अष्टाध्यायीक्रमस्य त्यागे तु इदमेव तत्र बीजमिति वक्तुं शक्यते।

व्याख्यानस्य आवश्यकता–

लोके सर्वेऽपि मनुष्या: सर्वत्रापि विषयेषु लाघवमेव अपेक्षन्ते। गौरवं तु नैव सहन्ते। सद्वपि वृत्तिग्रन्थेषु तदर्थ: न सुलभ: आसीत् सर्वेषाम्। अत: तदुद्धारणेच्छाया व्याख्यानग्रन्था: उत्पन्ना:। अत्र **"पदच्छेद: पदार्थोक्ति विग्रहो वाक्ययोजना। आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम्"–**

इति व्याख्यानलक्षणम्– व्याकरणजगतिभट्टोजिदीक्षितनागेशभट्टप्रभृतिभिः, व्याख्याग्रन्थाः विलिखिताः यथा– प्रौढमनोरमा, लघुशब्देन्दुशेखरः इत्यादयः। एतेषां च ग्रन्थानाम् अत्यन्तं प्राशस्त्यम् अस्ति। व्याख्यानग्रन्थानाम् आवश्यकता अतीवास्तीत्यत्र नास्ति संशयलेशोऽपि।

व्याख्यानग्रन्थानां लेखनस्य अन्याभिप्रायमपि भवितुमर्हति यत् मूलग्रन्थे विद्यमानकठिनविषयानां सरलीकरणार्थमिति। कालक्रमानुगुणं, स्मृतिशक्त्यनुगुणञ्च मूलग्रन्थानां सार्थकज्ञाप्राप्त्यर्थञ्च व्याख्यानग्रन्थानामावश्यकता आसीत् विद्यते च। साम्प्रदायिकविषयाणां साम्प्रदायिकपद्धत्या पाठनं भारतदेशे सुप्रसिद्धं, परन्तु आधुनिकानां मतानुसारं, जनबाहुल्ये देशे स्वीयेच्छान्नुसारम् औपचारिक, अनौपचारिकरीत्या संस्कृतं पुनः संस्कृतव्याकरणज्ञानप्रात्यर्थं नूतनपद्धतयः अवश्यमेन पूरकरूपेण सन्ति। यद्यपि गुरुमुखान्प्राप्यमान ज्ञानस्य समानत्वं नैव भवति अथाऽपि अनौपचारिकरीत्या अधिगन्तुं नूतनाविष्करणानि अवश्यमेव उपकरोति। नूतनाविष्करणक्रमे भाषाशिक्षणे विशिष्य व्याकरणशिक्षणे अभिक्रमिताध्ययनम् संगणकसहकृतबोधनम्, अधिगन्तृनियन्त्रितबोधनम् अधिकतया उपकरोति।

अभिक्रमिताध्ययनं स्वकीयप्रयत्नैः स्वतः पठनेन यन्त्रसाहाय्येन वा ज्ञानं लब्धम् अवकाशं ददाति। इमां स्वतोध्ययनपद्धतिं ग्रन्थरूपेणाऽपि प्रकाशयितुं शक्यते यन्त्राऽरोपितरूपेणाऽपि भवितुमर्हति। सामान्यतया **कस्यचिद्विषयस्य** ज्ञानसम्पादनं यत्नदोषप्रणाल्या तदितरैः उपायैश्च भवति, परमभिक्रमिताध्ययने अधिकदोषाणां कृते अवकाशः न कल्प्यते, दोषान् विनाऽपि ज्ञानं सम्पादयितुं शक्यते इति अभिक्रमिताध्ययनं निरूपयति।

Programming is a process of arranging materials to be learned in a series of small steps designed to lead a student through self-instruction from what he knows to unknown of new and more complese knowledge and principles.

अद्यतनकाले अध्यापनम् अथ च विषयपरिज्ञानम् अधिकतया अध्यापककेन्द्रितं दृश्यते। परमभिक्रमिताध्ययनद्वारा छात्राः स्वयमेव एतत् पद्धत्या विरचितानां ग्रन्थानां पठनेन ज्ञानं लब्धुं शक्नुवन्ति।

अभिक्रमिताध्ययनं मनोविज्ञानाधारभूतं विज्ञानापुरस्सरं विद्यते। अभिक्रमिताध्ययने शिक्षणपद्धतेः पाठ्यक्रमभागाः क्रमेण प्रस्तूयन्ते। अतः अभिक्रमिताध्ययनं सुष्टुः निर्मितं तदा अधिगन्ता एकैकविषयपरिज्ञानं प्रापयति। विषयपरिज्ञानेन पठनस्य मूलभूतांशान् ज्ञातुमवकाशं कल्पयति। अभिक्रमिताध्ययनशिक्षणपद्धति-द्वारा छात्राः स्वयमेव स्वज्ञानानुसारम् अंशान् पठित्वा झटिति तस्य उत्तरं साधु वा असाधु वा इति निर्णयार्थं फलितांशस्यं तत्क्षणस्थिरीकरणं परिपुष्टिवद् भवति।

अभिक्रमिताध्ययनप्रकारे संपृक्तस्य अतीवदीर्घतमाविद्यमानस्य विषयस्य एकदैवप्रस्तुतीकरणस्थाने स्वल्पैः स्वल्पैः अंशैः विभज्य प्रस्तुतीकरणं भवति। साम्प्रदायिकाध्ययने छात्राणां क्रियाशीलप्रवृत्तिः

अधिकतया न दृश्यते। परमस्यां पद्धत्यां छात्राः अत्यन्तं क्रियाशीलाः भवन्ति। स्वल्पैः स्वल्पैः सोपानैः विरचितानां वाक्यानां पठनेन तदनन्तरं तत्र किं समाधानमिति उत्साहेन तल्लेखनेन च छात्रेषु क्रियाशीलप्रवृत्तिः अधिकतया सम्पाद्यते। बहुभिः उपायैः समन्वितानां सोपानयुक्तानां वाक्यानां पठनानन्तरम् ऊहितं समाधानं किं शुद्धम् अथवा अशुद्धमिति ज्ञातुमत्यन्तम् उत्सुकाः भवन्ति छात्राः। एतादृश छात्राभिप्रेरणस्य उपशमनार्थं शुद्धाऽशुद्धसूचकोपायाः अपि अभिक्रमिताध्ययने स्वीक्रियन्ते। तद् दृष्ट्वा तेन सह आत्मनः उत्तरं सन्तोल्य उत्तरे शुद्धे सति छात्राः अत्यन्तमानन्दमनुभवन्ति। प्रायशः शुद्धोत्तर-ऊहनायैव बहुविधानाम् PROMPTS आदीनामुपादेयानामपि भवति। एवं सन्तोषानुभवेन प्रेरिताः छात्राः पुनः पुनः अग्रिमवाक्यपठने प्रवृत्ताः भवन्ति। स्ववेगानुसारम् अन्तिमलक्ष्यसिद्धये (MASTARY LEARNING) अभिक्रमिताध्ययनमुपकरोति। परम्परागताध्ययनपद्धतौ छात्रपरीक्षणं केवलं सत्रान्त एव भवति। परीक्षणं यावत् न भवति तावत्छात्राणां स्थितिश्च ज्ञातुं न शक्यते। परमभिक्रमिताध्ययनेन छात्राणां प्रत्येकस्मिन् सोपाने परीक्षणं सम्भवति, सद्यः फलनिर्णयोऽपि भवति। कुत्र दोषाः आचरिताः इति च संतृप्तिज्ञानं लभते। एवं दोषपरिहारपूर्वकं ज्ञानं सम्पादयिकं शक्नुवन्ति।

संगणकस्य पुरतः यः उपविशति सैव सर्वदा श्रेष्ठः संगणकापेक्षया। [Man before the computer is important than the computer]. वैयक्तिकभेदानुगुणं विभिन्नकालानुगुणं संगणकसहकृत-बोधनेन शिक्षणं भवितुमर्हति। मृदुलोपागमे निर्दिष्टविषयस्य प्रस्तुतीकरणं अंशतः विभज्य क्रियते। तेन छात्राः स्वबुद्धिशक्त्यनुगुणं विषयावगमने प्रेरिताः भवन्ति। अमानुष्य स्मृतिशक्तियुक्तसंगणकेन वैयक्तिकशिक्षणं सामूहिकशिक्षणसमये अपि भवितुमर्हति। संगणकसहकृतबोधनेन ज्ञानस्य संरक्षणं, विकासः, प्रसारश्च भवितुमर्हति। स्वीयचिन्तनस्य यन्त्रे अवकाशः नास्ति अथाऽपि आदिष्टविषयस्य पुनः प्रदर्शने मनुष्यापेक्षया यन्त्रस्य विशेषत्वम् अनुभूयते। प्राथमिकव्यवहाराधारेण

(Entering Behaviour)

अनुकूलादेशानां चयनं कर्तव्यम्। प्राथमिकव्यवहारेण संगणकं स्वयं निर्णयं स्वीकरोति। अतः विद्युत् मस्तिष्कमित्यपि व्यवहरन्ति। प्रदर्शनपत्रस्थाने संगणकस्य उपयोगः भवति। क्रमिकपद्धत्या, ताक्रिकक्रमेण अनुदेशनरूपेण विषयप्रस्तुतीकरणं क्रियते। अधिगन्तृनियन्त्रिता नुदेशनप्रत्ययस्यार्थः अनुदेशने सम्पूर्णतया छात्राणामेव स्थानं देयमिति। सामान्यतया अनुदेशने छात्राणामन्तः क्रिया अधिकतया न दीयते। अनुदेशनेन कृत उत्पत्तिक्रमः तथा छात्रद्वारा कृत उत्पत्तिक्रमे समानतत्त्वानां सम्मेलनमावश्यकम्। अप्रत्यक्षरूपेण छात्राणाऽमनुक्रियाऽधारेण पाठ्यक्रमाणां क्रमान्वेषणं भवितुमर्हति। अधिगन्तृ नियन्त्रित अनुदेशने प्रतिक्रियायाः वातावरणस्य उत्पत्तिः भवति। छात्राः अधिगमक्रमं निश्चतुं न शक्नुवन्ति, अपितु छात्राणाम् अनुक्रिया तथा प्रश्नकरणक्रममाऽधारेण अधिगमक्रमस्य सम्बन्धे निर्णयः भवितुमर्हति। एवं प्रकारेण अधिगमक्रमाणां प्रयोगेन छात्राणामनुक्रियाणां तथा अन्तिमपरीक्षायाः शुद्धोत्तरमाधारेण अधिगमक्रमस्य पुष्टिः स्वीक्रियते।

अधिगमक्रमस्य ज्ञापने पाठ्यवस्तुसम्बन्धप्रश्नान् खण्डशः पृथक्कृत्वा पुनः निर्दिष्टक्रमेण लिखितरूपेण दीयते एवं छात्राणाम् उत्तरदाने आदेशोऽपि दीयते। यदि छात्राः उचित अनुक्रियाः निर्दिष्टतार्किकक्रमेण कुर्वन्ति चेत् अधिगमक्रमस्य पुष्टिः भवति। यदि छात्राणां कतिपयप्रश्नानामुत्तरं सकारात्मकम् एवं कतिपयप्रश्नानामुत्तरं नकारात्मकं भवन्ति तर्हि अभिक्रमितप्रश्नक्रमान् पुनर्व्यवस्थापनेन छात्राणामुपरि परीक्षणं क्रियते। यदि निर्दिष्टप्रश्नक्रमेण उचितानुक्रिया भवति, तर्हि तदैव क्रमः अधिगमक्रमेण प्रयोगे स्वीक्रियते।

इत्थं परिवर्तमानजगति विभिन्नरूचियुक्तबुद्धियुक्तछात्राणां संस्कृतव्याकरणशिक्षणं आङ्गलभाषा व्याकरणशिक्षणस्य समानरूपेण भवितुमर्हति।

उत्सर्गापवादयोः शब्दशास्त्रीयविमर्शः

श्रीसंजीतकुमारझा

शब्दशास्त्रं यद्यपि स्फोटप्रधानं भवति तथापि व्यवहार-निर्वाहाय प्रकृतिप्रत्ययकल्पना-परकत्वञ्जायते ह्यस्य। अत्र शास्त्रे यद्यपि शब्दः स्फोटात्मको नित्यो ध्वनिरूपरूषितो वर्णपदादिस्पैर-भिव्यज्यते तथापि तत्र मुख्यता तु वाक्यस्यैव भवति। तच्च वाक्यमखण्डमित्यत्रैव विदुषां तात्पर्यम्। तद्वाक्यं याथार्थ्यरन्पेणावबोद्धुं शाब्दिकी प्रक्रियाऽऽनिवार्या भवतीति कृत्वा वाक्येषु पदानि, पदेषु च तदवयवाः वर्णाः कल्प्यन्ते। एवं रीत्या प्रकृतिप्रत्ययविभागः तत्तदर्थविभागश्च सर्वः कल्पित एव भवति। तत्रैव प्रक्रियां सम्पाद्य **असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते** इत्याद्यभियुक्तेः वाक्यानां तत्त्वावबोधो जायते।

तत्र पदसाधुत्वावसरे विभिन्नाः प्रतिपत्तयो भवन्ति। यथा– 'वृक्षेभ्यः' इति रूपसाधनावसरे 'वृक्ष+भ्यस्' इत्यवस्थायां 'सुपि च'[१] इति दीर्घस्तथा 'बहुवचने झल्येत्'[२] इति सूत्रेणैत्वञ्च प्राप्नुतः। तत्रोभाभ्यामुभयेन भाव्यमन्यतरेण वा? अन्यतरेण चेदपरं प्रबाध्य उत सहैव वा तेन? इत्यादयो भवन्ति जिज्ञासाः। तत्र न तावादाद्यः पक्षः साधु, उभयोः शास्त्रयोः प्रवृत्तौ वाञ्छितरूपस्यैवासिद्धिः स्यात्। अन्यतरेणापि नापरेण सह शक्यते कार्यं कर्तुम्। तथा सति पूर्वविकल्पदोषस्यैवापत्तिः स्यात्। येनाचार्याणामप्रामाण्यापत्तिः प्रसज्येत। तस्मादपरं सूत्रं प्रबाध्य प्रवर्ततेऽपरमित्येव तावच्छाब्दिकानाम् भवति व्यवस्था। सैवात्रोत्सर्गापवादरूपेण व्यवह्रिते। भगवता भाष्यकारेणापि कथं तर्हि इमे शब्दाः प्रत्तिपत्तव्याः[३]? किञ्चित्सामान्यविशेषवल्लक्षणं प्रवर्तितव्यम्, कश्चिदुत्सर्गः कर्तव्यः, कश्चिदपवादः, सामान्येनोत्सर्गः कर्तव्यः तद्विशेषेणापवाद इत्यादिरूपेण पक्षस्यास्य समर्थनं विहितम्।

---

१. पा. सू. – ७/३/१०२

२. पा. सू. – ७/३/१०३

३. महाभाष्यम्, पश्पशाह्निकम्

व्यापकधर्मावच्छिन्नोद्देश्यताकं शास्त्रमुत्सर्गशास्त्रम्, अथ च व्याप्यधर्मावच्छिन्नोद्देश्यताकं शास्त्रमपवादशास्त्रमिति शाब्दिकानां सामान्यं मतम्। तत्रापवादशास्त्रंप्रस्फोटयितुं नागेशेनोक्तम्–

'येन नाप्राप्ते यो विधिराभ्यते स तस्य बाधको भवति[1]**'** इति। तत्र नञ्द्वयस्य प्रकृतार्थदार्ढ्यबोधकत्वात् यत्कर्तृकावश्यप्राप्तौ यो विधिरारभ्यते स तस्य बाधको भवति' इति। अस्य च परिष्कृतो ऽर्थः इत्थं भवति – 'विशेषशास्त्रीयोद्देश्यो यो विशेषधर्मावच्छिन्नस्तद्वृत्तिर्यः सामान्यधर्मस्तदवाच्छिन्नोद्देश्यताकशास्त्रस्य विशेषधर्मावच्छिन्नोद्देश्यताकशास्त्रेण बाधो भवति' इति। अत्र सामान्यो नाम व्यापकधर्मः, विशेषधर्मो नाम व्याप्यधर्मः। यथा 'हो ढ़ः'[2] इति सूत्रस्य पदान्ते झलि च परे हस्य दत्वविधायकस्य 'दादेधातोर्घः'[3] इति सूत्रेण बाधो भवति। तथाप्यत्र धात्वहकारत्वावच्छिन्ने दत्वविधयाकं 'हो ढ' इति सूत्रम्, दादिधात्वयवहकारत्वावच्छिन्न एव प्रवृत्तिमता 'दादेधातोर्घः' सूत्रेण बाध्यते। यत्र दादेर्धातोरिति सूत्रस्य प्राप्तिरस्ति तत्र सर्वत्र 'हो ढः' इत्यस्य बाधो भवति तथैव वृक्षेभ्यः इत्यत्रापि 'बहुवचने झल्येत्' इति विशेषशास्त्रोद्देश्यताकं विशेषधर्मावच्छिन्नं झलादिबहुवचना-व्यवहितपूर्वत्वविशिष्टादन्ताङ्गत्वं यत्र यत्र वर्तते तत्र सर्वत्र यञादिसुप्यवहितपूर्वत्वविशिष्टादन्ताङ्गत्वरूपं 'सुपि च' इति सामान्यशास्त्रीयोद्देश्यतावच्छेदकं वर्तत एव। तच्च यञादिसुप्यव्यवहितपूर्वत्व-विशिष्टादन्ताङ्गत्वरूपः सामान्यधर्मः विशेषशास्त्रोद्देश्यं विशेषधर्मावच्छिन्नवृत्तिधर्मः व्यापकतावच्छेदको भवतीति व्यापकतावच्छिन्नोद्देश्येताकस्य 'सुपि च' इति शास्त्रस्य व्याप्यतावच्छेदकोद्देश्यताकशास्त्रेण 'बहुवचने झल्येत्' इत्यनेन बाधो भवति।

प्रसङ्गेऽस्मिन् परिभाषेन्दुशेखरे परिभाषात्रयमवतार्यन्ते–१. 'पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः[4] इति, २. प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते[5] इति। ३. उपसञ्जनिष्यमाण-निमित्तोऽप्यवाद उपसञ्जातनिमित्तमप्युत्सर्ग बाधते[6] इति च। तत्र लक्षणमेवैकं चक्षुः निमित्तं येषामेता-दृशाः लक्षणैकचक्षुष्काः मादृशाः जना अपवादविषयं पर्यालोच्य तद्विषयत्वाभावनिश्चये उत्सर्गेण तत्तत्लक्ष्यं संस्करोति। अन्यथा विकल्पापत्तिः पर्यायतापत्तिर्वा प्रसज्येत। विकल्पस्तु पूर्वमुत्सर्गशास्त्रप्रवृत्तौ अपवादशास्त्रप्रवृत्तेर्दुर्घटत्वात्तत्र न संभवतीति तात्याशास्त्रिणां मतम्।

लक्ष्यमेवेकं चक्षुः येषां तादृशाः लक्ष्यैकचक्षुष्काः लक्षणज्ञानमन्तरापि येषां लक्ष्यसाधुत्वपरिज्ञानं ते इत्यर्थः। यतस्ते लक्ष्यैकचक्षुष्काः अतश्शास्त्रपर्यालोचनं विनापि अपवादविषयं परित्यज्यैवोत्सर्गस्योपप्लवं

१. परिभाषा – ५८
२. पा. सू. – ८/२/३१
३. पा. सू. – ८/२/३२
४. परिभाषा सं. – ६३
५. परिभाषा सं. – ६४
६. परिभाषा सं. – ६५

कृत्वा तेन लक्ष्यं संस्कुर्वन्ति। ते 'श्रीशः' इत्यत्र दीर्घमेव सदा पश्यन्ति अतस्तद्विषयकं यण्शास्त्रं न कल्पयन्ति। इत्थमपवादविषयकं 'श्रीशः' इत्यादिकं परित्यज्योपप्लुतेनोत्सर्गेण 'इको यणाचि'[१] इत्यादिना 'सुध्युपास्य' इत्यादिलक्ष्यं संस्कुर्वन्ति।

अत्रोच्यते– यदि लक्षणज्ञानमन्तरापि तेषां साधुलक्ष्यज्ञानं भवत्येव तर्हि किं प्रयोजनं प्रक्रियास्मरणस्य? इत्यत्र 'तस्यापि प्रक्रियास्मरणपूर्वकप्रयोग एव धर्मोत्पत्तेः' इति नागेशवचनमेव भवति समाधानम्। तत्र प्रमाणञ्च–'एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति' इति श्रुतिरेव। प्रकलय चापवादविषयं तत उत्सर्गोऽभिनिविशते[२] इत्यत्र 'तत' इत्यस्य 'अपवादशास्त्रपर्यालोचनात्प्रागपीत्यर्थो भवति, प्रकल्प्येत्यस्य परित्यज्येत्यर्थश्च। अत एव प्रातिपदिकार्थसूत्रे भाष्ये– इदं द्वयमप्युक्त्वा न कदाचित्तावदुत्सर्गो भवत्यपवादं तावत्प्रतीक्षत इत्यर्थकमुक्तं भगवता भाष्यकारेण।

एतन्मूलकमेव नवीनाः – 'उपसञ्जनिष्यमाण–'[३] इत्यादिपरिभाषां पठन्ति। उत्सर्गशास्त्रप्रवृत्यभावसम्भावनाप्रयोज्या यत्रापवादप्रवृत्तिसम्भावना, तत्र पूर्वमुत्सर्गो न प्रवर्तत इत्यर्थः। अनेन च न्यायेन भविष्यदपवादविषयातिरिक्तत्वेनोत्सर्गशास्त्रे सङ्कोचो भवति। तेन 'दधति' इत्यत्र 'दधा+झि' इत्यवस्थायां समुत्पन्ननिमित्तमप्युत्सर्गं 'झोऽन्तः'[४] इति शास्त्रं भाविनिमित्तकेनापि "अदभ्यस्तात्"[५] इत्यपवादेन बाध्यते।

तत्रापवादस्य बाधकत्वे 'तदप्राप्तियोग्येऽचारितार्थ ह्येतस्य बाधकत्वे बीजम्' इति परिभाषेन्दुशेखरकारोक्तिं व्याचक्षाणैष्टीकाकारैः चत्वारि बाधबीजानि उपन्यस्यन्ते। तथाहि–१. तदप्राप्तियोग्येऽचारितार्थ्यम्, २. तदप्राप्तियोग्येऽचारितार्थ्ये सति कृते चारितार्थ्यम् ३. तदप्राप्तियोग्येऽचारितार्थ्ये सति कृतेऽचारितार्थ्यम्, एवं ४. तदप्राप्तियोग्येऽचारितार्थ्ये सति अपवादशास्त्रप्रवृत्त्युत्तरमपवादशास्त्रप्रणयनवैयर्थ्यसम्भावना चेति। तत्र क्रमशः 'हे रमे' 'सर्वेषाम्' 'रमायाम्' 'कुलम्' इत्याद्युदाहरणानि चतुर्ण्णां भवति। तत्र बाध्यबाधकभावस्य विस्तारः शेखरग्रन्थस्य टीकादौ बहुशः समुपलभ्यते इति कृत्वाऽत्र केवलमुत्सर्गापवादयोः विवेचनं शब्दशास्त्रीयदिशा विहितम्।

---

१. पा. सू. – ६/१/७७
२. परिभाषा सं. – ६४
३. उपसञ्जनिष्यमाणनिमितोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधते। (प.सं. ६५)
४. पा. सू. – ७/१/३
५. पा. सू. – ७/१/४

मानवजीवने वास्तुशास्त्रस्योपयोगिता

डॉ॰ दिवाकरदत्तशर्मा

मानवजीवने वेदवेदाङ्गोपाङ्गानां महत्त्वपूर्णं स्थानमस्ति। तत्र वैदिकसाहित्ये प्रतिपादितमस्ति यत् "इष्टप्राप्तयेऽनिष्टपरिहाराय लौकिकं चालौकिकमुपायं वेदयति यो शब्दराशिः स वेदः।" ज्योतिषशास्त्रं वेदस्य चक्षुस्वरूपमङ्गं वर्तते। ज्योतिषशास्त्रेऽपि त्रयः स्कन्धाः सन्ति। सिद्धान्तस्कन्धः, होरास्कन्धः, संहितास्कन्धश्चेति। सिद्धान्तस्कन्धे गणितीयसिद्धान्तानां सोपपत्तिकं विवेचनं भवति। तदाधारो होरास्कन्धे मानवजीवने घटितघटनानां व्यष्टिरूपेण विचारः क्रियते। संहितास्कन्धे च समष्टिगतरूपेण भूगर्भविज्ञान-वनस्पतिविज्ञान-वृष्टिविज्ञान-मुहूर्त्तविज्ञान-वास्तुविज्ञानादिविषयाणां विस्तृतरूपेण विवेचनं क्रियते यथा हि वेदाङ्गस्वरूपज्योतिश्शास्त्रस्य मानवजीवने सम्पूर्णघटनानां विचारणे महत्त्वपूर्णं स्थानमस्ति तथैव वास्तुशास्त्रस्यापि महदुपयोगित्वं वर्तते।

सृष्ट्यादित एव न केवलं मनुष्यैरेवापित्वन्यैरपि जीवजन्तुभिः नानाविधसुविधार्थमात्म-सुरक्षार्थञ्चावासस्यावश्यकताऽनुभूता। अनेनैव हेतुना जलचराः समुद्रतडागादिषु, खगाः वृक्षकोटरेषु नीडेषु वा, वनचराः गुहासु गहनवनेषु चात्मरक्षाऽनुरूपमावासमन्वेषयन्ति। यदा वन्यजीवा स्वरक्षार्थमावासीयव्यवस्थां कर्तुं शक्नुवन्ति तदा मनुष्यः य एकः सभ्यः शिष्टश्च जीवो वर्तते स कथं स्वकीयरक्षार्थमभ्युदयार्थञ्चावासं नान्वेषयेत्। अत एव विश्वकर्मप्रभृतिभिः वास्तुविद्भिः शीतोष्णवर्षादिभिः मनुष्याणां रक्षणार्थं गृहनिर्माणं निर्दिष्टम्, यथोक्तं बृहद्वास्तुमालायाम्–

स्त्रीपुत्रादिकभोगसौख्यजननं धर्म्मार्थकामप्रदम्
जन्तूनामयनं सुखास्पदमिदं शीताम्बुघर्मापहम्।
वापीदेवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते
गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः।।[१]

तृणनिर्मित-गृहे कोटिघ्नं, मृण्मये दशकोटिघ्नं, ऐष्टिके शतकोटिघ्नं शैलनिर्मिते च गृहेऽनन्तं फलं प्रतिपादितम्। यथा–

---

१. बृ. वा. मा. गृहारम्भविधिः- श्लो॰-४

कोटिघ्नं तृणजे पुण्यं मृण्मये दशसङ्गुणम्।
ऐष्टिके शतकोटिघ्नं शैलेऽनन्तं फलं गृहे।।[१]

अखिलं पुण्यं गेहादेव समुत्पद्यते। किन्तु ये जनाः परगृहेषु निवसन्ति, तैः यानि पुण्यकर्माणि क्रियन्ते तेषां फलं तेभ्यः निष्फलमेव। यतोहि तैः कृतपुण्यकर्मणां फलं भूस्वामिनमेव मिलति। यथोक्तम्–

परगेहकृताः सर्वाः श्रौतस्मार्तक्रियाः शुभाः।
निष्फलाः स्युर्यतस्तासां भूमीशः फलमश्नुते।।[२]

अस्मिन् धर्मप्राणराष्ट्रे भारतवर्षे वास्तुशास्त्रस्य चिन्तनं वैदिकालादेव प्रचलितमस्ति। अथर्ववेदोपवेदे स्थापत्यवेदेऽस्य शास्त्रस्य सिद्धान्ताः सिद्धन्तिताः सन्ति। मत्स्यपुराणे प्रतिपादितमस्ति यत् भृगुरादय अष्टादशाचार्या अस्य शास्त्रस्य प्रवर्तका आसन्। यथा–

भृगुरत्रिर्वसिष्ठश्च विश्वकर्मामयस्तथा
नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः।
ब्रह्माकुमारो नन्दीशः शौनको गर्ग एव च
वासुदेवोऽनिरुद्धश्च तथा शुक्रवृहस्पती।।[३]

एवं स्थापत्यवेदादारभ्य अद्यावधि अस्यशास्त्रस्य परिवर्धितस्वरूपः वास्तुग्रन्थेषु प्राप्यते। ग्रन्थेष्वेषु भारतीयदार्शनिकपृष्ठभूमिकायां पञ्चमहाभूतानां समन्वयस्य गुरुत्वशक्तेश्चुम्बकीयशक्तेः सौरोर्जायाश्चेति त्रिविधशक्तीनां प्रबन्धनस्य सिद्धान्ताः विशरूपेण प्रतिपादिताः सन्ति। पूर्वाचार्यैरुपर्युक्त-सिद्धान्तानामाधारेणास्य शास्त्रस्य विस्तारस्तथा कृतः येन मनुष्यः स्वकीयभवने जीवनोपयोगिनीमावश्य-कतानामुपयोगः स्वेच्छया कर्तुं शक्नुयात्। तत्र वास्तुशब्दस्य कोऽर्थः इत्यत्र–

वस्तुर्वसतेर्निवासकर्मणः।

यास्कमुनेरस्य निर्वचनेन वास्तुशब्दस्य निष्पत्तिः सञ्जायते। अस्याशयोऽस्ति यद् प्राणिनो यस्मिन् निवसन्ति, प्राणिनां निवासयोग्यो वा भूखण्डो वास्तुशब्देन व्यवह्रियते। वेदे वास्तु शब्दस्य प्रयोगः वास्तुः वास्तोष्पतिः शाला इति नामभिः कृतः। वासयोग्यः वास्तु एतस्य पाता पालयिता वा वास्तोष्पतिः।

---

१. बृ. वा. मा. गृहारम्भविधिः– श्लो॰–५
२. बृ. वा. मा. गृहारम्भविधिः– श्लो॰–६
३. मत्स्य पु–अ–२५३ श्लो॰–३

"शालाभवनमिष्यते"

इत्यमरोक्त्या शाला नाम भवनम्। अथर्ववेदे विधिसम्मतं वास्तुनिर्माणं सौभाग्यश्रीरैश्वर्यसमृद्धि-वंशवृद्धिकरञ्च प्रतिपादितम्। यथा-

इहैव ध्रुवां प्रतितिष्ठ शालेऽश्वावती गोमती सुनृतावती।
ऊर्जस्वती घृतवती पयस्वत्युच्छ्रयस्व महते सौभगाय।।
सर्वसमृद्धिदो वास्तुः वंशवृद्धिकरः पालकः पोषकश्च भवति।[1]

उपर्युक्तफलं तदैव लभ्यते यदि गृहनिर्माणं वास्तुशास्त्रसम्मतं भवेत्। यतो हि भूप्राणिनोः मध्ये समत्वमिदमस्ति यत् द्वयोरुत्पत्तिः पञ्चमहाभूतैः सञ्जाता। एभिस्तत्त्वैरेव जीवनं सम्भवति। प्रकृतिप्रदत्तेष्वेषु तत्त्वेषु कस्याप्येकस्याभावश्चेत्तर्हि धरित्र्यां जीवनस्य कल्पना न कर्तुं शक्यते। अत्र प्रश्नोऽयं समुदेति यत् मानवः स्वाभ्युदयाय संतुष्टये च स्वकीयवास्तुभवने भूमिजलतेजवाय्वाकाश-तत्त्वानामुपयोगः सम्यक् तया कथं कुर्यात् येन तत्रस्थ जनानां जीवनं स्वस्थं सुविधापूर्णं सुरक्षायुक्तञ्च भवेत्। वस्तुतोऽयमेवास्य शास्त्रस्य प्रतिपादनीयः विषयः। अस्माकमावासे सर्वविध-सुविधासुरक्षाऽर्जनाय मुख्यतया भूमिरापोतेजोवायुश्चैतेषां चतुर्विधतत्त्वानामुपयोगः क्रियते। चत्तुर्णां तत्त्वानामुपयोगेनाकाशतत्त्वं स्वकार्यं स्वयमेव करोति। एवं वास्तुशास्त्रानुसारेण पञ्चमहाभूतानां विधिवदुपयोगेन निर्मिते भवने पञ्च भौतिकदेहिनां सामर्थ्यवर्धनं कर्तुं शक्यते।

पृथ्वीतत्त्वम्- प्राणिमात्रस्य शरीरम् पञ्चमहाभूतैर्विनिर्मितम् एषु 'भू' तत्त्वं सर्वाधिकं वर्तते। भूतत्त्वानन्तरं जलतेजवाय्वाकाशतत्त्वानां मात्रा उत्तरोत्तरा न्यूना भवति। संयोगवशादस्माकमावासेऽपि सर्वाधिका मात्रा भूतत्त्वस्य जलादितत्त्वानाञ्च मात्रोत्तरोत्तरा न्यूना भवति। वस्तुतः इयं भूमिः अस्माकं जीवनस्याहारविहारविश्रामादीनां सर्वासां गतिविधीनां मुख्याधारा वर्तते। पृथ्वीं विना आवासस्य जीवनस्य च कल्पना न कर्तुं शक्यते। पृथिव्याः विशेषतेयं वर्तते यदियं गुरुत्वशक्तेश्चुम्बकीयशक्तेश्च केन्द्रमस्ति। धरित्र्या इमे शक्ती षष्ट्यधिकचतुश्शतकोटिवर्षैः स्वकक्षायां सततरूपेण स्वाक्षभ्रमणेन लब्धे। यदि भूमौ गुरुत्वशक्तिः चुम्बकीयशक्तिश्च न भवेत्तदा भवननिर्माणमसम्भवम्। वस्तुतः सम्पूर्णब्रह्माण्डमेकं चुम्बकीयक्षेत्रमस्ति। ब्रह्माण्डस्य सर्वेऽपि ग्रहनक्षत्रतारादयः चुम्बकीयतरंगैः पारस्परिकरूपेण आबद्धाः सन्ति। इयं प्रकृतिः स्वकीयशक्त्या समग्रब्रह्माण्डस्य सञ्चालनं नियन्त्रणञ्च करोति। पृथिव्या स्वाक्षोपरि सततभ्रमणेन स्वीया चुम्बकीया शक्तिः विकसिता।

चुम्बकस्य द्वौ ध्रुवौ भवतः। उतरध्रुवः दक्षिणध्रुवश्च। तथैव धरित्र्याः दक्षिणोत्तरभेदेन द्वौ ध्रुवौ भवतः। इदं सर्वविदितं तथ्यमस्ति यत् द्वयोः चुम्बकयोः विजातीयध्रुवयोराकर्षणं सजातीयध्रुवयोर्विकर्षणञ्च

१. **(अथर्ववेदे ३-१२-७)**

भवति। चुम्बकस्याकर्षणविकर्षणाभ्यां यदा सम्पूर्णे ब्रह्माण्डे सर्वाः गतिविधयः प्रचलन्ति तदाऽस्माकं जीवनस्य सर्वाऽपि गतिविधयः कथं न प्रचलिष्यन्ति? यथा भुवः द्वौ ध्रुवौ तथैवास्माकं शरीरेऽपि द्वौ ध्रुवौ भवतः। शिरप्रदेशे उत्तरध्रुवः पादप्रदेशे च दक्षिणध्रुवः अनया शक्त्याऽस्माकं स्नायुतन्त्रस्य रक्तसंचारस्य च प्रक्रिया प्रभाविता भवति।

धरित्र्याः चुम्बकीयबलस्य स्वजीवने कथमुपयोगः भवेत्? एतदर्थमस्माकमाचार्याणां मतमस्ति यत् शयनकाले दक्षिणदिशि स्वशिरं निधाय पादप्रदेशमुत्तरस्यां दिशि भविष्यति, तेन भूशरीरयोः चुम्बकीयबलयोः परस्पराकर्षणेन रक्तसञ्चारप्रक्रियायां काऽपि बाधा न भविष्यति। स्वभवनेऽस्य बलस्य समुचितोपयोगाय रिक्तस्थानं, भूमेर्प्लवत्वञ्चोत्तरदिशि भवेत्। एवमेव द्वारवातायनादीनामपि अस्यां दिशि स्थापयेत्।

भूमेः गुरुत्वशक्तेः परिणाममिदं यदियमन्तरिक्षसदृशगतिशून्यतां विहायास्माकं जीवनं गतिशीलं विदधाति, स्वधरातले निर्मितभवनञ्च सुदृढमाधारं ददाति। वास्तुशास्त्रे भवननिर्माणार्थं भूतत्त्वस्य कथमुपयोग विधेय? अस्य विचारोऽत्र विधीयते। अस्मिन् शास्त्रे भूमेः परीक्षणस्य मृतिकायाः गुणवत्तायाः, भूमेः प्लवत्त्वस्य, शुभाशुभत्वस्य, शल्योधारस्य, भूखण्डचयनस्य, तदाकारस्य, विस्तारस्य, तत्समीपवर्तिमार्गस्य वेधादिकस्य च विचारो विधीयते। बृहद्वास्तुमालायां वराहमिहिरोक्तवास्तुयोग्य-प्रशस्तभूमेर्लक्षणमिदं प्रतिपादितम्।

शस्तौषधिद्रुमलता मधुरा सुगन्धा स्निग्धा समानसुखदा च मही नराणाम्।
अप्यध्वनिश्रमविनोदमुपागतानां धत्ते श्रियं किमुत शाश्वतमन्दिरेषु।।[१]

तत्रैव वास्तुप्रदीपोक्तभूमिदोषा अपि प्रतिपादिताः–

"स्फुटिता च सशल्या च वल्मीकाऽऽरोहिणी तथा।
दूरतः परिहर्तव्या कर्तुरायुर्धनापहा।।[२]

अथ च तत्रैव भूमिप्लवनादिफलमुक्तम्–

पूर्वप्लवा वृद्धिकरी उतरा धनदा स्मृता।
अर्थक्षयकरीं विद्यात् पश्चिमप्लवना ततः।।

दक्षिणप्लवना पृथ्वी नराणां मृतिदा भवेत्।
वारुणोच्च समायुक्ता नीचमाहेन्द्रसंयुता।।

---

१. बृ. वा. मा. - श्लो॰ - ७८
२. बृ. वा. मा.- श्लो॰-७९

सा गोवीथिरिति ज्ञेया ऐन्द्रोच्चा नीचवारुणा।
जलवीथिरिति प्रोक्ता वास्तुज्ञानविशारदैः।।[1]

एवमेव भूमेः प्लवत्वादिज्ञानं विधाय यदि भवन निर्मेय भूमौ पिपीलिका-तुषा-अस्थि-भस्म-वस्त्र-सर्पाण्डादीनि भवेयुस्तदा तत्रावासनिर्माणो न विधेयः। यद्येतानि वस्तुनि वास्तुभूखण्डे भवेयुस्तदा तत्र गुरुत्वाकर्षणशक्तेरल्पत्वं भवति। गुरुत्वाकर्षणशक्तेः सिद्धान्तोऽयं वर्तते यद् गुरुपदार्थेष्वस्याः प्रभावः अधिकः तृणादिस्वल्पभारपदार्थेषु च न्यूनं भवति। वास्तुखण्डे यावद् गुरुत्वाकर्षणमधिकं भवेत् भवननिर्माणं तावत् सुदृढं यावच्च न्यूनं भवेत्तावत् दृढत्वे न्यूनत्वं स्यात्। भास्कराचार्येणापि गुरुत्वाकर्षणसिद्धान्तस्य वैज्ञानिकरीत्या विवेचनं कृतम्। यथा-

आकृष्टिशक्तिश्च मही तया यत् खस्थं गुरुस्वाभिमुखं स्वशक्त्या।
आकृष्यते तत् पततीव भाति समे समन्तात् क्व पतत्वियं खे।।[2]

जलतत्त्वम्-

पञ्चमहाभूतेषु **भूतत्त्वानन्तरं** जलतत्त्वस्य स्थानमस्ति। वैज्ञानिकदृष्ट्याऽस्मिन् ब्रह्माण्डे यस्मिन् ग्रहोपग्रहे जलतत्त्वमुपलभ्यते तत्रैव प्राणिनः जीवनस्यास्तित्वमस्ति। जलस्योपलब्धतायास्तस्य स्रोतस्याधारेण च भवननिर्माणं विधीयते। अतिवृष्टिक्षेत्रेष्वल्पवृष्टिक्षेत्रेषु तटवर्तिक्षेत्रेषु च भवननिर्माणं तत्रत्य जलव्यवस्थामाधारीकृत्यैव विधीयते। तात्पर्यमिदं वर्तते यदतिवृष्टिहिमपातप्रदेशेषु भवनस्य शीर्षतलस्य प्लवत्वमल्पवृष्टिक्षेत्रेषु जलसंग्रहार्थं वापीकूपतडागादिनिर्माणं तटवर्तिप्रदेशेषु च नदीजलमाधारीकृत्यैव वास्तुशास्त्रानुसारेण भवननिर्माणं भवति।

तेजस्तत्त्वम्-

जलतत्त्वानन्तरं तेजस्तत्त्वस्याग्नितत्त्वस्यवा क्रमो भवति। शरीरे यावत्तेज ऊष्मा वा भवेत्तावत् पर्यन्तमेव जीवनमस्ति। अस्मिन् विश्वे सूर्य ऊर्जाया ऊष्मायाश्च मुख्यकेन्द्रमस्ति। **"सूर्य आत्मा जगतस्थुषश्च"** इत्युक्तेः सूर्यः सम्पूर्णजगत आत्मा कथितः। इदं सम्पूर्णमपि विश्वं केवलम् ऊर्जामूष्मां प्रकाशमेव च न ददाति, अपित्वस्य सापेक्षतायां भूमेर्गतिना अहोरात्राणि भवन्ति ऋतुपरिवर्तनञ्च सञ्जायते। सूर्यस्य रश्मयः यत्र लम्बवत् पतन्ति तत्र भूमध्यरेखासमीपवर्तिप्रदेशेषु तापमानमधिकं यत्र च तिर्यक् पतन्ति तत्रोत्तरदक्षिणध्रुवप्रदेशेषु तापमानं न्यूनं भवति।

भारतीयवास्तुशास्त्रे **तेजस्तत्त्वस्य** शुभाशुभोर्जास्थानस्य च सूक्ष्मरूपेण विचारः कृतः। अस्माभिः प्राचीनमहर्षिभिः सूर्याद्विनिस्सृतविकिरणानां मनुष्यस्य जीवने यः प्रभावः पतति तस्य शुभाशुभप्रभावस्य

---

१. **बृ. वा. मा.- श्लो॰-४१-४३**
२. **सि. शि. म.-गोलाध्यायः-भुवनकोशे-श्लो॰-६**

सूक्ष्मरूपेण विचारः कृतः। सूर्यस्य प्रातः कालीनरश्मयः विषाणूनां विनाशं कुर्वन्ति, अथ च शरीरं पोषकतत्त्वं दातुं समर्थाः भवन्ति। यथा यथा सूर्यः पूर्वक्षितिजादूर्ध्वमूर्ध्वं गच्छति तथा तथा रक्ताभकिरणानां मात्राऽधिका भवति। इमा रक्ताभरश्मयः मानवानां कृते अवाञ्छनीयाः भवन्ति। अत एव प्रातः कालीन सूर्यस्य परावैगनीकिरणानां शुभप्रभावेण अस्माभिराचार्यैः पूर्वाग्नेययोर्मध्ये शुभोर्जास्थानानि कथितानि।

उतरदिशि चुम्बकीयशक्तिः सततरूपेण प्रवहति, शक्तिरियं प्राणीमात्रमपि शुभत्वमेव प्रयच्छति। एवं शक्तिद्वयस्य शुभत्वार्जनार्थं वास्तुशास्त्रप्रवर्तकैः वास्तोः पूर्वाभिमुखमुत्तराभिमुखञ्च प्लवत्वं, रिक्तस्थानं, द्वारादीनाञ्च निर्देशः कृतः। मध्याह्नकाले तदुतरकाले च रक्ताभकिरणानामशुभत्ववारणाय दक्षिणपश्चिमदिश्योः रिक्तस्थानं द्वारादिकञ्च निषेधः कृतः।

वस्तुतः सूर्यस्य राशिसञ्चारवशात् ऋतुपरिवर्तनं भवति। राशिविशेषे स्थितिवशात् सूर्यस्य सामीप्यं दूरत्वञ्च भवति। तत्र वृषमिथुनराशिस्थिते सूर्ये, भूमितस्तस्य निकटतावशेन तद्रश्मिषु प्रचण्डत्वं भवति। वृश्चिकधनुराशिस्थिते सूर्ये, भूमेरतिदूरगतत्वेन तद्रश्मिषु मृदुत्वं भवति। सूर्यस्य प्रखररश्मिवशात् वाष्पीकरणेन वृष्टेर्मात्राऽपि सूर्याधारिता भवति। फलतः ऋतुपरिवर्तनवशात् मानवजीवने शीतस्योष्णस्य वृष्टेश्च यत् प्रभावः तत् सूर्यवशादेव भवेत्। वास्तुशास्त्रं सूर्यस्य प्रकाशस्य, तापमानस्य ऋतुपरिवर्तनस्य, भौगोलिकपरिस्थितीनाञ्च भवननिर्माणप्रक्रियायां पूर्णरूपेण उपयोगं करोति। अस्मिन् शास्त्रे प्रघाणस्य, पाकशालायाः, द्वारस्य खडक्किकायाः, वातायनस्य, रिक्तस्थानादेर्विचारः अग्नितत्त्वस्य समुचितोपयोगाय भवति।

वायुतत्त्वम्–

अस्माकं जीवने वायुतत्त्वस्य महत्त्वपूर्णं स्थानम् अस्ति। मानवशरीरे प्राणापानव्यानोदानसमानवायवः शरीरस्य सञ्चालनं कुर्वन्ति। यावदेते प्राणवायवः शरीरे क्रियाशीलाः स्युस्तावदेव जीवनम्। प्राणिनां जीवनाय वातावरणे ऽऽक्सीजनस्य मात्रा एकविंशतिप्रतिशतं नाईट्रोजनस्य चाष्टसप्ततिप्रतिशतमावश्यकम्। मानवस्य शारीरिकमानसिकसंतुलनाय सक्रियता–विकासाय च वातावरणेऽऽक्सीजननाईट्रोजनयोः मात्राया समुचितवातसंचारस्य चावश्यकं भवति। अतः वास्तुशास्त्रे समुचितपर्यावरणे भवननिर्माणे रिक्तस्थानस्य, प्रघाणस्य, पटलौच्च्यस्य, द्वारस्य, वातायनस्य, समीपवर्तीवृक्षारोपणस्य च विचारः विधीयते। येन भवने वायुतत्त्वस्य समुचितोपयोगः स्यात्।

आकाशतत्त्वम्–

पञ्चमहाभूतेष्वाकाशः सर्वेभ्यो व्यापकोऽस्ति। अस्य विस्तार अनन्तः सम्पूर्णब्रह्माण्डश्चास्मिन् सावकाशो निरवशेषश्च तिष्ठति। ब्रह्माण्डे न किमपि स्थानं यत्राकाशो व्याप्तो न स्यात्। यद्याकाशो न भवेत्तर्हि ब्रह्माण्डस्य कल्पनाऽपि न कल्पयितुं शक्नुयात्। ब्रह्माण्डेऽस्मिन् प्रत्येक–क्रियाकलापस्य सञ्चालनार्थं रिक्तस्थानस्यावश्यकत्वं भवति। अत एवाकाशतत्त्वस्य महत्त्वपूर्णं स्थानमस्ति। सम्पूर्णेऽपि

ब्रह्माण्डे यत् किमपि पदार्थमस्त्याकाशवशादेव सौरपरिवारस्य ग्रहोपग्रहाः, नक्षत्राणि, नीहारिकाः, गुरुत्वबलं, चुम्बकीयबलं, सौरोर्जा प्रकाशस्य, किरणविकिरणतरङ्गाः, गैसीयपदार्थाश्च सर्वमेवाकाशे समाहिताः सन्ति। अतः वास्तुशास्त्रे भवननिर्माणे एकद्वित्रिचतुश्शालादीनां, भवनौच्च्यस्य, बहुतलानां, रिक्तस्थानस्य, प्रघाणस्य, ब्रह्मस्थानस्य चत्वरादीनाञ्च विचारो विधीयते।

पञ्चमहाभूतानां त्रिविधशक्तीनाञ्च समन्वयपूर्वकं यदि गृहनिर्माणं विधीयते। तदा तत् स्वरूपं वास्तुशास्त्रसम्मतं भवेत्। [१]वृहद्वास्तुमालायां दिक्परत्वेन गृहविभागाः यथा प्रतिपादितास्तथाऽत्र प्रतिपाद्यन्ते। तत्र पूर्वदिशि लक्ष्मीगृहम्, आग्नेयकोणे पाकस्थानं, दक्षिणे शयनगृहं, नैऋत्यकोणे शस्त्रागारं, पश्चिमे भोजनशाला, वायण्यकोणे धनागारः, उत्तरे द्रव्यस्थानं, ईशानकोणे देवालयः, पूर्वाग्निकोणयोः मध्ये दधिमंथनस्थानं, दक्षिणाग्नेययोर्मध्ये घृतस्थानं, दक्षिणनैऋत्ययोर्मध्ये शौचालयः, नैऋत्यपश्चिमयोर्मध्ये कोपगृहं, वायव्योत्तरयोर्मध्ये रतिगृहम्, उत्तरेशानयोर्मध्ये औषध-गृहं, पूर्वेशानयोर्मध्ये सर्ववस्तुसंग्रहगृहञ्चेति षोडशगृहाणां विधानं कृतम्।

इत्यनेन प्रकारेण पञ्चमहाभूतानां त्रिविधशक्तीनां समन्वयपूर्वकवास्तुशास्त्रसम्मतनिर्मित-भवननिवासिनः निरोगतां, निर्भयतां, निरापदां, सुविधां, सुरक्षां, संतुष्टिं, समृद्धिं, सबलतां, सर्वविधसफलताञ्च प्राप्नुवन्ति।

---

१. वृहद्वास्तुमालायां श्लोक-१५०-१५५

संस्कृतसाहित्यक्षेत्रे श्रीअरविन्दस्यावदानम्

डॉ॰ अरविन्दकुमारसिंहः

श्रीअरविन्दस्य रचनावलिः खलु सामाजिक-मानविक-विषयेषु सर्वेषाम् अध्येतृणां प्रियवस्तु एव, यतः श्रीअरविन्दस्य बहुशंसिनी व्युत्पन्ना च प्रतिभा मानवज्ञानस्य सर्वं क्षेत्रं समानतया प्रभावितवती।

अनया दृष्ट्या संस्कृतवाक्-जगति श्रीअरविन्दस्य अवदानस्य मूल्यांकनमद्यापि सम्यक् सम्पादनशक्यं नाभवत्। वेद-उपनिषद्-गीतादिविषयेषु व्यास-वाल्मीकि-कालिदास-स्वामिदयानन्द-सरस्वती-प्रभृतीनां प्रसङ्गेषु च अनेन यत् अभिमतं तस्य अध्ययनं मूल्याकनं चानया दृष्ट्या कर्तुं शक्यते। समग्रा दृष्टिः सर्वाङ्गीणविचारः अन्ये च ये ईदृशा गुणाः श्रीअरविन्दस्य वैशिष्ट्यं प्रतिपादयन्ति, तान् पुरः आनेतुम् अद्यावधि यया कयापि दृष्ट्या तदाश्रित्य यत् किमपि कार्यमभवत् तत्र अयं प्रयासः न विहितः। लिख्यमानोऽयं शोधनिबन्धः तत्र भवतः अरविन्दमहाभागस्य इदमवदानं न केवलं स्पष्टतया सम्मुखमानेष्यति अपि इदं परिप्रेक्ष्यमालम्ब्य स्वकीये साहित्यक्षेत्रे प्रकारान्तरेण आपतितस्य अस्य प्रभावस्य अपि मूल्याकनं विधास्यति।

प्रस्तूयमानोऽयमालेखः संस्कृतसाहित्यक्षेत्रे श्रीअरविन्दस्य अवदानं जनानां सम्मुखमानेतुम् एकः विनम्रः उद्यमः। संस्कृतसाहित्यमन्तरेणापि श्रीअरविन्द साहित्यस्याध्येतारः दर्शन-योग-समाज-शिक्षा-इतिहास-आङ्ग्लसाहित्य-हिन्दीसाहित्यादिषु विषयेषु कार्याणि अकुर्वन्, इदानीमपि कार्यरताः सन्ति। संस्कृतसाहित्यक्षेत्रेऽपि तादृशी एव स्थितिः। ततः ये केऽपि विद्वांसोऽत्र समायाताः ते खलु श्रीअरविन्देन प्रभाविताः सन्तः तस्य ज्ञानालोकेन विविधैः दृष्टिकोणैः भारतीयमनीषां व्याख्यापितवन्तः। ब्रह्मश्रीः कपालिशास्त्री, जगन्नाथो वेदालंकारः, माधवपुण्डलीकपण्डितः, आचार्यः केशवदेवः, पूजालालः, डॉ॰ चिन्मयी महेश्वरी, डॉ॰ नरेन्द्रः, डॉ॰ सम्पदानन्दमिश्रः, डॉ॰ अमलेशत्रिपाठी, श्रीमान् रमणभाइपाठकः, मधुरचिन्ना (कर्णाटकीयः), अम्बिकातनयदत्तबेन्द्री (कर्णाटकीयः), डॉ॰ प्रफुल्ल मिश्रः (ओडिशा), रामदरसो निराकारी (पंजावीयः), एवमन्ये च बहवः धीमन्तः संस्कृतलेखकाः श्रीअरविन्देन प्रभाविताः

सन्तः संस्कृतस्य भाषाक्षेत्रे साहित्ये च कार्याणि अकुर्वन्। एतेषां विदुषां चेतसि श्रीअरविदस्य साहित्यप्रभावः सुस्पष्टं प्रतिफलितः। एते श्रीअरविन्दस्य विविधेषु विचार-विभावेषु पृथक्तया कार्यमकुर्वन्।

श्रीअरविन्दः स्वभावेन कविः आसीत्। सत्यदर्शिनामृषीणां व्यक्तित्व-मेवमासीत् यत्, योगस्य उच्चस्तरेषु तिष्ठन्तस्ते वेदोपनिषदादीनां सनातनरहस्यं प्रत्यक्षमन्वभवन्। अस्य प्रमाणं तत्रभवतः श्रीअरविन्दस्य विशालः साहित्य-भण्डारः प्रस्तौति। संस्कृतज्ञानरहितानां जनानां कृते श्रीअरविन्द-साहित्यस्य मौलिक-दृष्टिबोधः दुस्साध्यः। तस्य साहित्यम् आंग्लभाषायामस्ति, अतोऽत्र जनानाम् अधिश्रयणे एतावान् विलम्बोऽभवत्। परन्तु श्रीअरविन्दस्य साहित्यमधुना बहुषु भाषासु अनूदितं, पुस्तकान्यपि लभ्यानि सन्ति। संस्कृतसाहित्याय श्रीअरविन्दस्यावदानमपि व्यापकतया अवगन्तुमेतानि सहायकानि अभवन्।

निखिलं संस्कृतवाग्जगत् त्रिधा कुर्तुं शक्यते-

संस्कृतवाग्-जगत्

- वैदिककालः — वेद-ब्राह्मण-आरण्यक-उपनिषदः
- स्मृतिकालः — रामायण-महाभारत-पुराणानि
- लौकिककालः — महाकाव्य-गीतिकाव्य-गद्यकाव्य-नाटक-कथासाहित्य-अलंकारशास्त्राणि

वैदिककालादारभ्य लौकिक-साहित्यं यावत् वाग्जगतः एवं कोऽपि विभागः नास्ति, यः श्रीअरविन्देन नावलोकितः। संस्कृतस्य निखिलवाचमधीत्य अत्रभवान् श्रीअरविन्दः सत्यस्वरुपमुद्घाट्य अस्मान् तस्या मर्मस्थलं प्रावेशयत्। तदानीन्तनाभिः कविकृतिभिः सह बद्धसम्पर्कः श्रीअरविन्द-रचनाचयः अस्माभिरधुना एवं दृश्यते-

वैदिककालीनसाहित्याश्रयिण्यः रचनाः

वैदिकसाहित्याश्रयिग्रन्थयोः 'द सीक्रेट ऑफ द वेद'[१] इति ग्रन्थः एकतरः, द्वितीस्तु 'हिम्स टु द मिस्टिक् फायर'[२] इति। प्रथमग्रन्थस्तु प्रश्नमेकमुत्थाप्य प्रारभ्यते। सोऽयं प्रश्नः-

अपि वेदानां किमपि रहस्यं वर्तते किल? अस्य प्रश्नस्योत्तररुपेण तेन ये अध्यायाः लिखिताः ते खलु-वैदिकसिद्धान्तस्य सिंहावलोकनम्, आधुनिकमतानि, रहस्यवादस्याधारः, वेदस्य भाषाविज्ञानपद्धतिः

१. द सीक्रेट ऑफ वेद
२. द हिम्स टू द मिस्टिक फायर

इत्यादयः। श्रीअरविन्देन उक्तं यत् वैदिकमन्त्राणाम् अर्थावगतये वस्तुतः गभीरध्यानपूर्वकं तेषां भाषा द्रष्टव्या। भाषाविज्ञानस्य आधारेण वैदिकशब्दानां मौलिकार्थाः यदि ज्ञायन्ते तदा अनेन मार्गेण न केवलं तेषां नूतनाः अर्थाः समुदेष्यन्ति अपितु इदमपि स्पष्टं भविष्यति यत् एकस्यैव शब्दस्य विविधार्थबोधः कथं सम्भवति। परन्तु तस्मिन् मौलिकार्थमधिगन्तुं साम्प्रतं यत् भाषाविज्ञानं लभ्यमस्ति तन्न पर्याप्तम्। तदर्थं इतोऽप्यधिकतरेण सूक्ष्म-ध्वनिविज्ञानेन प्रयोजनं सिद्ध भविष्यति।

वेदे यानि आख्यानकानि, देवाः, इतराणि च यानि पात्राणि सन्ति तेषां ये आत्मिकाः वास्तविकाः च अर्थाः सन्ति ते श्रीअरविन्देन 'द सीक्रेट ऑफ द वेद' नाम्नि ग्रन्थे सूक्ष्म-ध्वनि-विज्ञानस्याधारेण विशदीकृताः। ग्रन्थोऽयं चतुर्धा विभक्तः, तत्र च अन्तिमे 'द ओरिजिन् ऑफ द आर्यन् स्पीच्'[१] नाम्ना एकः सुदीर्घनिबन्धःअपिविद्यते। निबन्धेऽस्मिन् तत्रभवता अत्यन्तं सूक्ष्मज्ञानेन तुलनात्मकरीत्या आर्यभाषायाः विश्लेषणं कृतम्। अनेन च सः तेषामुत्सं प्रति संकेतमकार्षीत्।

"हिम्स टु द मिस्टिक् फायर्" इति ग्रन्थे ऋग्वेदस्य नवममण्डलं विहाय इतरेभ्यः सर्वेभ्यः (दशमण्डलं यावत् मण्डलेभ्यः) अवचितानां अग्निमन्त्राणां पर्याप्तसंग्रहः विद्यते येषाम् आङ्गलानुवादः श्रीअरविन्देन कृतः। अस्मात् अनुवादभागात् पूर्वं "द डाक्ट्रिन ऑफ् मिस्टिक्स"[२] नाम्ना अन्यतमः प्रबन्धः वर्तते यत्र रहस्यवादस्य मौलिकसिद्धान्तानां, यथाः–भगवत्तायाः तत्प्रकृतेश्च किं स्वरुपम्, आत्मतत्त्वं किम्, सृष्टेः च लोकलोकान्तराणाञ्च प्रवर्तमान-पार्थिवजीवनस्य च यज्ञस्य च जीवनयात्रायाश्च यात्रायामस्याम् अभिमुखमागन्तुकानां दस्यूनामुत शत्रूणाञ्च एवमपि सहायकदेवानाञ्च यात्रायामस्याम् अभिमुखमागन्तुकानां दस्यूनामुत शत्रूणाञ्च एवमपि सहायकदेवानाञ्च तत्त्वं किम्-इत्येतेषां विषये सविस्तरं विचार्य तेषामुपरि नवीनज्ञानस्यालोकमपातयत्।

वेद-ब्राह्मण-आरण्यकादिभ्यः परम् उपनिषदः प्रस्तूयन्ते। पूर्वोक्तवैदिक-रचनाभिः सहैव अन्योऽपि ग्रन्थः "द उपनिषद्स"[३] इति नामधेयः श्रीअरविन्देन रचितः। अत्र स सर्जनात्मकैः प्रबन्धषट्कैः उपनिषत्तत्त्वस्यैव सविशदं व्याख्यानमकरोत्। एतदनन्तरम् अग्रगण्यासु एकादशोपनिषत्सु ईश - केन - कठ - मुण्डक - माण्डूक्य - प्रश्न - तौत्तिरीय - ऐतरेयादीनामष्टानां साकल्यानुवादः तेन कृतः। ईश-केनयोः अर्थविश्लेषणं तेन अनेकैः क्रमबद्धप्रबन्धैः साधितम्। एतयोः उपनिषदोः एवं गूढार्थ-निष्पादनम् इतः पूर्वं केनापि टीकाकारेण न अकारि।

इतरासां षडोपनिषदां शब्दानुसारी अनुवादोऽपि अभूतपूर्वः सन् दृग्पथम् उन्मीलयति पाठकानाम्। उपनिषद्-सम्बन्धिताः प्रबन्धाः ईशकेनयोरविशद् व्याख्यानम् च सम्मिल्य तस्य अखिलम् उपनिषत्-साहित्यं

---

१. द ओरिजिन ऑफ आर्यन स्पीच

२. द डाक्ट्रिन ऑफ मिस्टिकस्

३. द उपनिषद्स

तथा प्रकाशयन्ति यथा तस्य गम्भीरार्थाः सुबोध्याः भवन्ति।

इतः परमपि श्वेताश्वतर - छान्दोग्य - बृहदारण्यक - कैवल्य - नीलरुद्र - उपनिषदः श्रीअरविन्देन स्पृष्टाः। तद्गतः संक्षिप्तलेखो वा टिप्पनी वा अंशतोऽनुवादो वा अस्माभिः लब्धः।

"द लाइफ डिवाइन्"[१] इत्येतस्य श्रीअरविन्दकृत-महाग्रन्थस्य अन्तर्गताः सर्वेपि अध्यायाः आदौ वेदोपनिषद्-गीतादिभ्यः अवचिताभिः आङ्ग्लानुवादयुताभिः सह प्रारभ्यन्ते। एतेषां प्रारम्भिक-वचसां सम्बन्धः सम्पृक्ताध्यायस्य निखिले वस्तुनि एव विद्यते।

इमं व्याख्यानुवादसमुच्चयमन्तरेण उपनिषत्साहित्यमाधृत्य श्रीअरविन्दः स्वकीये "द फाउण्डेशन्स ऑफ इण्डियन कल्चर"[२] नाम्नि ग्रन्थेऽपि लेखमलिखत्। ग्रन्थेऽस्मिन् भारतीय-साहित्यं संश्रित्य प्रायशः सप्तषष्टिपृष्ठव्याप्तं लेखमलिखत् यत्र प्रामुख्येन संस्कृतसाहित्यस्य एव प्रतिपादनमभवत्। भारतीय-संस्कृतिसम्बद्ध-विचारान् प्रस्तूयमानोऽसौ लेखः बाहुल्येन संस्कृतवाग्विभवस्य उल्लेखं नानाक्षेत्रेषु अकरोत्। तस्य इयं कृतिः निखिलतया संस्कृतवाग्विभवस्य उद्धृतांशैः परिपूर्ण अस्ति।

"द फ्यूचर पोएट्री"[३] नाम्नि श्रीअरविन्दकृतग्रन्थे अपि आदिकाव्यस्य वेदस्य चर्चा वर्तते, मन्त्रद्रष्टृ-ऋषीणां कवित्वं तत्र समुल्लिखितम्। आत्मनः इतरेषु ग्रन्थेष्वपि असौ वेदान् उपनिषदः मध्यकालीनान् ब्राह्मणग्रन्थान् च समुदभासयत्।

उपर्युक्तान् ग्रन्थान् अतीत्य "श्रीअरविन्द आर्काइव्स ऐण्ड रिसर्च"[४] नाम शोधपत्रिकायां वेद-उपनिषद्-संस्कृतसाहित्यादीन् आश्रित्य तथाच संस्कृतसाहित्य-सम्बन्धिताः श्रीअरविन्दरचिताः बहवः लेखाः प्रकाशमागताः।

स्मृतिकालसम्बन्धितः प्रबन्धाः

उपनिषदनन्तरं रामायणं महाभारतं पुराणानि च संस्कृतवाग्विभवस्य महाकाव्यकृतयो भवन्ति। महर्षेः वाल्मीकेः कविप्रतिभां प्रतिपादयन् श्रीअरविन्दः व्यापकतया विमर्शमकरोत्। "द फाउण्डेशन्स ऑफ इण्डियन् कल्चर", "द फ्यूचर पोएट्री" "द हारमनी ऑफ वर्चू"[५] नाम ग्रन्थेषु रामायणसम्बन्धिनो लेखाः प्राचुर्येण विद्यन्ते। तेषु असौ वाल्मीकेः कविप्रतिभायाः आर्षदृष्टेश्च व्युत्पत्तिं गम्भीरतया प्रत्यपादयत् हृद्यशैल्या च महर्षेः मानवीयानुभवानाम् मर्मस्थलमपि चित्रितवान्। एतैः सह रामायणस्य बाल-अयोध्या-अरण्य-सुन्दरादिकाण्डानां कतिपयभागानां सर्गाणां वा आङ्ग्लपद्यानुवादोऽपि अनेन

१. द लाइफ डिवाइन
२. द फाउन्डेशन्स ऑफ इण्डियन कल्चर
३. द फ्यूचर पोएट्री
४. श्रीअरविन्दः आर्काइव्स एण्ड रिसर्च
५. द हारमनी ऑफ वर्चू

कृतः।

व्यासकृतं महाभारतमधिकृत्य न केवलम् एकया दृष्ट्या, परन्तु विविधाभिः दृष्टिभिः तत्त्वम् व्यमृशत्। महाभारतघटनायाः या समस्या या च तत्र राजनीतिः धर्म काव्यसौन्दर्य तस्य रचनाकालः कलेवरणञ्च एवं यत् सर्वं तथ्यं तत्र विद्यते तस्य तत्त्वविवेचनमपि अनेन प्रतिपादितम्। महर्षे व्यासस्य सम्बन्धे लिखन् सोऽवदत् असौ एव महाभारतस्य रचयिता नीतिज्ञः कविः इति। व्यासस्य भाषाशैलीमपि श्रीअरविन्दः उदभासयत्। "व्यास एण्ड वाल्मीकिः" पुस्तकविशेष शतवार्षिक-ग्रथमालायाः तृतीयखण्डे (द हारमनी ऑफ वर्चू) समावेशितोऽस्ति। श्रीअरविन्देन स्पष्टतया उक्तं यत् व्यासस्य वाल्मीकेः कालिदासस्य च काव्यकृतयः भारतीयसंस्कृतेः प्रमुखाः धारयित्र्यः सन्ति, यासु इयं संस्कृतिः अक्षुण्णतया सुरक्षिता। महाभारतस्यापि अनुवादः श्रीअरविन्दः स्थलविशेषैः कृतः, तद्यथा सभापर्वणः आदितः चतुर्थसर्गं यावत् त्रयोदशतः सप्तदशसर्गं यावत्, साकल्येन, तथाच विंशति - एकविंशति - चतुर्विंशति - सर्गाणामंशानुवादः, नलदमयन्ती - चित्राङ्गदा - उलूप्यादीनामुपाख्यानम्, उद्योगपर्वणः प्रथमसर्गः इत्यादि।

महाभारतसारवाहिनी सारभूता वा श्रीमद्भगवद्गीतानाम्ना या सुविख्याता तस्याः उपरि श्रीअरविन्दस्य "एस्सेस् आन् द गीता"[१] नाम एकः स्वतन्त्रग्रन्थः वर्तते यत्र गीतायाः नानाविषयमुद्दिश्य असौ विस्मयावहान् प्रबन्धान् अरचयत्। गीता-प्रबन्धस्य अध्ययनं हि गीतायाः सर्वाङ्गीणमध्ययनं भवति।

बङ्गभाषायामपि गीताप्रसङ्गे कांश्चित् विश्लेषणात्मकान् प्रबन्धान् सोऽलिखत् ये च "बांग्ला रचना" नाम्नि ग्रन्थे समाविष्टाः, शताब्दी-संकलित-ग्रन्थमालायाः अयमेकतमोऽस्ति। गीतायाः केषाञ्चित् प्रारम्भिकानाम् अध्यायानामनुवादोऽपि बङ्गभाषया अनेन कृतः। तस्य बङ्गलारचनासु अधिकांशतः संस्कृतसाहित्यस्य वेद - उपनिषत् - पुराण - गीतादिभिः सम्बन्धिताः एव रचनाः सन्ति।

लौकिककलाश्रयिरचनाः

महाभारतात् पुराणाच्च परं संस्कृतवाग्विभवस्य प्रमुखकविषु महाकविः कालिदासः भवभूतिः दण्डी माघः भारविः भासः इत्यादयः गण्यन्ते। एतेष्वपि महाकविः कालिदासः प्रमुखस्थानमधिकरोति। अस्य रचनाकालं शैलीं नाट्यकलां कवित्वस्य श्रेष्ठत्वं नाटकेषु अङ्गीभूतपात्राणां च चित्रणं तथाच तस्य कृतीनामनुवादस्य का पद्धतिः इत्यादीनुपलक्ष्य श्रीअरविन्दः प्रबन्धान्नलिखत्।

श्रीअरविन्देन पूर्णतयानूदितं कालिदासकृतं विक्रमोर्वशीय-नाटकं तथा च मेघदूत-ऋतुसंहारयोः आश्रिताः प्रबन्धाः अपि लभ्यन्ते। मेघदूते विकसितं काव्यसौन्दर्य काव्यवैशिष्ट्यं च यदा स

१. एस्सेज ऑन द गीता

आलोकयति तदा मध्ये मध्ये अस्य काव्यस्य येषामंशानाम् अनुवाद: सन्निहित: ते खलु श्रीअरविन्दकृतस्य तस्य समग्रानूदित-काव्यस्य उद्धृतांशा:। तै: ज्ञायते यत् तस्य अनूदितकाव्यस्य पाण्डुलिपि: तस्य वासपरिवर्तनसमये कुत्रचित् लुप्ताअभवत्। कुमारसम्भवस्य प्रारम्भिकानां केषाञ्चित् श्लोकानामनुवादं श्रीअरविन्द: आङ्ग्लभाषया अकरोत्। कालिदासस्य तस्य कृतीनामुपरि च असौ यत्किमपि अलिखत् तत् मुख्यत: "द हार्मनी ऑफ वर्चू" द फाउण्डेशन्स ऑफ इण्डियन् कल्चर" नाम्नो: ग्रन्थयो: प्रकाशितम्।

तस्मिन्नेव कालखण्डे भर्तृहरिकृतस्य नीतिशतकस्यापि अनुवाद: श्रीअरविन्देन "द सेंचुरी ऑफ लाइफ"[१] नाम्ना पूर्णतया कृत: यो हि पाश्चात्यशैल्या एक: अनुवाद-विशेषोऽस्ति। जन्मशताब्दी-ग्रन्थमालाया: "ट्रान्स्लेशन्स"[२] इति अष्टमे खण्डे तत् संकलितमस्ति। नीतिशतकस्य अनुवादेषु अयमद्वितीय:। श्रीअरविन्देन यत्किमपि स्पृष्टम्-तत् वेदमन्त्रो वा भर्तृहरे: पद्यखण्डं वा भवतु-समग्रतया उन्मीलितमभवत्।

अस्य कालस्य अन्यकवीनां नामोल्लेखमपि श्रीअरविन्दस्य ग्रन्थभागेषु यत्र तत्र दृश्यते। वाक्येनैकेन वयं वक्तुं शक्नुम यत् संस्कृतवाग्विभवस्य एवं कोऽपि भागो नावसित: य: श्रीअरविन्दस्य स्पर्शात् वंचितोऽस्ति।

कस्यापि अनुकरणं न कृत्वा रचितं श्रीअरविन्दस्य वासवदत्तं नाम नाटकं संस्कृत-साहित्यस्य कथासरित्सागरनामग्रन्थविशेषस्य एकतमां कथामाश्रयति। "प्रेम च मृत्युश्च"[३] नाम तस्य कृतं खण्डकाव्यं महाभारतस्य "रुरु-प्रियम्वदा"-कथानक-माश्रयति, तथैव सावित्रीमहाकाव्यमपि महाभारतस्य "सावित्री-सत्यवान्" इति उपाख्यानस्य एकतमं विस्मयावहं प्रस्फुटनमेव। आत्मन: सूक्ष्मलेखन्या संस्कृत-साहित्यस्य सुप्रशस्तकलेवरं परिष्वज्यमानस्य श्रीअरविन्दस्य देववाण्या सह य: घनिष्ठपरिचय: सम्बन्धश्च असीत् तयो: अभिव्यक्ति: शेखरे तदा अभवत् यदा श्रीअरविन्दस्य संस्कृत-रचनां पदनाय वयं सुयोगं प्राप्नुम:। श्रीअरविन्दोपरिषद्-नाम्नी एका रचना "श्रीअरविन्द आर्काइवस एण्ड रिसर्च" इति पत्रिकायां प्रकाशितासीत्। अस्यामुपनिषदि गम्भीरसत्यानां प्रकाशनं प्रतिपादनञ्च तथा सरलभाषया समीहितं यदद्भुतमिति प्रतीयते। "भवानी भारती" अपि श्रीअरविन्दस्य तथैव अन्यतमा रचना तत्र छन्दोबद्धैर्नवनवतिश्लोकै: भारतमातु: भूत-वर्तमान-भाविनां वास्तविकरुपाणां तथा चित्रणमकरोत् यदपूर्वमिति ज्ञायते।

एवं पश्येम चेत् अवश्यं बोधेम यत् श्रीअरविन्द: संस्कृतवाग्जगत: अध्ययन-मात्रम् न अकरोत्, परन्तु अस्योपरि स: तथा विततां समग्राञ्च दृष्टिं न्यपातयत्, यथा तयोद्भासितमिदं साहित्यं

१. द सेंचुरी ऑफ लाइफ

२. ट्रान्सलेशन्स

३. लव एण्ड डेथ

यादृशं स्तरमुन्नीतं तस्यावलोकनं मूल्याङ्कनञ्च साहित्यिक - दार्शनिक - दृष्ट्या कर्तव्यम्। श्रीअरविन्दः खलु आत्मनः संस्कृतसाहित्ये वैदिकदृष्टिकोणम् आधुनिक - परिप्रेक्ष्यानुसारेणैव विवेचितवान्। तस्य विचारेण संस्कृतं न केवलं प्राचीन-भाषामात्रं, परन्तु नित्यनवीना भाषा। एतद्विदितं यत् भारतस्य राष्ट्रीभाषारुपेण स संस्कृतं स्वीकृतवान्।

अतः संस्कृतसाहित्याय श्रीअरविन्दस्य अवदानप्रसंगं विवेचयन्तः वयमेतत् वक्तुं शक्नुमः यत् निजरचनासु स संस्कृतभाषायाः सूक्ष्मतत्त्वानि यथा प्राकाशयत् तानि संस्कृतजगति एका नवीना अभिव्यक्तिः। संस्कृसाहित्येन उत संस्कृत-भाषया सह सम्बद्धं श्रीअरविन्दस्य निखिलं लेखनकार्यं खलु अस्य वाग्विभवस्य अस्याः भाषायाश्च मर्मसत्यस्योद्घाटनं करोति।

कात्यायनश्रौतसूत्राणां मीमांसादृष्ट्या परिशीलनम्

प्रो॰ देवेन्द्रनाथपाण्डेयः

सर्वेषु श्रौतसूत्रेषु कात्यायनश्रौतसूत्रस्याऽस्ति विशिष्टं महत्त्वं, यतोहि कात्यायनोऽत्र प्रायशः सर्वाणि शास्त्राणि परिशील्य श्रौत्रयागप्रक्रियां षड्विंशत्यध्यायेषु वैक्रमशताब्देरेकादशशताब्द्यां[१] मीमांसासूत्रनिर्मितेः कालात् किञ्चित्पूर्वं सूत्रयामास। व्याकरणस्य वार्त्तिककारादयं भिन्नः कात्यायन इति मत्वैवैतच्छोधपत्रं प्रवर्तमानमस्ति। तत्राद्यं परिभाषाप्रकरणमस्ति, यस्य निवेशोऽस्ति प्रथमाध्याये। सूत्र-शब्दस्य[२] परिभाषाया आलोकेऽस्य ग्रन्थस्यानुशीलनेन बहवो धर्मशास्त्रीयाः विषयाः प्रस्फुटिताः जाजायन्ते। क्वचिन्मन्त्राणां[३] भावानुसारं तेषां प्रयोगे विनियोगोऽत्रावलोक्यते, क्वचिद्वैज्ञानिकञ्च[४] रहस्यं पाठकानां समक्षं समुपस्थितं भवति।

तत्रैव परिभाषाप्रकरणगतसूत्राणामत्र मीमांसादृष्ट्या परिशीलनं प्रस्तौत्येतच्छोधदलम् श्रीमतां धीमतां, प्रज्ञावतां विपश्चिद्वरेण्यानां समक्षम्। यद्यपि प्रायशः सर्वाणि कात्यायनश्रौतसूत्राणि मीमांसादृष्टिमपि सूचयन्ति तथाप्यत्र कतिपयानामेव परिभाषासूत्राणां तद्दृष्ट्या विश्लेषणं विधीयते।

सर्वशाखाप्रत्यवायमेकं कर्मेति धिया शुक्लयजुर्वेदीयानां सर्वासां पञ्चदशशाखानां[५] सामान्य-श्रौतयागप्रवृत्तिमुपलक्ष्य प्रवर्त्तितेऽस्मिन् कातीयशुल्बसूत्रसहिते बृहदाकारे कात्यायनश्रौतसूत्रे परिभाषाप्रकरणे सर्वप्रथममधिकारप्रकरणमापतति दृष्टिपथं श्रोत्रियाणाम्, यथा– **अथातोऽधिकारः, फलयुक्तानि कर्माणि इति।। का॰ श्रौ॰ सू॰ - १/१/२।**

---

१. कात्यायनश्रौतसूत्रं सरलावृत्तिः– भू॰ भा॰ पृ॰–२८–२९।

२. अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः।।

३. संयौति "जनयत्वैतेति"-पिष्टान्यद्भिःश्रृतावद- नेन मिश्रयति- का॰ श्रौ॰ सू॰ २/२/५/१४

४. स्त्री चाऽविशेषात्, अ॰ १/१/७ एवं १/२/८

५. का॰ श्रौ॰ सू॰ भू॰ भा॰ पृ॰– २८–२९

अत्र तावदेतदुक्तं यत्सर्वाणि कर्माणि फलयुक्तानि भवन्ति। अस्य सूत्रस्य पाठः कात्यायनश्रौतसूत्रभूमिकाऽध्याये वा परिभाषाऽध्याये वर्तते। यत्र अधीतवेदानां जनानां क्रत्वनुष्ठानकर्त्तव्यता निरूपिता विद्यते। अस्य वृत्तिं विदधन् पं॰ विद्याधरशर्ममहोदयाः कर्काचार्यमनुसरन् कथयति यत् **"स्वर्गकामादिपदं[१] पुरुषविशेषणं सदपि विशेषणीभूतस्वर्गादिबोधकमर्थाद् भवति। अन्यथा अफले कर्मणि पुरुषस्य प्रवृत्त्यनुदयाद् वेदवाक्यस्य प्रवर्त्तकत्वमेव भज्येत"**– अत्रेदमवधेयमस्ति यत् वृत्तिकारेण श्रीमता विद्याधरशर्मणा मीमांसायाः विधिवाक्यप्रयोजनं सम्यक् लक्ष्यते। तात्पर्यमिदमस्ति यद्विधिः पुरुषं कर्मसु[२] प्रवर्त्तयति तथा च प्रवर्तना फलविरहेणासंभवाऽस्ति[३] तस्मादेव कारणादत्र सूत्रं प्रतिपादयति **"फलयुक्तानि कर्माणि"** तानि चाधिकारि[४] विशेषणरूपेण सिद्धानि। अत एवोक्तं **"अधिकारः कर्तृव्यापारः[५] फलभोक्तृत्व-समानाधिकरण"** इति। अनेनैव सूत्रेण चोदनावाक्यभूतस्य विधिवाक्यस्य भावनादृष्ट्या विश्लेषणमपि भवति, तथा चेयं प्रतिपाद्यते यत् त्रिविधभावाकाङ्क्षामाध्यमेन[६], फलं प्रति पुरुषस्य प्रवृत्तिः परिकल्प्यते। तस्मादस्य सूत्रस्य निष्कृष्टोऽर्थो भवति यत् सर्वेषां वेदानां धर्मप्रतिपादनमेव प्रयोजनम्। तच्च[७] वेदार्थ एव, वेदार्थोऽपि यागाद्यनुष्ठानमेव, तदनुष्ठानस्य च फलवत्वं दृष्टमदृष्टं[८], दृष्टादृष्टत्वञ्च सिध्यति।

"मनुष्याणां वाऽऽरम्भसामर्थ्यात्" (का॰ श्रौ॰ सू॰- १/१/४)

अधीतवेदानामृषीणां देवानां मनुष्याणां च मध्ये मनुष्यविशेषाणामेव क्रत्वनुष्ठानेऽधिकार इति ब्रुवन् आचार्यः कात्यायनः सामर्थ्यं वैदिकयज्ञानुष्ठाने हेतुं मनुते। तच्च जैमिनिन्यायमालाविस्तरे खलु स्पष्टं भवति। जै॰ न्या॰ मालाविस्तरे[९] षष्ठाध्यायस्य प्रथमपादे विषयोऽयं मीमांसितोऽस्ति। **"अशक्तानामनधिकार"** इति प्रकरणे निरूपितः। **"भाव्यः स्वर्गपुमर्थत्वात्"**- इति श्लोकांशेनात्र प्रतिपादितो यत् पुल्लिङ्ग-योगात् पुरुषस्यास्त्यधिकारः श्रौतक्रत्वनुष्ठाने। अत्रैव पुनः **"क्रतुं प्रति विधिस्तस्मान्नाशक्तस्याधिकारितेति"** प्रोक्तं येनानेन कात्यायनश्रौतसूत्रेणास्य संवादो दृश्यते। आचार्य-

---

१. का॰ श्रौ॰ सू॰ सरलावृत्तिः– सूत्रम्-२/१

२. "विधिः प्रवर्तनां प्रतिपादयन् स्वप्रवर्तकत्वनिर्वाहार्थं विधेयस्य यागादेरिष्ट-धनत्वमाक्षिपन् पुरुषं तत्र प्रवर्तयति"-द्र॰ अर्थसंग्रहः, निषेध-प्रकरणम्।

३. "अफले कर्मणि पुरुषस्य प्रावृत्त्युनुदयात्सरलावृत्तिः। चोदनागम्यः स्वर्गफलसाधनत्वादि- लक्षण आकारः" – जै॰ न्या॰ मालाविस्तरः।

४. "यजेत् स्वर्गकामः–" इत्यादिरूपः- द्र॰ अर्थसंग्रहः- पृ॰ ११५ (अधिकारविधिः)।

५. द्र॰ सरलावृत्तिः- का॰ श्रौ॰ सू॰- १/१

६. साध्यं साधनमितिकर्त्तव्यतां च - द्र॰ शब्दभावनाया अंशत्रयम् अर्थसंग्रहः- पृ॰ १७ (दयाशंकरः)।

७. "धर्मशब्दोऽपि कृत्स्नं वेदार्थमाचष्टे" अर्थत्वे सति चोदनागम्यो धर्मः- जै॰ न्या॰ मालाविस्तरः (धर्मलक्षणाधिकरणम्)

८. यथावघातप्रोक्षणादि। तत्र दृष्टार्थमवघातादि, तद्धिद्रव्यत्यागांशेनैव अदृष्टं देवतोद्देशेन च देवता - स्मरणं दृष्टं करोति - द्र॰ सन्निपत्योपकारकाण्य - ङ्गानि अर्थसंग्रहः।

९. द्र॰ जै॰ न्या॰ मालाविस्तरः- ६/१/२-३-४

कर्कस्त्वस्य भाष्यं कुर्वन्नाह **"वा शब्दः पक्ष व्यावृतौ। न सर्वेषामधिकारः। मनुष्या एव कर्मस्वधिक्रियन्ते। त एव हि यथाश्रुतं कर्मारब्धुं समर्था न देवादय इति"**। पं॰ विद्याधरशर्ममहोदयस्तु न स्वकीयं मतं प्रस्तौति प्रत्युत्कर्काचार्यस्यैव मतं स्वकीयायां भाषायामुपस्थापने प्राप्तकामोऽनुभवति। तथापि यदत्र विशेषरूपेण निरूपणीयमस्ति तदस्ति दौर्बल्यमत्रभाष्याणाम्। यतोहि अस्य कात्यायनश्रौतसूत्रस्य व्याख्यानं कुर्वन्तावुभावपि भाष्यकारौ दिगभ्रमिताविव प्रतिभातः। प्रथमदृष्ट्या **"यज्ञेनयज्ञमयजन्त-देवास्तानिधर्माणि प्रथमान्यासन्"**- इति श्रुतेरत्र विरोधोऽवलोक्यते, यतोहि कर्काचार्यः यथा कथयति तथैव शर्ममहोदयोऽपि यत् **"मनुष्या एव कर्मस्वधिक्रियन्ते,...... त एव हि यथाश्रुतं कर्मारब्धुं समर्था न देवादयः...."** इत्यादि। परन्तु साध्य-सिद्ध-देवयोः प्रसङ्गमुपगृह्य प्रवर्त्तितमेतत् सूत्रं व्याख्याति यत् देवास्तु मानसिकं यज्ञं कृतवन्तः, परन्तु पाञ्चभौतिकदेहस्याध्यानि फलवन्ति कर्माणि तु मनुष्यप्रयत्नसाध्यान्येव तस्मात्तेषान्तत्राधिकारः। अस्य तत्त्वस्य स्फोरणं नोपलभ्यते भाष्ये, मीमांसायां, जै॰ न्या॰ मालाविस्तरेऽप्यस्य विश्लेषणं न विहितं तस्मादेषाऽस्य सूत्रस्य व्याख्यानेऽस्ति समस्या।

अस्मिन्नेव प्रसंगे स्त्रीचाविशेषा[१]दित्यपि सूत्रमस्ति कात्यायनश्रौतसूत्रे, यस्याभिप्रायोऽस्ति यत् स्त्रीणामधिकारो नाऽस्ति कर्मसु तासामविशेषात् इति।

अत्राविशेषशब्दस्य तात्पर्यमिदमस्ति यत् पुरुषविशेषाः कर्मविशेषेषु ह्यधिकृताः, तैरेव सह तासामपि सहभागित्वं पतिसङ्गतिकारणान् मन्यते, तस्मात्तासाङ्कृते पृथग् विधानं नास्ति शास्त्रे इति। यथा चाह मनुरपि-

> **नास्ति स्त्रीणां पृथग्यज्ञो, न व्रतं नाप्युपोषणम्।**
> **शुश्रूषयति भर्तारं, तेन स्वर्गं महीयते।।** मनु॰ ५/५

अस्मिन्नेवप्रसङ्गेऽग्रे सूत्रयति आचार्यः कात्यायनो यथा- दर्शनादिति। अर्थात् **"वैदिकसाहित्ये मेखलया यजमानं दीक्षयति[२], योक्त्रेण पत्नीम्"**- इति श्रुति- प्रमाणत्वान्न पृथक्तासामधिकारश्रवणमिति भावः। अत्र च पं॰ विद्याधरशर्मा चाप्याह निष्कृष्टरूपेण **"साहित्यश्रवणात्[३], पृथक्त्वनिषेधाच्च, अयं चाधिकारः स्त्रियाः भर्त्रा सहैव, न स्वातन्त्र्येण। सहत्वं सर्वकर्मसु-"** इति। परन्तु पूर्वं भावमभिव्यञ्जयन्नाचार्यः कर्क आह- तस्मात् स्त्रीणां अधिकारः तथा चाग्रे दर्शनाच्चेति सूत्रभाष्ये कथयति- **"सा च पुंसा सहाधिक्रियत"**[४] इति। जै॰ न्या॰ मालाविस्तरेऽपि तदेव भावोऽभिव्यक्तो वर्तते। तत्र च पुनः **"दम्पत्योरेकता ततः"**[५]- इति निष्कर्ममुपस्थापयन् पृथगधिकारस्य मृदुवाण्यामवरोधो

---

१. का॰ श्रौ॰ सू॰ - १/१/७-८
२. तै॰ सं॰- ६/१/३
३. द्र॰ सरलावृत्तिः १/१/७-८
४. द्र॰ का॰ श्रौ॰ सू॰ कर्क-भाष्य-१/१/७-८
५. द्र॰ जै॰ न्या॰ माला॰- ६/१-२

विहित इति।

तथैव कात्यायनश्रौतसूत्रे मन्त्रस्वरूपं यत्प्रतिपादितमस्ति, तस्य जै० न्या० मालाया आलोके विश्लेषणमत्र विधीयते। वैदिकसाहित्यं मन्त्रब्राह्मणभागयोः समेकितं रूपं मन्यते, अत एव आह– **"मन्त्रब्राह्मणयोर्वेदनामधेयम्"** इति। केचन तु वैदिकमन्त्रानेव वेदत्वेनाङ्गीकुर्वन्ति, तच्चिन्त्यम्। आचार्य-यास्कस्तु[१] मन्त्राः मननात् इति कथयन् अर्थवैज्ञानिकधिया ध्वनिसामान्यान् - मन् धातोः मनुते निष्पन्नं पदम्। तथैव संस्कृतव्याकरणमपि मन्त्रशब्दनिष्पत्तिं करोति। अत्र अयं विचारणीयोऽस्ति विषयः यदयं मन्त्रशब्दः देशकालपरिस्थित्यनुसारं बहुष्वर्थेषु ह्यवगम्यते। वैदिकसाहित्यसन्दर्भेऽपि स्वाध्याय-प्रवचन-कर्मकाण्डविषयेषु संहितागतानां मन्त्राणामभिधानानि ह्रस्वदीर्घरूपाणि दृश्यन्ते - यथाऽध्ययनकाले, व्यवहारकाले च प्रायशो जनाः **"इषेत्वा"** - इति सम्पूर्णां कण्डिकां[२] मन्त्रशब्देन कथयन्ति इति। अतोऽस्त्यत्रावश्यकता मीमांसायाः, तस्माद् अस्मिनुपक्रमे सर्वप्रथमं कात्यायनश्रौतसूत्रे यत्स्वरूपमस्य मन्त्रस्य प्रतिपादितं तदिहोच्यते यथा–

"ऋचोयजूँषि सामानि निगदामन्त्राः"– का० श्रौ० सू० - १/३/१
"तेषां वाक्यं निराकाङ्क्षम्" का० श्रौ० सू०– १/३/२

अत्रावधेयमस्ति यदृचः, सामानि, यजूँषि, प्रैषाश्च[३] मन्त्रा उच्यन्ते। अस्मिन् कात्यायनश्रौतसूत्रे मन्त्रस्य या परिभाषाऽवलोक्यते सा तु श्रौतयागप्रयोगमनुलक्ष्य प्रवर्तते। तदनुसारन्तु सर्वेषां ऋग्सामयजुर्मन्त्राणां, मन्त्रत्वमुक्तम्। वेदविशेषगतमन्त्रविशेषबोधनाय होत्रादीनां पृथगार्त्विज्यग्रहणम् यथा– **"ऋचां त्वः पोषमास्ते०"**[४] - इति श्रुतौ दृश्यते। तथा च मीमांसायां प्रयोगस्मारकत्वं मन्त्राणामुक्तम्। तस्मादत्र जै० न्या० मालायामस्य मन्त्रविषयस्य स्वरूपमुपस्थापयन्नाह माधव– **"याज्ञिकानां समाख्यानं लक्षणं दोषवर्जितम्। तेऽनुष्ठानस्मारकादौ मन्त्रशब्दः प्रयुज्जते।"**[५] २/१/७/२१-२२

अत्र च यास्कीयलक्षणं, विस्तरे खण्डयन् कथयति माधवः यद्यदि मननान्मन्त्रेति लक्षणं विधीयते तदा ब्राह्मणवाक्येष्वपि अतिव्याप्तिः[६] स्यात्तत्रापि मननत्वव्यापारस्यसंभवात्तस्माद् याज्ञिक-समाख्यानस्य निर्दोषलक्षणत्वात् तदेव परिष्कृतलक्षणं मन्त्रस्य, तच्च समाख्यानमनुष्ठानस्मारकादीनां मन्त्रत्वं गमयति। मन्त्रोऽपि बहुप्रकारको यथा–

---

१. निरूक्तम्– १/६
२. द्र० मा० संहितायाम्– प्रथमा, द्वितीया इति।
३. "अग्नीदग्नीन् विहर" (श० ब्रा० ४/२/५-११) इत्यादयः प्रैषाः– द्र० का० श्रौ० सू० सरलावृत्तिः– १/३/१
४. ऋग्वेदभाष्यभूमिकायाम्
५. जै० न्या० २/१/७/११
६. मननहेतुर्मन्त्र इत्युक्ते ब्राह्मणेऽतिव्याप्तिः– द्र० जै० न्या०– २/१/७

(क) स्तुतिरूपः[१] – अग्निमीळे इत्यादयः।
(ख) त्वान्ताः – इषेत्वा इत्यादयः।
(ग) आमन्त्रणमन्त्राः – अग्न आयाहिवीतये इति।
(घ) प्रैषरूपः – अग्नीदग्नीन् विहर इत्यादयः।
(ङ) विचाररूपाः – अधः स्विदासीत्यादयः।
(च) परिदेवनरूपाः – अम्बेऽम्बिके॰ इत्यादयः।
(छ) प्रश्नरूपाः – पृच्छामि त्वा परमन्तम्॰ इत्यादयः।
(ज) उत्तररूपाः – वेदिमाहुः परमन्तं पृथिव्या इत्यादयः।

अतोऽत्र कात्यायनसूत्रस्य प्रभावो लक्ष्यते जै॰ न्या॰ मालाविस्तरे। आपस्तम्बस्तु **"कर्मचोदना ब्राह्मणानि" "ब्राह्मणशेषोऽर्थवादः" "अतोऽन्येमन्त्रा"** – २/१/१ – इत्याह। अन्येऽपि विभागोऽवगम्यते मन्त्राणां यथा– करणमन्त्रादयः[२] इति।

अनेन प्रकारेण निष्कर्षोऽयं निःसरति यत् कात्यायनश्रौतसूत्राणां भाष्यसमीक्षणम्, जै॰ सूत्रविस्तरालोकेऽध्ययनेन च सर्वेषां कात्यायनश्रौतसूत्राणां मीमांसासूत्रसंवादोऽवगम्यते। अतो यदि मीमांसादृष्ट्याऽस्य कात्यायनश्रौतसूत्रस्य पुनः परिशीलनं विधाय भाष्यं क्रियते तदा कात्यायनश्रौतसूत्रग्रन्थस्य व्यापकविचारावगमने सौविध्यं भविष्यति तथा च श्रौतसूत्रविषयगतानां वैदिकयज्ञानां सामयिकं महत्त्वमपि सुस्पष्टं भविष्यति। एतेषां सर्वेषां कात्यायनश्रौतसूत्राणामध्ययनं सम्यग्विधायैव उर्वट–महीधरौ माध्यन्दिनसंहिताभाष्यकरणेप्रवृत्ताविति तयोः भाष्यावलोकनेन स्पष्टीभवति। एतदप्यस्य सूत्रग्रन्थस्य वैशिष्ट्यं यदिदं स्वसिद्धान्त–प्रतिपादनाय अन्यसंहिता–ब्राह्मणग्रन्थानप्यात्मनि धत्ते, यस्य स्पष्टीकरणं कात्यायनश्रौतसूत्रभाष्यावलोकनेन भवति यथा– **"रथकारस्याधानम्"** इति सूत्रव्याख्याने, सूत्रभावं प्रमाणयितुमापस्तम्बीयं– **"वर्षासु रथकार आदधीत"** (आप॰ श्रौ॰ ५/३/१८) इति सूत्रमुदाहरति पं॰ विद्याधरशर्ममहोदयः। तथैव **"अधिश्रयणीये मांसप्रतिषेधः"**– इतिसूत्रभाष्ये शातपथीं श्रुतिमुद्धरति भाष्यकारः यथा– **"नवावसिते वैनमाहरेयुः तस्मिन् पचेयुः तद्ब्राह्मणा अश्नीयुरिति।"** (शत॰ २/३/२/८)

क्वचिच्च कात्यायनश्रौतसूत्राणां मीमांसासूत्राणाञ्च भूयान् संवादोऽवलोक्यते यथा–

कात्यायन–श्रौत–सूत्रम्	**मीमांसा–सूत्रम्**
१. रथकारस्याधाने– १/१/८	वचनाद्रथकारस्य– ६/१/४४
२. माघीवा क्रयश्रुतेः– १३/१/५	माघीवैकाष्टका श्रुतेः– ६/५/३२

इत्यादि। अतोऽस्य श्रौतसूत्रग्रन्थस्य विषयबाहुल्यं मीमांसादृष्ट्या विश्लेषणेनास्माकं पुरःस्फुरति।

१. जै॰ न्या॰– २/१/७/२२
२. करणमन्त्रः, क्रियमाणानुवादीमन्त्रः, अनुमन्त्रणमन्त्रः, जपमन्त्रः– द्र॰ का॰ श्रौ॰ सू॰ भू॰ पं॰ विद्याधरशर्मा।

जीवात्मेश्वरयोः सम्बन्धविचारः

आचार्यरामसुदर्शनमिश्रः

न्यायदर्शने तावत् जीवात्मा परमात्मा च आत्मशब्देन व्यपदिश्येते। "आत्मा तु परमात्मा क्षेत्रज्ञश्चेति द्विविधः। परमात्मा ईश्वर एक एव। क्षेत्रज्ञा अस्मादादयोऽनन्ता एव इति सप्तपदार्थ्याम्। सुखदुःखादीनाम् आश्रयो जन्म-मरणाद्यधीनश्च जीवात्मा। नित्यज्ञानवान्[१] सृष्टिस्थितिप्रलयकर्ता सर्वज्ञः सर्वशक्तिमान् ईश्वरः। आत्मलक्षणं तावत्" ज्ञानाधिकरणमात्मा इति। ज्ञानस्य अधिकरणम् आत्मा। जीवात्मपरमात्मनोः साधारणलक्षणम् इदम् उभयविधस्यापि आत्मनो ज्ञानवत्त्वात्। तत्र जीवस्य ज्ञानम् अनित्यम्, बहु, प्रत्यक्षानुमित्यादिरूपं च। परमात्मनो ज्ञानं तु नित्यम्, एकम्, प्रत्यक्षरूपञ्च। एवम् इच्छाधिकरणत्वम्, प्रयत्नाधिकरणत्वमपि आत्मनो लक्षणं भवितुम् अर्हति। उभयविधे आत्मन्यपि ज्ञानेच्छाप्रयत्नानां विद्यमानात्।

यद्वा आत्मत्वजातिमान्[२] आत्मेति लक्षणम् सा च आत्मत्वजातिः जीवात्मनि परमात्मनि च वर्तते। जीवात्मनि सुखदुःखादीनां समवायिकारणतावच्छेदकतया आत्मत्वं सिद्धम्। परमात्मने अपि आत्मत्वजातिरस्ति। "आत्मा वा अरे द्रष्टव्यः।।[३] इत्यादिश्रुतौ आत्मशब्दव्यवहारात्। तस्मिन् सुखादीनां स्वरूपयोग्यकारणतासत्त्वात् तदवच्छेदकतया च आत्मत्वसिद्धेः। न च ईश्वरे सुखदुःखादीनां प्रसङ्गः। तस्य सुखदुःखादीनां स्वरूपयोग्यकारणत्वे अपि अदृष्टशरीरादिरूपनिमित्तकारणाभावात् सुखादीनाम् अनुत्पत्तेः। ननु नित्यस्य स्वरूपयोग्यस्य फलम् अवश्यम्भवि इति चेन्न। जलपरमाणौ स्नेहानुत्पत्त्या तादृशनियमे मानाभावात्। परे तु ईश्वरे आत्मत्वजातिर्नास्त्येव, सुखदुःखादिजनकतायास्तत्र अभावात्। न च ईश्वरस्य दशमद्रव्यत्वापत्तिः। ज्ञानवत्त्वेन ज्ञानाधिकरणत्वेन वा तस्य आत्मनि अन्तर्भावात् चार्वाकमते चैतन्यविशिष्टो देह एवात्मा। पृथिव्यादिभूतचतुष्टयस्य परिणामेन देहे चैतन्यमुत्पद्यते। देहेन सहैव तस्य उत्पत्तिविनाशाङ्गीकारात् अनित्यत्वं तस्य। चार्वाकैकदेशिनः केचिद् इन्द्रियाण्येवात्मा इत्याहुः। अपरे च मन एवात्मेति मन्यन्ते। बौद्धेषु माध्यमिकानां मते शून्यमेवात्मा। योगाचार-बौद्धानां मते विज्ञानस्वरूप आत्मा। तस्य च प्रतिक्षणं भेदाद् अनित्यत्वम्। जैनानां मते देहपरिमाणो देहाद्यतिरिक्तो जीवात्मा

१. जन्माद्यस्य यतः ब्र.सू. आ.१-पाद.१ सू.२

२. प्रशस्तपादभाष्यम् पृ.सं. १६७

३. न्यायसिद्धान्तमुक्तावली प्रत्यक्षखण्डः पृ.सं. ८

नैयायिकवैशेषिकाणां नये तावद् देहेन्द्रियेभ्यो भिन्नो नित्यो विभु आत्मा अङ्गीक्रियते। तदुक्तं–"जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च" इति तर्कसंग्रहे। 'ज्ञानाधिकरणमात्मा' इति जीवात्मपरमात्मनोर्यत् साधारणं लक्षणम्, तत् जीवात्मनि इत्थं प्रयोज्यम् 'अहं सुखी', 'अहं दुःखी', 'अहं जानामि', इत्यादीनां ज्ञानानाम् अधिकरणम् आत्मा, समवायेन ज्ञानवान् इत्यर्थः। आत्मत्वजातिमान् आत्मेति साधारणलक्षणमपि अत्र अनुगतम्। तत्र येषां मते आत्मा अहंप्रत्ययविषय इति आत्मनः प्रत्यक्षत्वम्, तेषां मते आत्मत्वजातिरपि प्रत्यक्षसिद्धा। येषां मते शरीराद्यतिरिक्तया आत्मनः प्रत्यक्षत्वं नास्ति, तेषां मते आत्मत्वजातिर्नप्रत्यक्षसिद्धा, अपितु अनुमेया।[१] आत्मनि सुखदुःखादीनां समवायेन उत्पत्तौ सत्याम् 'अहं सुखी', 'अहं दुःखी' इत्यादिप्रतीतिर्भवति। अत आत्मा सुखदुःखादिगुणानां समवायिकारणम्। सुखादीनां समवायिकारणता आत्मनि वर्तते, तस्याः समवायिकारणताया अवच्छेदको धर्मश्च आत्मत्वम्।[२] आत्मनिष्ठा सुखादिसमवायिकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् घटनिष्ठकार्यता निरूपित दण्डनिष्ठकारणतावत् इत्यनुमानप्रयोगः। कारणतावच्छेदकतया च यो धर्मः अनुमीयते तदेव आत्मत्वम् इति सुखादिसमवायिकारणतया आत्मत्वजातिः सिद्धयति। सा आत्मत्वजातिः जीवात्मनि अस्त्येव इति लक्षणसमन्वयः।

जीवात्मनो[३] विशेषलक्षणं तु सुखाद्याश्रयत्वम्। सुखदुःखादीनां गुणानां समवायिकारणं जीवात्मा इत्यर्थः। ईश्वरस्य तु सुखाद्यभावात् न तत्र अतिव्याप्तिः। यद्वा ज्ञानसमवायिकारणत्वं जीवात्मत्वम्। परमात्मनो ज्ञानं तु नित्यम्, नित्यस्य च समवायिकारणं नास्तीति परमात्मा न ज्ञानसमवायिकारणम् इति न तत्र अतिव्याप्तिः। एवं इच्छासमवायिकारणत्वं प्रयत्नसमवायिकारणत्वं च जीवात्मत्वम्। सुखादिमत्त्वमेव जीवलक्षणम्। आश्रयत्वकथनं तु समवायेन तस्य लक्षणत्वलाभाय इति केचित्।

अयमात्मा 'अहम्' इति प्रत्ययस्य, बुद्धिः, सुखं, दुःखम्, इच्छाः, द्वेषः, प्रयत्नः, संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, भावनाख्यसंस्कारः, धर्मः, अधर्मः, इति चतुर्दशगुणानां च आश्रयः। तदुक्तं कारिकावल्याम्–"बुद्धयादिषट्कं संख्यादिपञ्चकं भावना तथा। धर्माधर्मो गुणा एते आत्मनः स्युश्चतुर्दश।।[४] इति, अहंकाराश्रयोऽयम्, इति, 'विभुः बुद्ध्यादिगुणवान् इति च। वेदान्तिनां मते आत्मा ज्ञानस्वरूपः सुखस्वरूपश्च। नैयायिकानां मते तु ज्ञानम् आत्मनो न स्वरूपम् अपितु धर्मविशेषः। एवम् आनन्दम् अपि नात्मनः स्वरूपम् अपि तु गुणविशेष एव। मुक्तावल्याम् आत्मा देहेन्द्रियेभ्यो भिन्नः सन् तिष्ठतीति तदा कस्यापि अनुभवस्याभावात् सर्वे विशेषगुणा अपि नश्यन्ति।

---

१. प्रशस्तपादभाष्यम् पृ.सं. १७५

२. न्यायसिद्धान्तमुक्तावली पृ.सं. ७३

३. पदकृत्यम् तर्कसंग्रहः पृ. ४०

४. न्या.सि.मु.का. ३२-३३ पृ.सं. ४१

तथा च मुक्तात्मनि ज्ञानसुखादिकमपि न विद्यते। विशेषगुणोच्छेदे हि आत्मनः स्वरूपेऽवस्थानं भवति। नवानाम् आत्मविशेषगुणानाम् अत्यन्तोच्छेदश्च मोक्षः।

आत्मनः परिणामविषये दार्शनिकानां मतभेदोऽस्ति। रामानुजादीनां मते आत्मा अणु[१] परिमाणः, जैनानां मते आत्मा मध्यमपरिमाणः, सांख्यानाम् अद्वैतवेदान्तिनाञ्च मते आत्मा विभुः। नैयायिकैरपि आत्मनो विभुत्वं स्वीकृतम्।

ननु, आत्मनोऽणुत्वस्वीकारे का हानिः? उच्यते—आत्मनोऽणुत्वे शरीरस्य एकदेशे एव तस्य अवस्थितिः सम्भवेत्। तथा च सति शरीरव्यापिसुखदुःखादेः उपलब्धिनोपपद्येत। ननु सूक्ष्मदीपस्य सर्वगृहावच्छेदेन इव अणुरूपस्यापि जीवस्य सर्वशरीरावच्छेदेन प्रभाप्रसरणाङ्गीकारे सुखदुःखाद्युपलब्धिः उपपद्यते इति चेत् न। अणोः अप्रत्यक्षत्वात् तद्गुणानाम् अपि अप्रत्यक्षत्वम् इति आत्मनः अणुरूपत्वे तद्गुणानां सुखदुःखादीनाम् अपि अप्रत्यक्षत्वप्रसङ्गात्। अपि च कामव्यूहस्थले सुखादिसाक्षात्कारस्यापि अनुपपत्तिः स्यात्, समानकालिकयोगजधर्मजन्ये शरीरभेदे एकेन परमाणुना अवस्थित्ययोगात्।

ननु, तर्हि सर्वशरीरावच्छेदेन आत्मनि सुखादिसाक्षात्कारोपपत्तये सर्वशरीरव्यापी मध्यमपरिमाण-विशिष्ट आत्मा स्वीक्रियताम्। न, आत्मनो मध्यमपरिमाणवत्त्वे तस्य कार्यत्वप्रसङ्गेन अनित्यत्व-प्रसङ्गात्, 'यन्मध्यमपरिमाणं तदनित्यम्' इति व्याप्तेः। आत्मनः अनित्यत्वे च कृतनाशाकृतस्यागम-प्रसङ्गः। कर्तुरात्मन उत्तरजन्मनि असत्त्वात्, अकर्तुश्च सत्त्वात् यागादिना सम्पादितस्य धर्मादेः अप्राप्तिप्रसङ्गः, अकृतस्य च प्राप्तिप्रसङ्ग इति भावः।। न च पुनर्जन्मवादो मिथ्येति वक्तुं युक्तम्, पुनर्जन्मवादस्वीकारे इह जन्मनि अर्जितानां कर्मफलानां भोगं विना नाशप्रसङ्गेन कार्यकारणभावोच्छेदप्रसङ्गात्। तस्मात्, पारिशेष्येण आत्मनो विभुत्वमेव स्वीकरणीयम्। विभुत्वञ्च सर्वमूर्त्तद्रव्यसंयोगित्वं सर्वव्यापित्वं वा।

ननु, आत्मनो विभुत्वस्वीकारे किं प्रयोजनम्? उच्यते, सर्वत्र आत्मकार्यस्य उपलब्धेः आत्मनो विभुत्वं स्वीकार्यम् इति। तथा हि भोग्यवस्तुमात्रस्य उत्पत्तौ आत्मनोऽदृष्टम् अपेक्षितम्, अन्यथाभोगस्य अनुपपत्तेः। एवञ्च सुदूरदेशे जातानां भोग्यवस्तूनाम् उत्पत्तौ, आत्मभोगाय निर्दिष्टे मेघादौ च अदृष्टं कारणं भवेदिति तत्र तत्र अदृष्टस्य अवस्थितिः स्वीकरणीया। अदृष्टं चात्मगुणो न तदाश्रयम् आत्मानं परित्यज्य स्थातुं शक्नोतीति तत्र तत्र आत्मनोऽस्तित्वमपि स्वीकरणीयम्। एतच्च आत्मनो विभुत्वे एव सम्भवति। ननु, आत्मनः अनेकत्वं स्वीकृतम्। प्रत्येकस्य चात्मनो विभुत्वे कथं तेषाम् अवस्थितिः सम्भवेत्? उच्यते, आत्मनां निरवयवत्वाद्, अमूर्त्तत्वाद् वा एकस्मिन् एव स्थाने तेषाम् अवस्थितिर्न विरुध्यते इति।

---

१. सर्वदर्शनसंग्रहः रामानुजदर्शनम्

जीवात्मा नित्योऽपि सन् प्रतिशरीरं भिन्नः, सुखदुःखादेर्वैचित्र्यात् इति जीवात्मनो बहुत्वं नैयायिकानां[१] सम्मतम्। सुखदुःखाद्यधिकरणरूपो जन्ममरणाद्यधीनश्च जीवः। यद्येक एव आत्मा स्यात्, तदा एकस्य जन्मनि सर्वे एव जायेरन् एकस्य मरणे सर्वे अपि म्रियेरन्, एकस्य करणवैकल्ये सर्वेषां करणवैकल्यं स्यात्। नत्वेवं भवति। अपि च, जीवानाम्, अयुगपत् प्रवृत्तिर्दृश्यते, एके धर्मे प्रवृत्ते, अन्येऽधर्मे, वैराग्येऽन्ये। जीवानां त्रिगुणभावविपर्ययश्च दृश्यते। यथा कोऽपि सात्त्विकः सुखी, अन्यो राजसः दुःखी, अन्यस्तामसो मोहवान् इति। अतः जीवात्मनो बहुत्वं सिद्धमिति नैयायिकानां सिद्धान्तः। अस्मिन् विषये सांख्याचार्यैः सह नैयायिकानामैकमत्यं दृश्यते। तथा हि सांख्यकारिकायाम्

जन्ममरणकरणानां प्रतिनियमादयुगपत् प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव।।[२] इति।।

जीवेश्वरयोरभेदो न स्वीकरणीयः। ज्ञानाज्ञानसुखित्वदुःखित्वादिभिः जीवानां परस्परं भेदाद् ईश्वरजीवात्मनोऽपि भेदः सिद्धः। तथाहि कस्यचित् जीवस्य ज्ञानं, कस्यचिद् अज्ञानं, कस्यचित् सुखं, कस्यचिद् दुःखम् इति, 'यद् युगपद् विरुद्धधर्माध्यस्तं तन्नाना' इति नियमाद् जीवानां भेदः स्वीकरणीयः। एकत्वानेकत्वयोश्च एकत्र विरोधेन एकस्य ईश्वरस्य अनेकजीवैः सह अभेदासम्भवात्, जीवेश्वरयोर्भेदः स्वीकरणीयः। अपि च ईश्वरस्य जीवात्मकत्वे कश्चित् संसारीबद्धः, कश्चित् मुक्त इति बन्धमोक्ष व्यवस्थाया अपि अनुपपत्तिः स्यात्, बन्धमुक्तात्मनोः ईश्वराभेदेन ऐक्यात्। श्रुतिप्रसिद्धं तत्त्वमस्यादि-वाक्यं न जीवेश्वरयोः अभेदपरम्, भेदस्य बलवत्तरप्रत्यक्षादिप्रमाणसिद्धत्वात्। किं तर्हि? 'ममात्मा भद्रसेनः' इतिवद् ईश्वरानुरक्तिप्रतिपादकत्वेन औपचारिकोऽयम् अभेदः, न वास्तवः। मोक्षदशायाम् अज्ञाननिवृत्तौ अभेदो जायते इत्यपि न, न्यायमते भेदस्य नित्यत्वेन नाशासम्भवात्। मोक्षदशायाम् अभेदप्रतिपादकं श्रुतिवाक्यम् अपि निर्दुःखत्वादिना साम्यं प्रतिपादयति, सम्पदाधिक्ये 'पुरोहितोऽयं राजासंवृत्तः इति प्रयोगवत्।

वैशेषिकदर्शने आत्मनः अप्रत्यक्षत्वं स्वीकृतम्। उक्तं च महर्षिकणादैः-'तत्रात्मा मनश्चाप्रत्यक्षे'[३] इति। प्रशस्तपादानां मतेऽपि सूक्ष्मत्वहेतोः आत्मनः प्रत्यक्षत्वं न सम्भवति। महर्षिगौतमपादानां न्यायभाष्यकाराणां वात्स्यायनपादानां मतेऽपि एवम्। परन्तु उद्योतकाराणां उदयनाचार्याणां च मते 'अहं जाने', 'अहं सुखी', 'अहं दुःखी',-इत्यादिसुखदुःखादीनां मानसप्रत्यक्षकाले आत्मनोऽपि प्रत्यक्षं भवति। विश्वनाथपादानामपि इदमेव मतम्। तदुक्तं-धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः इति।

---

१. तर्कसंग्रहः पृ.सं. ३९

२. सांख्यकारिका

३. प्रशस्तपादभाष्यम् पृ.सं. १६७

धर्माणामधर्माणां च आश्रयभूतोऽयम् आत्मा। तस्य च आत्मनो योग्यविशेषगुणानां ज्ञानसुखादीनां सम्बन्धेन प्रत्यक्षत्वं सम्भवति, न तु अन्यथा 'अहं जाने' 'अहं करोमि' इत्यादिप्रतीतेः। प्रत्यक्षं चात्र मानसम्, न तु इन्द्रियान्तरजन्यम्, आत्मनः रूपाद्यभावेन इन्द्रियान्तरप्रत्यक्षायोग्यत्वात्। तदुक्तम्– 'मनोमात्रस्य गोचरः' इति। केवलमानसप्रत्यक्षस्य विषयोऽयमात्मा इत्यर्थः। एवं यद्यपि मानसप्रत्यक्षविषयत्वम् आत्मनोऽस्तीति केषाञ्चिद् अभिमतम्, तथापि विप्रतिपन्नैः चार्वाकादिभिः प्रथमत एव शरीरादिभिन्न आत्मा न प्रतिपत्तुं शक्यते इति अनुमानं प्रदर्श्यते–'आत्मेन्द्रियाद्यधिष्ठाता, करणं हि सकर्तृकम्' इति। आत्मा इन्द्रियाणां शरीरस्य च परम्परया चैतन्यसम्पादकः। इन्द्रियाणां जनकतासम्बन्धेन, शरीरस्य च अवच्छेदकतासम्बन्धेन आत्मा अधिष्ठाता इत्यर्थः। इन्द्रियाणां शरीरं च ज्ञात्रधिष्ठितानि, अचेतनत्वे स ति ज्ञानवत्त्वाद् इति अनुमानप्रयोगः। अपि च, इन्द्रियाणां ज्ञानकरणत्वात् तेषां कश्चन कर्ता स्वीकरणीयः। कुठारादीनां छिदादिकरणानां यथा कर्त्तारम् अन्तरेण फलोपधानं न दृश्यते, एवं चक्षुरादीनां ज्ञानकरणानाम् अपि फलोपधानं कर्तारम् अन्तरेण नोपपद्यते। इन्द्रियाणां करणत्वञ्च धर्मिग्राहकप्रमाणसिद्धम्। धर्मिग्राहकप्रमाणं च शब्दाद्युपलब्धयः करणसाध्याः, कार्यत्वात्, छिदादिक्रियावद् इति। एवम् इन्द्रियाणां करणत्वे सिद्धे तैः करणैश्च तेषां कर्ता अनुमीयते, स एव आत्मा। सुखदुःखज्ञानेच्छादिभ्योऽपि आत्मा अनुमीयते। सुखदुःखादयो गुणाः,–गुणाश्च द्रव्याश्रिता इति सुखदुःखादीनाम् आश्रयभूतद्रव्यत्वेन आत्मा अनुमीयते तदुक्तं प्रशस्तपादैः–'सुखदुःखेच्छाद्वेषप्रयत्नैश्च गुणैर्गुण्यनुमीयते इति।

परदेहे तु आत्मा सदैव अनुमानगम्यः। तथा च शरीरे दृष्टैः प्रवृत्त्यादिभिः स आत्मा अनुमीयते। तदुक्तं 'प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः' इति। चेष्टा प्रवृत्ति र्वा प्रयत्नसाध्या इति चेष्टया प्रयत्नवान् आत्मा अनुमीयते इत्यर्थः। अनुमानप्रयोगश्च 'शरीरं प्रयत्नवदधिष्ठितं प्रवृत्तिमत्त्वात् रथवद् इति यथा रथस्य कर्मणा सारथिः अनुमीयते, तथा देहस्य चेष्टात्मकेन कर्मणा परात्मा अनुमीयते इति भावः। अनुमानप्रयोगश्च 'शरीरमिदं चेतनाधिष्ठितं क्रियावत्त्वाद् रथवत् इति।

ननु, 'मनुष्योऽहम्' 'ब्राह्मणोऽहम्' इत्यादौ सर्वत्र अहं प्रत्यये शरीरस्यैव विषयत्वात् 'चेतनोऽहं करोमि' 'जानामि' इत्यादिप्रत्ययेन च शरीरेषु एव चैतन्यस्य आश्रितत्वं दृश्यते इति शरीरमेव ज्ञानाधिकरणम् आत्मेति चेत्। उच्यते–'शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः। मृतेषु देहेषु चैतन्याभाव-दर्शनात् शरीरं न चैतन्यवत्। यदि शरीरं चैतन्याश्रयः कर्त्तृत्वाश्रयश्च स्यात् तर्हि मृतेषु अपि शरीरेषु चैतन्यम् उपलभ्येत, पृथिवीविशेषगुणस्य यावद् द्रव्यभावित्वात् न चोपलभ्यते। तस्मात् न शरीरं ज्ञानाधिकरणम् इति। अपि च शरीरस्य आत्मत्वे करपादादिनाशे सति शरीरनाशाद् आत्मनोऽपि नाशप्रसङ्गः।

ननु, चैतन्यं ज्ञानादिकमेव। तच्च मुक्तात्मनां नास्ति प्राणाभावादिति नैयायिकाः। एवमेव देहात्मवादिनां मतेऽपि मृतशरीरस्य प्राणाभावात् न ज्ञानादिकम् इति शरीरस्य आत्मत्वे स्वीकृते न

काचित्क्षतिरिति चेत् न, शरीरस्य चैतन्ये बाल्ये विलोकितस्य वार्धक्ये स्मरणानुपपत्तेः। यदि शरीरमेव आत्मा स्यात्, तर्हि बाल्ये अनुभूतस्य विषयस्य वार्धक्ये स्मरणं न स्यात्, अनुभवाश्रयस्य बाल्यशरीरस्य वार्धक्येऽभावात्, अनुभवस्मरणयोश्च एककर्तृकत्वनियमात्। न च बाल्यशरीरं वार्धक्येऽपि अस्तीति वाच्यम्, शरीराणाम् अवयवोपचयापचयैः उत्पादविनाशशालित्वात्।

न च पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कारजनकः संस्कार उत्पद्यते इति वाच्यम्, अनन्तसंस्कारकल्पने गौरवात्। शरीरातिरिक्तात्मकल्पेतु लाघवेनैव सिध्यति। अतः शरीरस्य न कर्तृत्वं चेतनत्वं वा। यश्च कर्ता चेतनः, स शरीराद् भिन्न आत्मा एव।

ननु, चक्षुरादीनाम् इन्द्रियाणामेव ज्ञानादिकं प्रति करणत्वं, कर्तृत्वं च अस्तु, विरोधे साधकाभावात्। अतः आह 'तथात्वञ्चेद् इन्द्रियाणामुपघाते कथं स्मृतिः' इति। इन्द्रियाणां चैतन्यं चेत् चक्षुरादीनां नाशे पूर्वं चक्षुरादिना साक्षात्कृतानां स्मरणं न स्यात्, अनुभवितुः अभावात्, अन्येनानुभूतस्य अन्येनस्मरणा सम्भवात्, अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावादिति भावः। भवति च 'योऽहं घटम् अद्राक्षं, सोऽहमिदानीं त्वचा स्पृशामि' इति अनुसन्धानम्। प्रत्येकस्य इन्द्रियस्य आत्मत्वस्वीकारे इन्द्रियविशेषसन्निकर्षेण ज्ञातस्य विषयस्य इन्द्रियान्तरेण स्मरणं न स्यात्। अपि च, प्रत्येकस्य इन्द्रियस्य आत्मत्वे भिन्नानाम् इन्द्रियाणां स्वस्ववाञ्छितवस्तुग्रहणे युगपद् इच्छायां सत्यां शरीरस्य उन्मथनं संघटेत। इन्द्रियपञ्चकानां मिलितानाम् आत्मत्वे इन्द्रियविशेषस्य नाशे आत्मनः अंशविशेषो नष्ट इत्यनुभूतिः स्यात् न तु एवं भवति। अत एव प्रत्येकस्य इन्द्रियस्य, मिलितानाम् इन्द्रियाणां वा आत्मत्वं भवितुं नार्हति। अपि च इन्द्रियाणाम् आत्मत्वे आत्मगतसुखदुःखादीनां प्रत्यक्षं न स्यात्, इन्द्रियाणाम् अणुत्वेन तद्गुणानाम् अप्रत्यक्षत्वप्रसङ्गात्।

ननु, चक्षुरादीनां चैतन्यं मास्तु, मनसस्तु नित्यस्य चैतन्यं स्याद् इति चेत्। उच्यते मनस आत्मत्वे आत्मविशेषगुणानां ज्ञानेच्छादीनां प्रत्यक्षं न स्यात्। गुणप्रत्यक्षे आश्रयद्रव्यस्य महत्त्वम् एव हेतुः। अणुपरिमाणविशिष्टस्य द्रव्यस्य गुणास्तु अतीन्द्रियाः। मनसश्च अणुत्वात् मनस आत्मत्वे आत्मगुणानां सुखदुःखादीनां प्रत्यक्षं न स्यात्। तदुक्तं-'मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत्' इति। मनस आत्मत्वे सुखदुःखादीनाम् आत्मगुणानां प्रत्यक्षानुपपत्तेः मनस आत्मत्वं न स्वीकार्यम् इत्यर्थः। अपि च मनसो ज्ञानलाभे करणत्वं सिद्धम्। यथा बाह्यविषयाणां प्रत्यक्षार्थं चक्षुरादीनां बाह्येन्द्रियाणामुपयोगः तथा आन्तरसुखदुःखादीनां प्रत्यक्षार्थं आन्तरेन्द्रियान्तरस्य प्रयोजनम्। तदेव मन इति नैयायिकानां सिद्धान्तः। आत्ममनसोः एकत्वे सति कर्तृकरणविरोधप्रसङ्ग इति मनस अतिरिक्त आत्मेति उपपन्नम्। तथाहि भामतीकाराः 'बुद्धिमनसोस्तुकरणयोः अहं कर्तेति कर्तृप्रतिभासप्रख्यानालम्बकत्वायोगः इति।

अतः देहेन्द्रियमनोव्यतिरिक्त आत्मा इति सर्वथा-उपपन्नम् इति नैयायिकानां सिद्धान्तः।

न्यायदर्शने तावत् जीवात्मा परमात्मा च आत्मशब्देन व्यपदिश्येते। आत्मनः साधारणलक्षणं तावत् 'ज्ञानाधिकरणम्[१] आत्मा' इति। ईश्वरस्यापि ज्ञानाधिकरणत्वात् लक्षणमिदं तत्रापि प्रयोज्यम्। तत्र ईश्वरस्य ज्ञानं नित्यं, जीवात्मज्ञानं तु अनित्यमिति विवेकः। अत ईश्वरस्य विशेषलक्षणम् उक्तम् नित्यज्ञानाधिकरणत्वमीश्वरत्वम् इति तर्कदीपिकायाम्। एवं नित्यचिकीर्षाधिकरणत्वं नित्यप्रयत्नाधिकरणत्वं च ईश्वरत्वम्।

'आत्मत्वजातिमान् आत्मा'[२] इति लक्षणमपि ईश्वरे अनुगतम्। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यादि श्रुतौ आत्मशब्दव्यवहारेण परमात्मनोऽपि आत्मत्वाङ्गीकारात्। स च ईश्वरः सर्वज्ञः सर्वशक्तिमान् सर्वव्यापी नित्यश्च। जीवात्मनः परमाणवश्च यद्यपि तस्मात् पृथग्भूताः, तथापि सर्वशक्तिमान् स तान् सर्वान् स्वेच्छया नियमयति। स एव लीलावशात् परमाणुसहायेन जगन्निर्मिमीते पूर्व-कल्पानुसारेण। स एव जीवानां कर्मफलं सम्पादयति धर्माधर्मशुभाशुभकर्मानुसारेण सर्वान् स्वर्गनरकादीन् प्रापयति। प्रलयकाले च स एव परमाणुविच्छेदकरणेन सर्वं संहरति। तस्य च निराकाङ्क्षत्वात् जगन्निर्माणे स्वार्थतः परमार्थतो वा न प्रवृत्तिः। किं तर्हि? करुणया प्रवृत्तिरस्त्येवे'ति सर्वदर्शनसंग्रहे। अत ईश्वर करुणामय इति नैयामिकानाम् आशयः। नैयायिकानां मते ईश्वरो न निर्गुणः, अपि तु सगुणः। संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, बुद्धिः, इच्छा प्रयत्नश्च इत्येते अष्टौ गुणा ईश्वरे वर्तन्ते। उक्तं च-संख्यादयः पञ्च बुद्धिरिच्छा यत्नोऽपि चेश्वरे इति। रामभद्रसार्वभौमानां मते तु संख्याबुद्धीच्छाप्रयत्नसुखानीति पञ्चैव ईश्वरस्य गुणाः।

ईश्वरो न ज्ञानस्वरूपः, आनन्दस्वरूपो वा, अपि तु ज्ञानस्य सुखस्य च आश्रयः। 'विज्ञानमानन्दं ब्रह्म' इत्यादौ विज्ञानपदेन ज्ञानाश्रय एव उक्तः, 'यः सर्वज्ञः सर्ववित्' इत्याद्यनुरोधात्। 'आनन्दम्' इत्यस्यापि 'आनन्दवत्' इत्यर्थः, अर्श आदित्वात् मत्वर्थीयः अच् प्रत्ययः। ननु, आनन्दस्य पुण्यफलत्वात् ईश्वरे च पुण्यस्य असम्भवात् कथम् ईश्वरस्य आनन्दवत्त्वम् इति चेत्? उच्यते-आनन्दशब्दोऽत्र दुःखाभावे उपचर्य्यते, माराद्यपगमे 'सुखीसंवृत्तोऽहम्' इति प्रत्ययवत्। ज्ञानसुखेच्छाप्रयत्नादीनाम् ईश्वरगुणानां च नित्यत्वम् अङ्गीकृतं नैयायिकैः।

ईश्वर एक एव। ईश्वरबहुत्वे सति परस्परविरोधेन सृष्टिस्थितिप्रलयविषये अनियमप्रसङ्गात्। तेन च सर्वशक्तिमत्त्वादीनाम् अभावेन ईश्वरत्वस्यैव हानिप्रसङ्गात्। अपि च ईश्वरस्य सर्वज्ञत्वात् सर्वशक्तिमत्त्वाच्च एकेनैव सृष्टिस्थित्यादीनां निर्वाहात् अनेकेश्वरत्वकल्पनायां प्रयोजनाभाव इति एक एव ईश्वरः।

---

१. तर्कसंग्रहः ३९

२. प्रशस्तपादभाष्यम् पृ. १६७

ईश्वरो विभुः। तस्य अणुपरिमाणत्वे सर्वस्य जगतः सृष्टिस्थित्यादौ असामर्थ्यप्रसङ्गात्, मध्यमपरिमाणत्वे च कार्यत्वप्रसङ्गेन अनित्यत्वप्रसङ्गात्। विभुत्वं च सर्वमूर्त्तपदार्थसंयोगित्वं सर्वव्यापित्वं वा। तस्माद् ईश्वरः सर्वव्यापी। सर्वव्यापित्वाच्च तस्य निरवयवत्वं नित्यत्वं च।

ईश्वरः सशरीरः अशरीरो वा इत्यत्र मतभेदोऽस्ति विदग्धानाम्। नैयायिकानां मते ईश्वरः अशरीर एव। न च अशरीरस्य प्रयत्नादिकं न सम्भवतीति वाच्यम्, अशरीरस्यापि आत्मनो यथा स्वशरीरप्रेरणे सामर्थ्यं दृश्यते, तथा ईश्वरस्यापि इच्छामात्रेण जगत्कर्तृत्वादिसम्भवात्।

भारतीयदार्शनिकानां मध्ये केचित् निरीश्वराः, केचित् सेश्वराः। चार्वाकमते ईश्वरो नास्त्येव,[१] प्रत्यक्षप्रमाणेन सिद्ध्यभावात्, अनुमानस्वीकारेऽपि प्रत्यक्षागम्यस्य तस्य अनुमानेन निरूपयितुमशक्यत्वात्। बौद्धा अपि सर्वज्ञबुद्धमुनिव्यतिरिक्तमीश्वरं नाङ्गीकुर्वन्ति। मीमांसकानां मते कर्मैव फलं ददाति, न तु तदतिरिक्त ईश्वरो नाम कश्चित्। न्यायवैशेषिकप्रस्थानेऽपि ये खलु प्राचीनाचार्याः कणादगौतमादयः सूत्रकाराः, तेषां नये क्षित्यंकुरादेः कर्तृरूपस्य कस्यचिद् ईश्वरस्य प्रयोजनम् अस्ति न चेति महती विप्रतिपत्तिर्दृश्यते, सूत्रकृद्भिः स्पष्टतया अनुल्लेखात्। ये खलु नवीना भाष्यकारादयो वात्स्यायनप्रभृतयः, तेषां मते ईश्वरः अस्त्येव प्रमाणसद्भावात्। ननु, ईश्वरस्य अस्तित्वे किं मानम्? नहि ईश्वरः प्रत्यक्षप्रमाणगोचरः। तथाहि-ईश्वरो न बहिरिन्द्रियग्राह्यरूपाद्यभावात्। नापि अन्तरिन्द्रियग्राह्यः सुखदुःखादीनाम् आत्मगुणानां तत्र असत्त्वात्। नापि अनुमानेन ईश्वरसद्भावः साधयितुं शक्यते, लिङ्गसाध्ययोः सामानाधिकरण्यज्ञानम् एव अनुमितौ करणम् अनुमानं वा। लिङ्गज्ञानाभावे तद् अनुमानं न प्रवर्तते। ईश्वरस्य च न किमपि लिङ्गम् अस्तीति अनुमानस्य प्रसक्तिरेव नास्ति। नापि आगमेन ईश्वरः साध्यते, ईश्वरसाधकानाम् आगमवाक्यानाम् अप्रमाणत्वात्। तथाहि ईश्वरोक्तत्वेनैव वेदवाक्यानां प्रामाण्यम् अभिप्रेयते। तत्र ईश्वरे सिद्धे एव वेदानां प्रामाण्यम्, वेदानां प्रामाण्ये सिद्धे च ईश्वरसद्भावसिद्धिः इति अन्योऽन्याश्रयदोषात् नागमेन ईश्वरसिद्धिः, नापि उपमानेन ईश्वरसिद्धिः। सादृश्यज्ञानमेव उपमितिसाधकम् उपमानं वा। ईश्वरसदृशस्तु न कोऽपि पदार्थो दृश्यते इति ईश्वरे उपमानस्य प्रसक्तेः।

तत्रोच्यते मैवम्, ईश्वरस्यास्तित्वे प्रमाणसद्भावात्। यद्यपि ईश्वरो न लौकिकप्रत्यक्षगोचरो भवति तथापि अलौकिकप्रत्यक्षेण स गृह्यते, यतः योगसाधनलभ्यधर्मसहकृतेन मनसा योगिन ईश्वरं प्रत्यक्षीकुर्वन्ति। तदुक्तम् उदयनाचार्येण-'कैश्चित् साक्षादपि दृश्यते' इति। 'अपितु प्रत्यक्षरूपं तत्तद्धेतुः' इति च वर्धमानोपाध्यायाः।

अनुमानेन च ईश्वरसद्भावः साध्यते। तथाहि-क्षित्यंकुरादिकं[२] सकर्तृकं कार्यत्वात् घटवद् इति। कार्यत्वहेतुकम् अनुमानम् इदम्। यद् यत् कार्यं तत् तत् चेतनकर्तृजन्यम् इति हि व्याप्तिः। यथा

---

१. लोकसिद्धो नृपः ईश्वरः इति सर्वदर्शनसंग्रहः

२. न्यायसिद्धान्तमुक्तावली पृ.सं. ४

घटपटादेः सावयवत्वेन कार्यत्वसिद्धिः, तथा क्षित्यङ्कुरादेः भूधरसमुद्रादेश्च सावयवत्वेनैव कार्यत्वम् अवगन्तव्यम्। कार्यत्वे च तेषां सिद्धे चेतन-कर्तृजन्यत्वं स्वत एव आयाति। कर्तृत्वं च उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम् इति सर्वजगत्-कर्त्तृत्वं नाम सर्वज्ञानवावं, सर्वचिकीर्षामत्त्वं सर्वशक्तिमत्त्वं च। तच्च कर्तृत्वं नास्मदादीनां सम्भवति, अस्मदादीनां स्वल्पज्ञानवत्त्वात् स्वल्पशक्तिमत्त्वाच्च। अतः अस्मदादिव्यतिरिक्तः कश्चित् नित्यः सकलकारणज्ञानवान् सर्वज्ञो वा, सकलकार्यनिर्माणेच्छावान् इच्छामयो वा, सकलकार्यसाधकप्रयत्नवान् सर्वशक्तिमान् वा पुरुषो जगत्कर्तृरूपः स्वीकरणीयः। स एव ईश्वर इति। अनुमानान्तरञ्च प्रदर्श्यते–परमाण्वादयः चेतनायोजिताः प्रवर्तन्ते, अचेतनत्वात् वास्यादिवद् इति अयोजनरूपहेतुकम् अनुमानम् इदम्। यथा वास्यादयः अचेतनत्वात् वृक्षच्छेदनरूपादिकार्यं स्वत एव सम्पादयितुं न शक्नुवन्ति, तद्वत् परमाणवोऽपि स्वत एव जगन्निर्मातुं न समर्था इति तेषां कश्चन आयोजकः अनुमेयः। येन च ते आयोजिताः स ईश्वरः।

एवं धृतेः अपि। तथाहि क्षित्यादिब्रह्माण्डपर्यन्तं हि जगत्साक्षात्परम्परया वा विधारकप्रयत्नाधिष्ठितं गुरुत्वे सति अपतनधर्मकत्वाद् विमति विहङ्गमशरीरवत् तत् संयुक्तद्रव्यवच्च। जगतः संहरणाद् अपि। तथाहि ब्रह्माण्डादिद्व्यणुकपर्यन्तं जगत् प्रयत्नवद् विनाश्यं विनाश्यत्वात् पाठ्यमान पटवत्। पदाद्-वृद्धव्यवहाराद् अपि। तथाहि, घटादिव्यवहारः, स्वतन्त्रपुरुषविश्रान्तो व्यवहारत्वात् चैत्रमैत्रादिपदवत्। प्रत्ययात्-प्रामाण्याद् अपि। तथाहि आगमसम्प्रदायोऽयं कारणगुणपूर्वकः प्रमाणत्वात् प्रत्यक्षादिवत्। श्रुतेः अपि तथाहि, सर्वज्ञप्रणीता वेदाः वेदत्वात्। यत् पुनर्न सर्वज्ञप्रणीतं नासौ वेदः यथा इतरवाक्यम्। वाक्याद्-अन्वयाद् अपि। तथाहि, वेदवाक्यानि पौरुषेयाणि वाक्यत्वाद् अस्मदादिवाक्यवत् भारतवद् वा। संख्याविशेषाद् अपि। तथाहि परमाणुद्वित्वं द्व्यणुकत्रित्वं वा अपेक्षा बुद्धिजन्यम् अनेकवृत्तिसंख्यात्वात्। न चास्मदादीनाम् अपेक्षाबुद्धिः परमाणुषु सम्भवति। तद् यस्यासौ सर्वज्ञः। अन्यथा अपेक्षाबुद्धेः अभावात् संख्यानुत्पत्त्या महत् परिमाणत्र्यणुकानुत्पत्तौ विश्वानुत्पत्तिप्रसङ्गः।

सर्वम् एतद् उक्तम् उदयनाचार्येण 'कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः। वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः।। इति।।

एवं च मुख्यतया अनुमानेनैव ईश्वरसिद्धिरिति नैयायिकाः।

श्रुतिप्रमाणम् अपि ईश्वरानुमानं द्रढ़यति। 'यः सर्वज्ञः स सर्ववित्'– इत्यादि आगमोऽपि तत्र प्रमाणम् इति तर्कसंग्रहे। 'द्यावाभूमी जनयन् देव एको विश्वस्य कर्ता भुवनस्य गोप्ता' इत्यादय आगमा अपि अनुसन्धेया इति कारिकावल्याम्। 'एक एव रुद्रो न द्वितीयावतस्थे' इत्यादिः आगमस्तत्र प्रमाणम् इति च सर्वदर्शनसंग्रहे।। इति शम् ।।

जैनदर्शने पर्यायविवेचनम्

डॉ. कुलदीपकुमारः

पर्यायः जैनदर्शनस्यातीव महत्त्वपूर्णो विषयः। पर्यायो नाम वस्तुनः अंशः। ध्रुवान्वयीसहभुवभेदेन अथवा क्षणिकव्यतिरेकीक्रमभाविभेदेनायञ्च अंशः द्विप्रकारकः। अन्वयीगुण इत्युच्यते व्यतिरेकी च पर्यायः। गुणानां विशेषपरिणमनरूपः पर्यायो भवति। अंशापेक्षयांशद्वयमपि पर्याय एव, तथापि केवलव्यतिरेक्यंश एव पर्यायः कथ्यते।

जैनदर्शनानुसारं प्रत्येकं वस्तु नित्यानित्यात्मकमस्ति। सांख्यदर्शने वस्तु सर्वथा नित्यं बौद्धदर्शने चानित्यम्। परन्तु जैनदर्शनानुसारं विश्वस्मिन् जगत्येकमपि वस्त्वेतादृशं नास्ति यत् सर्वथा अनित्यं नित्यं वा। अत्र वस्तु समानकाले नित्यमनित्यञ्च भवति।

केचन सामान्यापेक्षया पर्यायं क्रियामपि वदन्ति। परन्तु पर्यायक्रिययोः बह्वन्तरमस्ति। क्रियायां वस्तुनः चलनादिरूपः स्थूलपरिणामः पर्यायस्तु सूक्ष्मपरिणामः। प्रत्येकं वस्तु द्रव्यात्मकं पर्यायात्मकं चास्ति अतः सर्वं वस्तु नित्यमनित्यञ्च। द्रव्यस्य लक्षणं सत्त्वं गुणपर्यायानां समूहो वा। यथा जीवे सुखज्ञानादिगुणाः नरनार्यादिपर्यायाः सन्तीति इति तत्र द्रव्यलक्षणस्य समन्वयः। गुणपर्यायानां द्रव्यात् पृथक् सत्ता नास्ति। अतः एवं न मन्तव्यं यत् गुणाः पृथक् सन्ति पर्यायाः पृथक् इति। तेषां मेलनेन द्रव्यं भवतीति च। किन्त्वनादिकालात् गुणपर्यायात्मकमेव द्रव्यम्। साधारणतया गुणाः नित्याः भवन्ति पर्यायाश्च अनित्याः। अत एव द्रव्यं नित्यमनित्यञ्च। यद् वस्तु नित्यानित्योभयात्मकं भवति तदेव सत् भवति। यत्त्वेकान्तनित्यमनित्यमात्रं वा तद्वस्तु कदापि सन्न भवति। यतोहि–

'उत्पादव्ययध्रौव्ययुक्तं सत्'[1] इति हि सतः लक्षणम्। अस्यायमर्थः यत् यस्मिन् सर्वदा उत्पत्तिः विनाशः स्थिरता च भवति तदेव सदिति। यथा सुवर्णात् आभरणनिर्माणकाले तस्य पिण्डस्य पर्यायो नष्टो भवत्याभरणपर्याय उत्पद्यते। सुवर्णञ्च स्थिरपर्यायेण भवति। अत्र पिण्डपर्यायस्य नाश आभरणपर्यायस्युत्पत्तिश्च पृथक्-पृथक् समये न भवतः। किन्तु सर्वेषामुत्पत्तिस्थितिलयरूपर्यायानां

१. तत्त्वार्थसूत्रम्, ५/३०

समानकाल एवावस्थितिः। अत एव वस्तु प्रतिसमयमुत्पादव्ययध्रौव्यात्मकं कथ्यते। आचार्यकुन्दकुन्ददेवैः प्रवचनसारग्रन्थे चोक्तं–यत् उत्पादव्ययध्रौव्यानि पर्यायेषु भवन्ति। पर्यायाश्च नियमत द्रव्य एव भवन्ति। अतः इदं सर्वं द्रव्यमेव।'[१]

किञ्च द्रव्यमेवैकस्मिन्नेव समये उत्पत्तिस्थितिनाशनामकैरर्थैः सह सम्बद्धं भवति। अतः एतेषां त्रयाणां समुदाय एव वस्तुतो द्रव्यम्[२] अपि च द्रव्यस्य पर्याया उत्पद्यन्ते नश्यन्ति च किन्तु द्रव्यं नोत्पद्यते न च नश्यत्यतो ध्रुवं भवति'।[३]

जैनदर्शनस्य सिद्धान्तमेनं महर्षिपतञ्जलिरपि प्रतिपादयति। यथा– 'द्रव्यं नित्यम्, आकृतिश्च नित्या। सुवर्णं कयाचिदाकृत्या युक्तं पिण्डो भवति, पिण्डाकृतिमुपमृद्य रुचकाः क्रियन्ते, रुचकाकृतिमुपमृद्य कटकाः क्रियन्ते, कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते। पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाऽऽकृत्या युक्तः खादिरांगारसदृशे कुण्डले भवतः। आकृतिरन्या चान्या च भवति, द्रव्यं पुनस्तदेव, आकृत्युपमर्देन द्रव्यमेवावशिष्यते।'[४]

महर्षिपतञ्जलेरेतत्कथनानुसारमिदं स्पष्टं भवति यत् सर्वं वस्त्वेककाले नित्यानित्यात्मकं भवतीति।

आचार्यसमन्तभद्रेण स्वकीयाप्तमीमांसाग्रन्थे दृष्टान्तद्वयमाध्यमेन द्रव्यस्य रूपत्रयात्मकतां साधयति। यथा–

घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयम्।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम्।।[५]

कस्यचित् राज्ञ एकः पुत्रः एका पुत्री चासीत्। राज्ञः सविधे सुवर्णघट एक आसीत्। पुत्री तमेव घटमिच्छति स्म। किन्तु पुत्रस्तस्य घटस्य सुवर्णमादाय किरीटं निर्मापयितुमिच्छति स्म। राजा

---

१. "उप्पादट्ठिदिभंगा किज्जंते पज्जएसु पज्जाया।
दव्वे हि संति णियदं तम्हा दव्वं हवदि सव्वं।।"
–प्रवचनसार, गाथा–१०१

२. "समवेदं खलु दव्वं संभवठिदिणास सण्णिदट्ठेहिं।
एकम्मि चेव समये तम्हा दव्वं हवदि सव्वं।।"
–प्रवचनसार, गाथा–१०२

३. "पाडुब्भवदि य आण्णे पज्जाओ पज्जओ वयदि अण्णो।
दवस्स तं पि दव्वं णेव पणट्ठं ण उप्पण्णं।।"
–प्रवचनसार, गाथा–१०३

४. महर्षिपतञ्जलिमहाभाष्ये पस्पशाह्निकम्।

५. आप्तमीमांसा, श्लोकः–५९

पुत्रस्य सन्तोषार्थं घटं भित्त्वा तस्य सुवर्णात् किरीटं निर्मापितवान्। घटस्य नाशात् पुत्र्यः बहु दुःखमभवत्। राज्ञस्तु न सुखं न दुःखं यतोहि सः सुवर्णमेवैच्छत् यच्च घटस्य भेदनात् परमपि तिष्ठत्येव। एवं सर्वं वस्तु त्रयात्मकमिति दृष्टान्तेनानेन वक्तुं शक्यते। अत्रान्यदप्युदाहरणं वर्तते। यथा– यो दुग्धमेव पातव्यमिति व्रतं स्वीकरोति, स दधि न खादति। यस्य दधिमात्रपानव्रतं तेन दुग्धं न पीयते। किन्तु यस्य गोरसमात्रास्वीकरणं व्रतं, तेन न दुग्धं न दधि स्वीक्रियते, यतो दधिदुग्धयोः गोरसस्य पर्यायत्वम्। गोरसत्वमुभयनिष्ठम्। अनेनेदं सिद्ध्यति यद्वस्तु त्रयात्मकमिति। यथा–

"पयोव्रतो न दध्यत्ति न पयोऽत्ति दधिव्रतः।[१]
अगोरसव्रतो नोभे तस्मात्तत्त्वं त्रयात्मकम्।।"

मीमांसादर्शने कुमारिलभट्टा अपि वस्तुन उत्पादव्ययध्रौव्यस्वरूपत्वमङ्गीकुर्वन्ति ते स्वमतं स्पष्टीकर्तुं समन्तभद्रस्वामिनो दृष्टान्तं स्वीकुर्वन्ति। यथा–

"वर्धमारकभंगे च रुचकः क्रियते यदा।
तथा पूर्वाथिनः शोकः प्रीतिश्चाप्युत्तरार्थिनः।।

हेमार्थिनस्तु माध्यस्थ्यं तस्माद्वस्तु त्रयात्मकम्।
नोत्पादस्थितिभंगानामभावे स्यान्मतित्रयम्।।

न नाशेन विना शोको नोत्पादेन विना सुखम्।
स्थित्या विना न माध्यस्थ्यं तेन सामान्यनित्यता।।[२]" इति

एवमिदं सुस्पष्टं भवति यत् द्रव्यमेकं प्रतिसमयमुत्पादव्ययध्रौव्यस्वरूपं भवतीति। अत एव तत् द्रव्यदृष्ट्या नित्यं पर्यायदृष्ट्या चानित्यं भवति।

पर्यायनिरुक्तिः–

जैनवाङ्मये तत्र तत्र पर्यायस्य लक्षणानि महत्त्वपूर्णान्युपलभ्यन्ते। तेषु कानिचनात्र प्रदर्श्यन्ते–

(क) 'परि समन्तादयः पर्यायः।'[३] सर्वस्मात् भेदप्राप्तिरस्यार्थः।

(ख) 'स्वभावविभावरूपतया याति पर्येति परिणमतीति पर्याय इति पर्यायस्य व्युत्पत्तिः'।[४] स्वभावविभावरूपेण गमनं परिणमनं वास्यार्थः।

---

१. आप्तमीमांसा, श्लोकः–६०
२. मीमांसाश्लोकवार्तिकं, श्लोकः, २१-२३
३. तत्त्वार्थवार्तिकम्, १/३३/१
४. आलापपद्धतिः, पृष्ठ–१४०-४१

(ग) 'पर्यायो विशेषोऽपवादो व्यावृत्तिरित्यर्थः'।[१] विशेषः अपवादः व्यावृत्तिश्चास्यार्थः।

(घ) 'तस्य मिथो भवनं प्रति विरोध्यविरोधिनां धर्माणामुपात्तानुपात्तहेतुकानां शब्दान्तरात्मलाभ-निमित्तत्वाद् अपितु व्यवहारविषयोऽवस्थाविशेषः पर्यायः।'[२]

(ङ) 'पर्यायाणामेतद्धर्मो यत्त्वंशकल्पनं द्रव्यं, स च परिणामावस्था तेषामेव गुणानामेव।[३]

(च) 'तद्भावः परिणामः।'[४] प्रतिसमयं परिणामशालित्वमस्यार्थः। परिणामशब्दः पर्यायार्थ एव।

(छ) 'सामान्यविशेषगुणा एकस्मिन् धर्मिणि वस्तुत्वनिष्पादकास्तेषां परिणामः पर्यायः।'[५]

पर्यायसमानार्थका शब्दाः–

जैनसाहित्ये पर्यायस्यानेके समानार्थकाः शब्दा उपलभ्यन्ते। यथा–

(क) 'पर्यायो विशेषोऽपवादो व्यावृत्तिरित्यर्थः।'[६]

(ख) 'व्यवहारो च वियप्पो भेदो तह पज्जओ एयट्टो।'[७]

(ग) 'पर्ययः पर्यवः पर्याय इत्यनर्थान्तरम्।'[८]

(घ) 'अपि चांशः पर्यायो भागो हारो विधा प्रकारश्च। भेदश्छेदो भंगः शब्दाश्चैकार्थवाचका एते'।[९]

पर्यायभेदाः–

जैनग्रन्थेषु पर्यायभेदानामपि वर्णनं बहुधा कृतमस्ति। यथा–

(क) 'द्विधा पर्यायः द्रव्यपर्याया गुणपर्यायाश्च।'[१०]

(ख) 'यः पर्यायः स द्विविधः क्रमभावी सहभावी चेति।'[११]

---

१. सवार्थसिद्धिः, १/३३/१४/१
२. राजवार्तिकम् , १/२९/४/८५/४
३. पञ्चाध्यायी पूर्वार्द्धः, श्लोकसंख्या, २६, ११७
४. तत्त्वार्थसूत्र, ५/४२
५. श्रुतभवनदीपकनयचक्रं, पृष्ठ संख्या–७५७
६. सर्वार्थसिद्धिः, १/३३
७. गोम्मटसारजीवकाण्डं, गाथा–५७२
८. स्याद्वादमञ्जरी, २३/२७२/११
९. पञ्चाध्यायी पूर्वार्द्धः, श्लोकसंख्या–६०
१०. पञ्चास्तिकायटीका, १६/३५
११. श्लोकवार्तिकम्, १/३३/६०

(ग) 'पर्यायास्ते द्वेधा स्वभावविभावपर्यायभेदतः।'[१]

(घ) 'अथवा द्वितीयप्रकारेणार्थव्यञ्जनपर्यायरूपेण द्विधा पर्याया भवन्ति।'[२]

(ङ) 'स्वभावपर्यायस्तावत् द्विप्रकारेणोच्यते कारणशुद्धपर्यायः कार्यशुद्धपर्यायश्चेति'।[३]

(च) 'सुहुमा अवायविसया खणखइणो अत्थपज्जया दिट्ठा।
वंजणपज्जाया पुण थूला गिरगोयरा चिरवितत्था।।'[४]

पर्यायस्य अर्थपर्यायव्यंजनपर्यायरूपेण भेदद्वयमस्ति। तत्रार्थपर्यायः सूक्ष्मः। अतः अवायविषयस्तावत् शब्दगोचरः प्रतिक्षणं परिवर्तनशीलश्च भवति। व्यंजनपर्यायस्तु स्थूलः शब्दगोचरः स्थिरश्च भवति।

यथोक्तं–'सद्दो बंधो सुहुमो थूलो संठाणभेदतमछाया।
उज्जोदादवसहिया पुग्गलदव्वस्स पज्जाया।।'[५]

---

१. आलापपद्धतिः, पर्यायाधिकार, सूत्र-१६
२. पञ्चास्तिकायटीका, १६/३६
३. नियमसारटीका, गाथा-१५
४. वसुनन्दिश्रावकाचारः, गाथा-२५
५. वृहद्द्रव्यसंग्रहः, गाथा-१६

भावनापुरस्सरम् अपूर्वविमर्शः

श्रीशङ्कर एम् हेब्बारः

पुरस्ताद्भावनामुक्त्वा अपूर्वप्रतिपादने।
विमर्शरूपिणीं बुद्धिं दृष्ट्वा माता प्रसीदतु।।

शाब्दबोधेनैव वाक्यार्थप्रतिपत्तिरिति मन्वमानाः दर्शनविदः तत्र नैकं पन्थानं समाश्रयन्ति। तत्र वैयाकरणाः धात्वर्थमुख्यविशेष्यकशाब्दबोधम्, नैयायिकाः प्रथमान्तमुख्यविशेष्यकशाब्दबोधम्, मीमांसकैकदेशिनः प्राभाकराः कार्यमुख्यविशेष्यकशाब्दबोधम्, मीमांसकैकदेशिनः भाट्टाः भावनामुख्य-विशेष्यकशाब्दबोधञ्च प्रतिपादयन्ति। अत्र मुख्यतया विचार्यमाणे वाक्यशास्त्रे सकलवैदिकवाक्यानां प्रवर्त्तनानिवर्त्तनान्यतरज्ञानोत्पादकरूपेण वा प्रवृत्तिनिवृत्त्यन्यतरज्ञानोत्पादकरूपेण वा प्रवर्त्तनाशैध्र्य-निवर्तनाशैघ्र्यान्यतरज्ञानोत्पादकरूपेण वा वाक्यार्थ इति ब्रुवन्ति वाक्यशास्त्रविदः। तदेव "आम्नायस्य क्रियार्थत्वात्[१]" इति अर्थवादाधिकरणपूर्वपक्षसूत्रे समेषां वैदिकवाक्यानां प्रवृत्तिनिवृत्तिरूपक्रियायां तात्पर्यावधारणादक्रियाबोधकार्थवादानां प्रामाण्यं न स्यादित्याक्षिप्य, "विधिनात्वेकवाक्यत्वात्[२]" इति सिद्धान्तसूत्रेण विधिवाक्येन सह अर्थवादानां प्रामाण्यं स्थापितम्। "तस्मादाम्नायस्य क्रियार्थत्वात्" इति सूत्रं सकलाः वेदाः क्रियामेव प्रतिपादयन्तीति स्वीकरणे प्रमाणम्भवति। अपि च तद्भूताधिकरणे "तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्[३]" इत्यनेन सूत्रेण तेषु पदार्थेषु विद्यमानानां पदानाम् अंशत्रयविशिष्टभावनाप्रतीतिरूपप्रयोजनोद्देशेन सम्भूयोच्चारणं वाक्यार्थस्य पदार्थनिमित्तत्वादिति प्रदर्शितम्। अतोऽत्र क्रियामुख्यविशेष्यभूता भावना एव सर्वत्र वाक्यार्थ इति भाट्टाः। भावनामुख्यविशेष्यक-शाब्दबोधप्रतिपादकाः कौमारिलाः तत्र "भावप्रधानमाख्यातम्[४]" इति स्मृतिप्रमाणं दर्शयन्ति। एवं यजेत स्वर्गकाम इति तिङन्तक्रियापदे विद्यमान 'त' प्रत्ययः अंशद्वयं बोधयति। लिङ्त्वम् आख्यातत्वञ्च।

१. जैमिनिसूत्रम् १.२.१
२. जैमिनिसूत्रम् १.२.७
३. जैमिनिसूत्रम् १.१.२५
४. यास्कस्मृतिः।

न्यायप्रकाशादिषु 'उभाभ्यामप्यंशाभ्यां भावनोच्यते' इति ग्रन्थेन स्पष्टमुक्तम्। तस्यां च भावनायां शाब्दी, आर्थी चेति विशेषद्वयम्। लिङ्प्रत्ययेन प्रवर्त्तनारूपा शाब्दीभावना, आख्यातप्रत्ययेन च प्रवृत्तिरूपाऽऽर्थीभवना प्रतीयते। द्वेऽपि भावने साध्यसाधनेतिकर्तव्यतारूपे। इतिकर्तव्यता नाम करणगतशक्त्यादायको व्यापारः।

शाब्दीभावना–

लिङा प्रतीयमानायाः प्रवर्तनात्मिकायाः शाब्दीभावनायाः साध्याकाङ्क्षायाम् आख्यातांशेन प्रतीयमाना, प्रवृत्त्यात्मिका, अंशत्रयविशिष्टाऽऽर्थीभावनाऽन्वेति। प्रवृत्तिं प्रति प्रवर्तनायाः कारणत्वात्। तथैव साधनाकाङ्क्षायां प्रवर्तनाप्रतिपादकः लिङ्प्रत्ययः करणत्वेनाऽन्वेति। इतिकर्तव्यताऽऽकाङ्क्षायां प्रवर्तनाशैघ्र्यमाकाङ्क्षमाणः प्राशस्त्याऽप्राशस्त्याऽन्यतरात्मिकोऽर्थवादोऽन्वेति। अत्र प्रवर्त्तनारूपः शब्दात्मकव्यापारः लिङ्शब्देन बोध्यमानत्वादस्याः शाब्दीभावना इत्यभिधानम्।

आर्थीभावना–

आख्यातेन प्रतीयमानायाः प्रवृत्त्यात्मिकाया आर्थीभावनायाः साध्याकाङ्क्षायां प्रमाणान्तरेण प्राप्तं फलम् अन्वेति। साधनाकाङ्क्षायां धात्वर्थः करणत्वेन अन्वेति। यतोऽहि फलं प्रति क्वचित् क्रियाविशेषस्यैव सर्वत्र कारणत्वात्। इतिकर्तव्यताकाङ्क्षायां प्रधानक्रियाप्रतिपादिकाऽवान्तरक्रियाऽन्वयं प्राप्नोति। यथा पचेत् इत्यत्र पाकक्रियानिर्वर्तनानुकूला फूत्काराद्यवान्तरक्रियाऽन्वयं प्राप्नोति तथैव सर्वत्र।

अत्र शाब्दीभावनाया आर्थीभावनया सह स्वज्ञानजन्यानुमितिप्रयोज्यत्वसंसर्गेण अन्वय इति खण्डेदवः[१]।

शाब्दबोधे यजेत स्वर्गकामादिवाक्ये शाब्दीभावनायाः साध्यसाधनयोरव्यवहितपूर्ववृत्तित्वं दृश्यते। यथा प्रवर्तनानन्तरं प्रवृत्तिर्भवति। तादृशप्रवृत्तिः कृतिरूपा। तत्र प्रधानयागहोमादिक्रियायां तदवान्तरक्रियाः झटित्येवान्वयं प्राप्नुवन्ति, अव्यवहितपूर्ववृत्तित्वेन। परन्त्वत्र प्रधानक्रिया यागहोमादय एवं तदुद्देशरूपं फलं तयोरव्यवहितपूर्ववृत्तित्वं न घटते। किन्तु व्यवहितत्वमेव। अपि च कालान्तरभाविस्वर्गादिफलं प्रति याग एव करणमित्यत्र शब्द एव प्रमाणं न प्रत्यक्षादयः। तथाऽपि यदा फलं भवति तदा यागो न तिष्ठति। यदा यागः नश्यति (समाप्तिर्भवति) तदा झटिति फलं नोत्पद्यते, इत्यनेन कारणेन फलयागयोः साध्यसाधनभावः शब्दप्रमाणेन स्वीक्रियते चेदपि प्रत्यक्षविरोधः। यथा लोके मर्दनानन्तरमेव मर्दनसुखं भवति, तथा सर्वत्र कार्यकारणयोरव्यवहितपूर्ववृत्तित्वमनिवार्यमेव। अत्र तु ऐहिकं फलं जन्मान्तरे सम्भवति चेदपि कार्यकारणयोः महदन्तरं दृश्यते। तस्मात्,–

१. भाट्टरहस्यम्।

चित्रापशुफलत्वादिविषयाश्चोदना मृषा[१]।
प्रत्यक्षाद्यधिकारेऽपि तैरर्थासङ्गतिर्यतः।।

तस्मात् काले विद्यमानकर्म कालान्तरे फलं न यच्छतीत्याक्षेपे—

न, तत्र यागानन्तरं फलप्राप्तिपर्यन्तं विद्यामानः कश्चित् शक्तिविशेषः कल्प्य इति। यदि यागफलयोर्मध्ये शक्तिविशेषः कल्प्यते तदा तत्कल्पनापेक्षया क्लृप्तः यागध्वंस एव फलं ददाति इत्यङ्गीकरणं लाघवं स्यात्। स तु नित्यः। फलप्राप्तिपर्यन्तं स्थितः स अस्मिन् जन्मनि वा जन्मान्तरे वा फलं प्रयच्छतीति स्वीकरणं युक्तम् इति चेत् न, ध्वंसस्यैव व्यापारत्वेन स्वीकर्तव्ये ध्वंसस्य नित्यत्वात् "धर्मः क्षरति कीर्तनात्", "प्रायश्चित्तेन नश्यन्ति पापानि सुमहान्त्यपि" इत्यादिशास्त्रविरोधः समुपपद्येत। ध्वंसस्य नित्यत्वात् कीर्तनेन वा प्रायश्चित्तेन वा नाशासम्भवात्। द्वितीयो दोषः— अङ्गवैकल्ये काम्यस्य निष्फलत्वाधिकरणविरोधः[२]। तत्र काम्यकर्मणामङ्गलोपे फलाभाव इति सिद्धन्तितम्। यागध्वंसस्य फलदानपक्षे तु यागे क्वचित् अङ्गलोपेऽपि यागध्वंसः जायते इति हेतोः लुप्ताङ्गेन यागेनाऽपि स्वर्गादिकल्पनाप्रसङ्गः। तन्न भवति। तदुक्तम्—

प्रधानानुष्ठितौयद्वज्जीवनस्य निमित्तता।
काम्यस्य न तथा यस्मात् काम्यं त्यक्तुं न शक्यते।।[३] इति।

तृतीयो दोषः—

यागध्वंसोऽभावात्मकः। तादृशयागध्वंसरूपाभावः भावरूपं फलं जनयितुं न समर्थः। भावरूपफलस्य करणं भाव एव भवेत् नत्वभावः। तस्मात् यागध्वंसोऽभावात्मकत्वात् न स्वर्गादिफलं जनयति। एवं तर्हि नित्यनैमित्तिककर्माकरणे प्रत्यवाय उच्यते खलु इति चेत्— तत्र प्रत्यवायस्य इदं निमित्तम्—

स्वकाले यदकुर्वस्तु करोत्यन्यदचेतनः।
प्रत्यवायोऽस्य तेनैव नाभावे न स जन्यते।।[४]

तस्मात् यागस्वर्गयोस्सम्बन्धः न यागध्वंसेन सिद्ध्यति।

चतुर्थदोषः यथा-यागध्वंसस्य नित्यत्वात् यागध्वंसः फलानन्तरमपि तिष्ठति। एवं सति फलानन्तरमपि फलस्य कल्पनाप्रसक्तिः। परन्तु मीमांसकमते यागादिजन्यं फलं क्षणिकम्। तस्मात् यागफलयोस्सम्बन्धः यागध्वंसरूपव्यापारेण न कर्तुं शक्यत इति निश्चप्रचम्।

---

१. श्लोकवार्त्तिकस्य चित्राक्षेपवादः २
२. भाट्टदीपिका ६.३.२
३. शास्त्रदीपिका – ६.३.३
४. तन्त्रवार्त्तिकम्।

तर्हि देवता एव फलं ददाति इति स्वीकरणीयम्। देवतोद्देशेन द्रव्यत्यागो यागः। तत्र लक्षणे उद्देशरूपेण स्थिता देवता एव फलं प्रयच्छति। मन्त्रपूर्वकं त्यक्तेन द्रव्येण तुष्टा देवता फलं जनयितुं समर्था। यद्यङ्गलोपः स्यात् तदा अतुष्टा देवता न फलदाने समर्था इत्यपि निर्वक्तुं शक्यत्वात्। अत्र प्रमाणम् "तृप्त एवैनमिन्द्रः प्रजया पशुभिश्च तर्पयति"[१] इत्यादिवैदिकवाक्यानि वर्तन्ते। तस्मात् देवताप्रसादस्यैव फलजनकत्वं युक्तम् इति चेत्–

न। द्रव्यत्यागेन तृप्ता देवता फलं प्रयच्छतीति स्वीकारे देवताविग्रहादयः प्रतिपादनीयाः। तद्यथा–

विग्रहो हविषाम्भोगः ऐश्वर्यञ्च प्रसन्नता।
फलप्रदानमित्येतत् पञ्चकं विग्रहादिकम्।। इति।

तस्मात् अग्नये च प्रजापतये च इत्यत्र देवता वाचकस्य चतुर्थीप्रकृतित्वेन शब्दस्य उच्चारणमात्रं यागशरीरप्रविष्टिमिति केवलमग्निरित्यानुपर्वीविशिष्टशब्दमात्रं देवता इति। एवं च देवतायाः फलप्रदातृत्वलक्षणं प्रधानशब्दादेव ज्ञायते इत्याक्षेपात् यजेत स्वर्गकाम इत्यत्र विधेयस्य यागस्य स्वर्गादिफलेन सह सम्बन्धकल्पनात् तस्यैव करणत्वेन फलदातृत्वावगमात्। अपि च देवताधिकरणसूत्रे उक्तम् "अपि वा शब्दपूर्वत्वात् यज्ञकर्मप्रधानं स्यात् गुणत्वे देवताश्रुतिः"[२] इति। तस्मात् यागे द्रव्यं यथा गुणः तथा देवताऽपि गुण इति। यदि यागस्य फलं प्रति व्यवहितत्वेन देवतायाः फलदातृत्वं कल्प्यते, तर्हि गुणभूतदेवता ततोऽपि व्यवहिता स्यात्। अतः देवतोद्देशेन द्रव्यत्यागरूपयागस्य द्रव्यदेवतयोरपेक्षया प्रधानत्वात् तस्यैव फलं प्रति करणत्वमुक्तम्। देवतासम्बन्धस्तु द्रव्याणाम् उद्देशाकाङ्क्षानिर्वाहाय एवं शब्दोच्चारणरूपादृष्टार्थमेव न तु तस्याः साक्षात् फलकरणत्वं सम्भवति। फलं प्रति परम्परया सम्बन्धस्तु विद्यत एव। एवञ्च "तृप्त एवैनमिन्द्रः प्रजया पशुभिश्च तर्पयति" इत्यादिप्रमाणं यत् दर्शितं तत् अर्थवाद इति। अर्थवादानां स्वार्थे प्रामाण्याभावात्। तस्य विध्यैकवाक्यतया प्रामाण्यस्वीकारः। अतः सकृदुच्चरितस्य शब्दस्य अनेकार्थबोधकत्वाभावनियमानुरोधेन शाब्दबोधत्वावच्छिन्नं प्रति तात्पर्यज्ञानस्य कारणत्वानुरोधेन च अर्थवादानां शक्यार्थे प्रामाण्यानुपपत्तेः न देवताविग्रहादिस्वीकारः।

एवं तर्हि यागानन्तरं फलप्राप्तिपर्यन्तं विद्यमानः कश्चित् शक्तिविशेषः कल्प्यः। तत् कल्प्यते चेदपि यागस्वर्गयोः साध्यसाधनभावः व्याहन्येत। अपि च तं शक्तिविशेषं यागे कल्पयितुं न शक्यते। प्रत्यक्षेणैव तस्य नाशात्। एवमत्र शक्तिस्तु कल्प्यः, यागध्वंसस्यैव व्यापारत्वेन तत्कल्पनं लाघवमिति न च वाच्यम्। लाघवं चेदपि तस्य फले अन्वयानुपपत्तिः, सिद्धान्तविरोधश्च। तस्मात् यागानन्तरं

---

१. तैत्तरीयसंहिता २.५.४

२. जैमिनिसूत्रम् ९.१.९

फलप्राप्तिपर्यन्तं विद्यमानः कश्चित् शक्तिविशेषः व्यापारत्वेन कल्प्यते। तदेव अपूर्वमिति नाम्ना व्यपदिश्यते।

उक्तं च तन्त्रवार्त्तिके–

> **कर्मणः प्रागयोग्यस्य कर्मणः पुरुषस्य वा।**[१]
> **योग्यता शास्त्रगम्या सा परा सापूर्वमुच्यते।।**

यागानन्तरं फलप्राप्तिपर्यन्तम् अपूर्वरूपशक्तिविशेषः कल्प्यते चेदपि फलयागयोः साध्यसाधनभावः न हीयते। अपूर्वरूपा यागिकीशक्तिः फलमुत्पादयतीति अङ्गीकारात्। तत्तु यजमानात्मनि फलप्राप्तिपर्यन्तमवस्थाय तदनन्तरं नश्यति। यथा लोके अङ्गारादिजन्यमौष्ण्यं शान्तेष्वपि जले औष्ण्यमनुवर्तते। तथा यजमानेन अनुष्ठितः यागः नष्टश्चेदपि तद्यागजन्यमपूर्वं यजमानात्मनि अनुवर्तते इत्यर्थः। अपि च अपूर्वमिदं न पृथग्भूतं स्वतन्त्रं वस्त्वन्तरम्। किन्तु यागरूपकर्मणः फलोत्पादकशक्तिरेव। तदुक्तं वार्त्तिके–

> **तस्मात्फलेप्रवृत्तस्य यागादेः शक्तिमात्रकम्।**[२]
> **उत्पत्तौ वाऽपि पश्वादेरपूर्वन्न ततः पृथक्।।**

तस्मात् यागस्वर्गयोर्मध्ये विद्यमानावान्तरव्यापार एव अपूर्वमिति सिद्धम्। अत्रास्माकं श्रुत्यर्थापत्तिरेव प्रमाणम्–

> **शक्तित्वसामान्यवतीं द्रव्यकर्मगुणाश्रयाम्।**[३]
> **श्रुत्यर्थापत्तिविज्ञेयां शक्तिमाहुः कुमारिलाः।।**

तस्मादात्मनः नित्यत्वात् तदपूर्वमात्मनि स्थित्वा जन्मान्तरेऽपि स्वर्गादिरूपफलमुत्पादयितुं समर्थं भवतीति। अपूर्वं केन प्रतिपाद्यते इति जिज्ञासायां कृतिमुख्यविशेष्यानुरोधेन 'त' प्रत्यये विद्यमानाख्यातांश एव अपूर्वं प्रतिपादयतीति स्पष्टं भावार्थाधिकरणे।[४]

एतदपूर्वं क्वचित् यागानुष्ठानकालेऽपि कल्प्यते इत्यस्मादपूर्वभेदमित्थं प्रदर्शयन्ति। तत्तु अङ्गापूर्वोत्पत्यपूर्वपरमापूर्वभेदात्।

अङ्गापूर्वम्–

बहुदिनकार्येषु यागेषु प्रथमादिदिने अनुष्ठितं कर्म प्रधानयागसमाप्तिपर्यन्तं न तिष्ठति। परन्तु

---

१. तन्त्रवार्त्तिकस्य अपूर्वाधिकरणम्

२. मानमेयोदयः पृष्टसंख्या २४६

३. श्लोकवार्त्तिकस्य चोदनासूत्रम् १९९

४. भाट्टदीपिका २.१.२

प्रथमद्वतीयादिदिने अनुष्ठिताङ्गकर्मणः प्रधानयागेन सह सम्बन्धः वक्तव्यः। स च सम्बन्धः दृष्टद्वारेण च सम्भवति। प्रधानयागपर्यन्तं न स्थीयमानत्वात्। तत्तु अदृष्टेनैव भाव्यम्। तदा तादृशाङ्गैः कल्प्यमानम् अपूर्वमेव अङ्गापूर्वमिति उच्यते। अङ्गप्रधानयोरुपकार्योपकारभावस्य क्लृप्तत्वात्।

उत्पत्त्यपूर्वम्–

एकस्मिन् कर्मणि बहून्यङ्गानि वर्तन्ते। तानि मिलित्वा एकं प्रधानकर्म भवति। तत्र अङ्गापूर्वैः प्रधानकर्मण एकमपूर्वमुत्पद्यते। यथा अग्निहोत्रं जुहोति इति वाक्येन प्रतीयमानस्यापूर्वस्य उत्पत्त्यपूर्वमिति संज्ञा।

परमापूर्वम्–

अस्यैव फलापूर्वमित्यपि व्यवहारः। यागस्योत्पत्यनन्तरं फलप्राप्तिपर्यन्तमपूर्वमिदं यजमानात्मनि तिष्ठति। यद्यपि दर्शपूर्णमासेष्टिं विहाय सर्वत्र उत्पत्यपूर्वपरमापूर्वयोः तावान् भेदः न दृश्यते। तथाऽपि भेदप्रदर्शनधिया प्रदर्शितमत्र।

दर्शपूर्णमासयोस्तु नवापूर्वाणि इति विशेषः। तत्तु दर्शे, आग्नेयः ऐन्द्रं दधि ऐन्द्रं पय इति त्रयो यागाः। पौर्णमास्याम् आग्नेयाग्निषोमीयोपांशुभेदात् त्रयो यागाः। आग्नेयादिबहूत्पत्तिवाक्यानां बहूत्पत्त्यपूर्वाणि। दर्शसमुदायेन एकमपूर्वम्। पौर्णमासीसमुदायेन एकमपूर्वमिति द्वे समुदायापूर्वे। एवं सर्वं मिलित्वा परमापूर्वम् अथवा फलापूर्वमेकमाहत्य नवापूर्वाणि। तस्मादत्रैव उत्पत्त्यपूर्वफलापूर्वयोः भेदः स्पष्टः।

एवमेव अपूर्वादिविधिनिरूपणावसरे अपूर्वद्वयं प्रदर्शितम्। संस्कारापूर्वं नियमापूर्वञ्चेति।

संस्कारापूर्वम्–

व्रीहिन् प्रोक्षतीत्यत्र प्रोक्षणस्य संस्कारार्थत्वात् तस्य संस्कारस्य दृष्टं न किमपि दृश्यमानत्वाददृष्टं कल्प्यते। तस्यैव संस्कारापूर्वमित्यपि व्यवहारः। दृष्टं न च किञ्चित् दृश्यत इत्यस्माददृष्टस्वीकरणेनैव तस्य वाक्यस्य सार्थक्यप्रतिपादनम्।

नियमापूर्वम्–

'व्रीहिनवहन्ति' इत्यत्र नियमविधिः स्वीक्रियते। तुषविमोकद्वारा तण्डुलनिष्पत्तिरूपप्रयोजनमुद्दिश्य प्रवृत्तः कश्चित् नखविदलनेन तुषविमोकं कर्तुमिच्छति चेत् तं 'व्रीहिनवहन्ति' इति वाक्यम् अवहननेनैव तुषविमोकः कर्तव्य इति नियमयति। अत्र पक्षे अप्राप्तस्य अवहननस्य नियमने किं प्रयोजनमिति चेत् अदृष्टमेव इति वक्तव्यम्। तस्मात् वैदिकवाक्येषु नानासाधनसाध्यक्रियायां विधिप्रत्ययः यत्र श्रूयते तत्र नियमापूर्वं स्वीक्रियते। अन्यथा वाक्यवैयर्थ्यप्रसङ्गः।

प्राभाकरास्तु अपूर्वस्थाने नियोगाख्यं कार्यं प्रतिपादयन्ति। सोऽयं नियोगः लिङ्प्रत्ययवाच्यः।

स एव विध्यर्थ इति वदन्ति। तेषामयमाशयः–यजेत स्वर्गकाम इत्यत्र यजेत इति 'त' प्रत्यये विद्यमानलिङा कृतिसाध्यता नियोग उच्यते। कृत्यभिधानन्तु कार्याभिधानेनैव उच्यते इति अनन्यलभ्यशब्दार्थन्यायेन कार्यस्य प्राधान्येन प्रत्ययार्थत्वे कृतिसंख्ययोरुपसर्जनत्वमिति एकेनैव व्यापारेण जायते। व्यापारान्तराश्रयणे विरम्य व्यापारापत्तेः। अर्थद्वयस्य एकेनैव व्यापारेण शब्दतात्पर्यविषयत्वे जातिव्यक्त्योरिव प्रधानोपसर्जनभावो न हीयते। सर्वत्र शब्दस्य तादृशसामर्थ्यावधारणात्। एवं विधिप्रत्ययस्य कार्यत्वे ज्ञाते सति यज् धातुः तदाकाङ्क्षाविषयं समर्पयति। तत्र कृतिविषयकाकाङ्क्षायां स्वर्गकामपदं कृत्याश्रयं नियोज्यमभिधत्ते। ततः स्वर्गकामनियोज्याश्रितज्योतिष्टोमादिनामकयागविषयककृतिसाध्यं नियोग इति वाक्यार्थः। उक्तञ्च शालिकनाथेन–

तस्मान्नियोज्यसम्बन्धः समर्थं विधिवादिभिः।[१]
कार्यं कालान्तरस्थायि क्रियातो भिन्नमुच्यते।।

अतः नियोज्यसम्बन्धसमर्थं कालान्तरस्थायिकार्यं क्रियातिरिक्तलिङादिभिरुच्यत इति नियोग एव वाक्यार्थ इति प्रतिपादयन्ति।

कार्यमुख्यविशेषबोधकप्राभाकराणां सिद्धान्तः नास्माभिरनुमन्यते। लिङादिभिः नियुक्तेन पुरुषेण यदि कर्मणि भ्रान्त्याऽङ्गवैकल्येऽपि प्रवर्तनाज्ञानेनैव फलोत्पत्तिप्रसङ्ग इत्यादिभिः निरस्यते। अपि च भवन्मते अपूर्वस्य कल्पनात् कल्पनागौरवमित्याक्षेपेऽपि फलमुखत्वाददोष इति प्रतिपादयमः। उक्तं च भट्टपादैः–

फलाय विहितं कर्म क्षणिकं चिरभाविने।[२]
तत्सिद्धिर्नान्यथेत्येवम् अपूर्वं प्रतिगम्यते।।

तस्मादस्त्यपूर्वम्।

।। इति शम् ।।

---

१. प्रकरणपञ्चिका।
२. तन्त्रवार्त्तिकस्य अपूर्वाधिकरणम्।

आधारग्रन्थाः

१. भाट्टदीपिका
२. शास्त्रदीपिका
३. न्यायरत्नमाला
४. मीमांसाकौस्तुभः
५. श्लोकवार्त्तिकम्
६. मीमांसामञ्जरी
७. मीमांसानयमञ्जरी
८. जैमिनीयन्यायमाला
९. भाट्टरहस्यम्
१०. मीमांसापरिभाषा
११. मानमेयोदयः
१२. प्रकरणपञ्चिका

काशकृत्स्नव्याकरण और उनका संज्ञाप्रकरण

रविन्द्र कुमारी

व्याकरणशास्त्र के दार्शनिक पक्ष पर विचार करते हुए विद्वानों ने शब्द को ब्रह्म कहा है और यह भी बताया है कि कोई भी ऐसा प्रत्यय (ज्ञान) नहीं है जो शब्द से बहिर्भूत हो । सम्पूर्ण ज्ञान शब्द से अनुविद्ध है और शब्द से ही प्रकाशित होता है ।[1] भर्तृहरि वाक्यपदीय में सर्वप्रथम शब्दब्रह्म का निरूपण करते हैं और स्पष्टत: कहते हैं कि शब्दब्रह्म की प्राप्ति के लिए व्याकरण ही एक मात्र माध्यम है ।[2] शब्दतत्त्व के सम्यक् ज्ञान में षडङ्गों की परमापेक्षा होती है । इन षडङ्गों में व्याकरण को मूल कहा गया है: ''मुखं व्याकरणं स्मृतम् ।''[3]

जिस प्रकार शरीर की अवस्थिति मुख पर ही निर्भर है, उसी प्रकार वेद का सम्पूर्ण ज्ञान व्याकरण पर ही निर्भर है । शब्दब्रह्म का निकटतम साधन व्याकरण है ।

व्याकरण वाङ्मय के सरलतम अध्ययन के लिए तथा संक्षेपवृत्ति के मार्ग का अनुसरण करने के लिए व्याकरणविदों ने प्राविधिक पदों का निर्माण किया है । प्राविधिक पद वे हैं, जो निश्चित अर्थ के बोधक हैं । शब्द तो अनेकार्थक होते हैं, किन्तु वे शब्द जो बहुत से अर्थों को धारण करते हुए भी किसी निश्चित अर्थ विशेष में स्थिर हो जाते हैं, उन्हें प्राविधिक (कृत्रिम) शब्द कहा जाता है । इन्हीं प्राविधिक शब्दों के लिए ही 'संज्ञा' शब्द का प्रयोग किया जाता है ।

शास्त्र में संज्ञा की कितनी महत्ता है, इसका अनुमान इसी से लगाया जा सकता है कि भट्टोजिदीक्षित ने वैयाकरणसिद्धान्तकौमुदी में सर्वप्रथम संज्ञाप्रकरण का ही निरूपण किया है ।

---

1. वाक्यपदीय, 1.1
2. वही, 1.11
3. पाणिनीय शिक्षा ए 41

संज्ञा शब्द की व्युत्पत्ति :

संस्कृत वैयाकरणों ने 'संज्ञा' शब्द को दो प्रकार से व्युत्पन्न करने का प्रयत्न किया है । **प्रथम व्युत्पत्ति** -सम् उपसर्ग पूर्वक ज्ञा अवबोधने धातु से करणार्थ में 'संज्ञायतेऽनयेति संज्ञा' इस अर्थ में 'आतश्चोपसर्गे'[1] सूत्र से 'क' प्रत्यय करने पर - सम् + ज्ञा + क इस स्थिति में 'आतो लोप इटि च'[2] सूत्र से आकारलोप करके 'संज्ञ' बनने पर 'अजाद्यतष्टाप्'[3] सूत्र से टाप् और सवर्णदीर्घ करने पर संज्ञा शब्द निष्पन्न होता है । 'संज्ञायते अनया इति संज्ञा' इस व्युत्पत्ति के अनुसार 'संज्ञा' शब्द का अर्थ है सम्प्रत्यय या ज्ञान करवाने वाला साधन या नाम।[4]

द्वितीय व्युत्पत्ति - सम् उपसर्गपूर्वक ज्ञा धातु से भाव अर्थ में उपर्युक्त सूत्र से ही क प्रत्यय, आकारलोप एवं टाप् प्रत्यय करने पर 'संज्ञा' शब्द निष्पन्न होता है - संज्ञायते इति संज्ञा । इस व्युत्पत्ति के अनुसार संज्ञा शब्द किसी रूढ़ अर्थ का प्रत्यायक होता है। जैसे, पञ्चालाः, कुरवः इत्यादि ।

संज्ञा के भेद :

पतञ्जलि कहते हैं कि पाणिनीय व्याकरण में दो प्रकार की संज्ञाओं का प्रयोग हुआ है । प्रथम संज्ञा वह है, जिसका सामान्य वाग्व्यवहार में प्रयोग होता है या यूँ कहें कि जिसका अर्थ लोक में ज्ञात है । जैसे पशु, अपत्य, देवदत्त इत्यादि । दूसरी संज्ञा वह है, जिसे वैयाकरणों ने व्याकरणीय उपयोग की दृष्टि से परिकल्पित किया है । ऐसी संज्ञाएँ कृत्रिम पदों से बनाई गई हैं - जैसे टि, घु, पद, भ इत्यादि ।

''इह हि व्याकरणे ये चैते लोके प्रतीतपदार्थकाः शब्दास्तैर्निर्देशः क्रियते पशुरपत्यं देवदत्त इति, याश्चैताः कृत्रिमाष्टिघुभसंज्ञास्ताभिः''।[5]

व्याकरण की विशिष्ट आवश्यकताओं की परिपूर्ति के लिए वैयाकरणों ने विभिन्न पारिभाषिक संज्ञाओं को परिकल्पित किया है । व्याकरण के सीमित क्षेत्र से बाहर वे अनर्थक हैं । पतञ्जलि ने इस प्रकार की संज्ञाओं को कृत्रिम नाम दिया है । पाणिनि की अष्टाध्यायी में दोनों प्रकार की संज्ञाओं का प्रयोग हुआ है ।

---

1. पाणिनीय अष्टाध्यायी- 3.3.106
2. वही 6.4.64
3. वही
4. संज्ञा सम्प्रत्यय उच्यते -अष्टाध्यायी 1.1.67 पर महाभाष्य पर प्रदीप ।
5. अष्टा० 1.4.23 पर महाभाष्य

वाक्यपदीय में भी भर्तृहरि ने शब्दों की दो प्रकार की संज्ञाओं का स्पष्ट उल्लेख किया है - आजानिक और आधुनिक ।[1] पशु तथा अपत्य जैसे शब्द आजानिक (नित्य) की कोटि में आते हैं, क्योंकि उनका मूल गवेष्य नहीं है एवं इनके रूढ़ अर्थ है । आधुनिक (कृत्रिम पद) शास्त्रीय पद हैं । इनका क्षेत्र सीमित है ।

व्याकरण शास्त्र की परम्परा ब्रह्मा, बृहस्पति, इन्द्र, भरद्वाज आदि के समय से ही प्रवर्तित मानी जाती है । आचार्य पाणिनि ने स्वाष्टक में भरद्वाज आदि दशाचार्यों का नामोल्लेखपूर्वक स्मरण किया है । पाणिनि से पूर्व भी व्याकरणशास्त्र के अनेक प्रखराचार्य हुए थे, जिनका उल्लेख पाणिनि ने स्वाष्टक में नहीं किया । इनमें शिव, महेश्वर, इन्द्र बृहस्पति, भागुरि, पौष्करसादि, शान्तनु, काशकृत्स्न, शौनक आदि हैं । पाणिनि से पूर्ववर्ती इन आचार्यों में काशकृत्स्न प्रमुख वैयाकरण थे । अनेक स्थानों पर उनके व्याकरण शास्त्र का उल्लेख प्राप्त होता है । संज्ञा के बिना न तो जगत् का व्यवहार और न ही शास्त्र की प्रक्रिया चल सकती है । अतः आचार्य काशकृत्स्न ने अपने शब्दानुशासन का प्रारम्भ संज्ञासूत्रों से किया है । काशकृत्स्नव्याकरण में आख्यात, नाम, अनुषङ्ग, अभ्यस्त, अपृक्त इत्यादि अनेक संज्ञाओं का उल्लेख किया है ।

काशकृत्स्नव्याकरण के संज्ञासूत्रों का विवरण इस प्रकार है :

धातौ साधने दिशि पुरुषे चिति तदाख्यातम् –

सामान्यार्थ :

सूत्र का अर्थ है कि जिस पद का उच्चारण होने पर कर्त्ता आदि कारकों, वर्तमानादि कालों, युष्मदादि पुरुषों, एकवचनादि संख्या का बोध होता है, वह 'आख्यात' कहलाता है। प्रस्तुत सूत्र में काशकृत्स्न ने आख्यात का लक्षण प्रदर्शित किया है ।

निष्पत्ति :

आ उपसर्गपूर्वक ख्या प्रकथने धातु से कर्म अथवा करण अर्थ में क्त प्रत्यय करने पर पर 'आख्यात' पद निष्पन्न होता है ।'[2]

---

1. आजानिकश्चाधुनिकः संकेतो द्विविधो मतः ।
   नित्यः आजानिकस्तत्र या शक्तिरिति गीयते ।।
   कादाचित्कस्त्वाधुनिकः शास्त्रकारादिभिः कृतः । वाक्यपदीय पर पुण्यराज
2. वाचस्पत्यम् भाग-1, पृ. 611

व्याख्या :

उपर्युक्त सूत्र में 'धातु' पद से क्रिया या भाव (व्यापार) अर्थ का ग्रहण होता है। निरुक्तकार ने भी कहा है 'पूर्वापरीभूतं भावमाख्यातेनाचष्टे'[1] अर्थात् जहाँ वक्ता पहले तथा पीछे (एक विशेष क्रम से) होने वाली आरम्भ से अन्त तक की क्रिया को कहता है। वह पद 'आख्यात' कहलाता है। साधन पद से कारक अर्थ का ग्रहण होता है, जिसके अन्तर्गत कर्तृकारक व कर्मकारक आते हैं। दिक् शब्द समय का, पुरुष युष्मदादि पुरुषों का चित् पद संख्या का बोध करवाता है। जैसे 'पचसि' इस एक पद के श्रवण से श्रोता पाक क्रिया, कर्तृकारक, युष्मद् पुरुष, वर्तमान काल और एकत्व संख्या को समझता है।

पाठभेद :

उपर्युक्त सूत्र वाक्यपदीय में भर्तृहरि ने उद्धृत किया है ।[2] उन्होंने वहां इस सूत्र को इस प्रकार पढ़ा है 'धातुः साधने दिशि पुरुषे चिति च तदाख्यातम्' । परन्तु सूत्र का यह पाठ अशुद्ध है । यहाँ 'धातुः' पद अशुद्ध है । इस सूत्र की व्याख्या करते हुए वाक्यपदीय के टीकाकार वृषभदेव ने भी अशुद्ध पाठ को ही स्वीकृत किया है: 'धातुः साधने दिशि पुरुषे चिति च तदाख्यातम्' । कारक, काल, पुरुष और वचन की भाँति इन दोनों स्थलों में धातु यह पाठ शेष वाक्यार्थ में अन्वित नहीं होता, जबकि 'धातौ' पाठ की अन्विति सुसंगत है, क्योंकि आख्यात कारक, काल, पुरुष और वचन की भांति धातु, व्यापार और क्रिया का भी वाचक होता है ।

अन्य आचार्य :

कातन्त्रकार ने आख्यात अर्थात् धातु संज्ञा करने के लिए क्रियाभावो धातुः[3] सूत्र पढ़ा है अर्थात् क्रिया के प्रतिपादक शब्दों की धातु संज्ञा होती है । वस्तुतः यह लक्षण निरुक्तकार के समान ही है -

'भावप्रधानमाख्यातम्'[4]। एतदनुसार भाव अर्थात् क्रिया की प्रधानता से युक्त पद ही आख्यात कहलाता है।

---

1. यास्कीय निरूक्त अध्याय 1, पृ. 13, डा. कपिलदेव शास्त्री
2. वाक्यपदीय 1.23 की वृत्ति, पृ. 162
3. कातन्त्रव्याकरण, आख्यातवृत्ति 1.9, पृ. 75
4. यास्क, निरुक्त अध्याय-1.1 पृ. 10, कपिलदेव शास्त्री ।

आचार्य पाणिनि ने आख्यात का स्पष्ट लक्षण नहीं किया, प्रत्युत 'भूवादयो धातवः'[1] सूत्र पढ़कर इति कर दी । किन्तु इस सूत्र की वृत्ति में भट्टोजिदीक्षित कहते हैं – क्रियावाचिनो भ्वादयः धातुसंज्ञाः स्युः[2] अर्थात् क्रिया के वाचक भू इत्यादि की धातु संज्ञा होती है । भरतमुनि ने नाट्यशास्त्र में आख्यात को इस प्रकार उल्लिखित किया है : 'आख्यातं तु क्रियाकृतम्'[3] अर्थात् आख्यात क्रियाओं से बनते हैं और उनमें व्यापार की प्रधानता रहती है ।

ऋक्प्रातिशाख्य में

'तदाख्यातम् येन भावं सधातु'[4] अर्थात् वह शब्द आख्यात है, जिसके द्वारा वक्ता क्रिया का अभिधान करता है और जो धातु से समन्वित होता है ।

भरतमुनिकृत नाट्यशास्त्र में

आख्यातं पाठ्यकृतं ज्ञेयं नानार्थाश्रयविशेषम् ।[5]
वचनं नामसमेतं पुरुषविभक्तं तदाख्यातम्[6]**।**

स्पष्ट है कि भरतमुनि आख्यात को व्यापार, पुरुष, वचन आदि से युक्त मानते हैं।

शौनकीय बृहद्देवता में आख्यात को निम्न प्रकार से परिभाषित किया गया है–

क्रियासु बह्वीष्वभिसंश्रितो यः पूर्वापरीभूत इहैक एव ।
क्रियाभिनिर्वृत्तिवशेन सिद्ध आख्यातशब्देन तमर्थमाहुः।।[7]

अर्थात् अनेक क्रियाओं से संबद्ध पूर्व अथवा अपर रूप धारण करने पर भी एक होते हुए यदि कोई शब्द क्रिया की निर्वृत्ति द्वारा सिद्ध होता है, उसे क्रिया (आख्यात) शब्द से व्यक्त किया जाता है ।

---

1. अष्टाध्यायी 1.3.1
2. वैयाकरणसिद्धान्तकौमुदी 9.3.1 की वृत्ति
3. नाट्यशास्त्र 14.26
4. ऋक्प्रातिशाख्य अध्याय 1, सीमा पटलम् 12.19
5. नाट्यशास्त्र 14.26
6. वही 14.31
7. बृहद्देवता 1.43 पृ. 12

समीक्षा :

उपर्युक्त विवेचन से निष्कर्ष निकलता है कि आख्यात पद का जो लक्षण आचार्य काशकृत्स्न ने किया है, वह सभी आचार्यो द्वारा मान्य व सर्वाधिक सुस्पष्ट है । भरतमुनि का लक्षण उनसे बहुत मिलता है । इससे यह अनुमान होता है कि भरतमुनि उनके इस लक्षण से अवश्य प्रभावित रहे होंगे ।

2. लिङ्गे किमि (चि) त्ति विभक्तौ एतन्नाम् –

सामान्यार्थ : जिस पद का उच्चारण होने पर प्रातिपदिकार्थ अर्थात् स्त्रीत्व आदि लिंगों का, एकत्वादि संख्या का और कर्मादि कारकों का बोध होता है, उसे नाम कहते हैं ।

निष्पत्ति : म्नायते अभ्यस्यते नम्यते अभिधीयते अर्थोऽनेन वा इस अर्थ में म्ना धातु से मनिन् प्रत्यय के योग में नाम पद निपातन से सिद्ध होता है।

व्याख्या :

युधिष्ठिर मीमांसक के अनुसार यहाँ पर लिंग पद से प्रातिपदिकार्थ का ग्रहण किया गया है, किम् पद से पुँल्लिंग, स्त्रीलिंग और नपुँसकलिंग का, चित् पद से एकत्वादि संख्या का, विभक्ति पद से कर्मादि कारकों का ग्रहण किया गया है । वृषभदेव ने इस सूत्र की व्याख्या करते हुए लिंग पद से स्त्रीपुंसादि का, किम् पद से संख्या का ग्रहण किया है । किन्तु यह उचित प्रतीत नहीं होता; क्योंकि पूर्वाचार्य 'लिङ्गे' पद से जिस अर्थवान् शब्द स्वरूप का निर्देश करते है, पाणिनि आदि आचार्य उसी को प्रातिपदिक के नाम से स्मरण करते हैं[1]। कातन्त्रकार भी लिंग शब्द से यही अर्थ ग्रहण करते हैं : 'धातु विभक्तिवर्जमर्थवल्लिंगम्।'[2]

पाठभेद : उपर्युक्त सूत्र भर्तृहरि ने वाक्यपदीय में उद्धृत किया है, किन्तु वहाँ पर 'लिंगम्'[3] ऐसा पाठ उपलब्ध होता है; जबकि युधिष्ठिर मीमांसक द्वारा संपादित काशकृत्स्नव्याकरण में 'लिङ्गे' पद उपलब्ध होता है। वाक्यपदीय के टीकाकार वृषभदेव ने भी 'लिङ्गे' ऐसा सप्तम्यन्त पाठ प्रयोग किया है। अतः स्पष्ट है कि 'लिङ्गे' यही पाठ उचित है।

---

1. काशकृत्स्नव्याकरण, पृ. 33
2. कातन्त्रव्याकरण 2.1.1
3. वाक्यपदीय ब्रह्मकाण्ड, पृ. 162

अन्य आचार्य :

भरतमुनिकृत नाट्यशास्त्र में नाम को इस प्रकार लक्षित किया गया है –

'अर्थप्रधानं नाम' अर्थात् अर्थप्रधान प्रातिपदिक नाम होते हैं ।

ऋक्प्रातिशाख्य के अनुसार 'तन्नाम येनाभिदधाति सत्त्वम्'[1] अर्थात् वह नाम है जिस शब्द के द्वारा वक्ता सत्त्व का अर्थात् द्रव्य का अभिधान करता है ।

सारस्वतव्याकरण में नाम संज्ञा को 'अविभक्ति नाम'[2] अर्थात् विभक्ति से रहित तथा धातु अर्थात् भू आदि धातु से पृथक् अर्थयुक्त शब्द अर्थात् अकारादि शब्दों से युक्त वर्ण नाम कहलाते हैं ।

नारदपुराण में नाम संज्ञा का निरूपण इस प्रकार किया है –

''सुप्तिङन्तं पदं विप्र सुपां सप्त विभक्तयः ।
स्वौजसप्रथमा प्रोक्ता सा प्रातिपदिकात्मिका ।।

संबोधने च लिंगादावुक्ते कर्मणि कर्तरि ।
अर्थवत्प्रातिपदिकं धातुप्रत्ययवर्जितम् ।।[3]

यहां पर भी लिङ्ग शब्द का अर्थ प्रातिपदिकार्थ लिया गया है।

श्री सिद्धहेमचन्द्रानुशासन में 'अधातुविभक्ति वाक्यार्थवन्नाम[4] अर्थात् स्वार्थ, द्रव्य, लिङ्ग, संख्या, शक्ति के द्योतक समुच्चयादि शब्द स्वरूपों की, धातु, विभक्ति, वाक्य को छोड़कर नाम संज्ञा होती है।

समीक्षा :

उपर्युक्त विवेचन से स्पष्ट निष्कर्ष निकलता है कि सभी आचार्यों का अभिप्राय एक समान है, केवल संज्ञा के नामकरण में विभेद है। किसी आचार्य ने इसे 'नाम' संज्ञा कहा है, किसी ने 'प्रातिपदिक' कह कर संबोधित किया है और किसी अन्य ने इसका नामकरण लिङ्ग किया है।

---

1. ऋक्प्रातिशाख्य, 12.18, पृ० 672
2. स्वरान्ताः पुल्लिङ्गाः सारस्वतव्याकरण 7.2
3. नारदपुराण 52.2, 3
4. श्रीसिद्धहेमचन्द्रशब्दानुशासन 1.1.27

3. पूर्वोऽभ्यासः :

सामान्यार्थ : द्वित्व होने पर पूर्व की अभ्यास संज्ञा होती है ।

निष्पत्ति : अभि उपसर्गपूर्वक असु क्षेपणे धातु से कर्म में घञ् प्रत्यय करने पर अनुबन्ध आदि कार्य करके अभ्यास शब्द की निष्पत्ति होती है:[1]

अभि + अस् + घञ्[2,3]

व्याख्या : द्वित्व अर्थात् धातु को द्वित्व करने पर जो पूर्व में होता है, उसकी अभ्यास संज्ञा होती है । काशकृत्स्नव्याकरण के अदादिगण में 'हु दानादनयो:' धातु पर इस सूत्र को पढ़ा गया है और इसकी वृत्ति वहां इस प्रकार लिखी हुई

है - द्विर्भावे पूर्वोऽभ्याससंज्ञो भवति।[4]

अन्य आचार्य :

कातन्त्रव्याकरण में प्रस्तुत सूत्र निम्न प्रकार से पठित है -

'पूर्वोऽभ्यास:'[5] अर्थात् धातु के दो बार उक्त होने पर जो पूर्व में है, उसकी अभ्याससंज्ञा होती है । अष्टाध्यायी में आचार्य पाणिनि ने प्रस्तुत सूत्र को इसी रूप में पढ़ा है । काशिकाकार ने इसकी व्याख्या इस प्रकार की है - 'ये द्वे विहिते तयोर्यः पूर्वोऽवयव: सोऽभ्याससंज्ञो भवति' अर्थात् दो बार उच्चारण किए जाने पर जो पूर्व में है, उसकी अभ्यास संज्ञा होती है। पाणिनि, कातन्त्रकार, अनुभूतिस्वरूप ने इस सूत्र का इसी रूप में पाठ किया है।

समीक्षा :

ऐसा सम्भव है कि आचार्य काशकृत्स्न से पहले भी अभ्यास शब्द का प्रयोग होता रहा हो किन्तु 'अभ्यास' इस पारिभाषिक संज्ञा का विधान करने वाले जिस सूत्र को आचार्य काशकृत्स्न ने पढ़ा है, परवर्ती आचार्यों ने उसका पूर्णतया अनुसरण किया है और लगभग सभी आचार्यो ने अभ्यास संज्ञा के विधान करने वाले इस सूत्र को इसी रूप में स्वीकृत किया है ।

1. वाचस्पत्यम् खण्ड -1, पृ. 312 (चौखम्बा संस्कृत संस्थान)
2. शब्दकल्पद्रुम खण्ड - 1, पृ. 79
3. संस्कृत हिन्दी कोष, वामन शिवराम आप्टे
4. काशकृत्स्नधातुव्याख्यानम् 2.65
5. कातन्त्रव्याकरण 3.85, आख्यातवृत्ति पृ. 102

4. द्वयमभ्यस्तम् :

सामान्यार्थ : द्विरुक्त दो पदों में जो दूसरा पद है, उसकी अभ्यस्त संज्ञा होती है।

निष्पत्ति – 'अभ्यस्ते स्म यत् तद्' इस अर्थ में अभि उपसर्गपूर्वक अस् धातु से 'निष्ठा'[1] सूत्र से कर्म और भूत अर्थ में क्त प्रत्यय, अनुबन्धलोप और सुप् आदि कार्यो के होने पर 'अभ्यस्तम्' इस पद की निष्पत्ति होती है ।

व्याख्या : उपर्युक्त सूत्र में 'द्वयम्' इस शब्द का प्रयोग किया गया है और इसका अर्थ 'द्वित्व में दूसरा' किया गया है, जबकि 'द्वयम्' इसका अर्थ दोनों होता है । यद्यपि पाणिनीय तन्त्र की भांति इसका 'दोनों' यह अर्थ भी ग्रहण किया जा सकता है, किन्तु काशकृत्स्नव्याकरण के 'अभ्यस्ताद् यु अभ्यस्ते'[2] सूत्र से पता चलता है कि काशकृत्स्न 'द्वयम्' शब्द से 'द्वितीय भाग की अभ्यस्त संज्ञा होती है', ऐसा अर्थ को ग्रहण करते है।

अन्य आचार्य :

आचार्य पाणिनि ने अभ्यस्त संज्ञा का विधान करने वाले सूत्र को इस प्रकार पढ़ा है- 'उभे अभ्यस्तम्'[3] अर्थात् षष्ठाध्याय के द्वित्व प्रकरण में द्वित्व के द्वारा जिन दो शब्दस्वरूपों का विधान है, उन दोनों की समुदित रूप से अभ्यस्त संज्ञा होती है ।

कातन्त्रव्याकरण में 'द्वयमभ्यस्तम्'[4] धातोरभ्यास इतरश्च द्वयमभ्यस्तसंज्ञं भवति अर्थात् धातु का जो अभ्यास है, उससे जो इतर है उसकी अभ्यस्त संज्ञा होती है – इस रूप में अभ्यस्त संज्ञा को विवृत किया गया है, जो काशकृत्स्न व्याकरण के समान है । इसके अतिरिक्त अन्य आचार्यो ने भी अभ्यस्त संज्ञा का जिस रूप में उल्लेख किया है, वह आचार्य काशकृत्स्न के समान ही है ।

समीक्षा :

पारिभाषिक संज्ञा के रूप में 'अभ्यस्त' शब्द का सर्वप्रथम प्रयोग काशकृत्स्नव्याकरण

---

1. अष्टाध्यायी 3.2.102
2. काशकृत्स्नधातुव्याख्यानम् धातुसंख्या 83
3. अष्टाध्यायी 6.1.8
4. कातन्त्रव्याकरण, आख्यातप्रकरण 3.86
5. पाणिनीय और सारस्वतीय पारिभाषिक संज्ञाओं का तुलनात्मक अध्ययन, पृ. 348

में ही मिलता है ।[5] किन्तु काशकृत्स्न व पाणिनि के मन्तव्य में मतभेद है । पाणिनि दोनों की समुदित रूप से अभ्यस्त संज्ञा करते हैं, जबकि काशकृत्स्न दोनों में केवल द्वितीय भाग की ही अभ्यस्त संज्ञा करते है ।

5. अपृक्त एकवर्णः प्रत्ययः :

सामान्यार्थ : इस सूत्र के सामान्य अर्थ के विषय में सन्देह है । यदि सूत्र का सामान्य दृष्टि से अर्थ किया जाए तो ऐसा अर्थ फलित होता है - एक वर्ण रूपी जो प्रत्यय है, उसकी अपृक्त संज्ञा होती है । किन्तु काशकृत्स्न व्याकरण में इसका यह अर्थ दिया गया है - 'धातोः पर एकवर्णोऽपृक्तप्रत्ययः स्वार्थं प्रदाय लुप्यते', अर्थात् धातु से परे एकवर्ण अपृक्त प्रत्यय अपने अभिधेय अर्थ को कहकर लुप्त हो जाता है । युधिष्ठिर मीमांसक के अनुसार इस सूत्र का उक्तार्थ कर्नाटक वृत्ति के अनुसार है । वस्तुतः यह सूत्र अपृक्त संज्ञा का विधान करता है अथवा अपृक्तसंज्ञक एक वर्ण के लोप का विधान करता है - यह संदिग्ध है । युधिष्ठिर मीमांसक इसे अपृक्त संज्ञा का विधायक मानते हैं ।[1] उनकी यह मान्यता पाणिनीय तन्त्र के अनुकूल तो है ही, सूत्रों में प्रयुक्त पद्यों से प्राप्त अर्थ के अनुरूप भी है ।

निष्पत्ति - पृची[2] सम्पर्के धातु से क्त प्रत्यय करने पर नञ् समास की स्थिति में अपृक्त की निष्पत्ति होती है ।

व्याख्या - पाणिनि ने अपृक्त संज्ञा का विधान करने वाले सूत्र को इस प्रकार पढ़ा है - 'अपृक्त एकाल्प्रत्ययः'[3] अर्थात् एक अल् (वर्ण) रूपी जो प्रत्यय है, उसकी अपृक्त संज्ञा होती है । अल् से अभिप्राय 'अल्' प्रत्याहार से है । अल् प्रत्याहार के अन्तर्गत सभी स्वर तथा व्यञ्जन वर्ण आते हैं। यदि इस सूत्र के साथ काशकृत्स्न के सूत्र को रखा जाए तो दोनों में समानता दिखाई पड़ती है । क्योंकि अल् का वही अर्थ है, जो वर्ण का है। दोनों का अध्ययन करने से स्पष्ट है कि काशकृत्स्न व्याकरण के इस सूत्र का यही अर्थ है, जो पाणिनि के सूत्र का है ।

अन्य आचार्य :

---

1. काशकृत्स्न-धातुव्याख्यानम्, सूत्र सं. 109
2. वाचस्पत्यम्, भाग-1, पृ. 253
3. अष्टाध्यायी 1.2.41

ऋग्वेदप्रातिशाख्य में अपृक्त शब्द का प्रयोग प्रथम बार किया गया है :-

"उकारश्चेतिकरणेन युक्तो रक्तोऽपृक्तो द्राघितः शाकलेन ।।"[1]

अर्थात् शाकल के मत में किसी व्यञ्जन से न मिला हुआ अपृक्त उकार इति शब्द से मिलने पर अनुनासिक, दीर्घ और प्रगृह्य हो जाता है । किन्तु ऋक्प्रातिशाख्य में अपृक्त के स्वरूप का प्रतिपादन नहीं किया गया है । तैत्तिरीयप्रातिशाख्य में 'एकवर्णः पदम् । सोऽपृक्तसंज्ञः'[2] अर्थात् एकवर्ण पद अपृक्त संज्ञक है ।

समीक्षा :

उपर्युक्त सूत्र काशकृत्स्नव्याकरण के रुधादिगण में पृची सम्पर्के[3] धातु पर पठित है। वहां भी इसका अर्थ इस प्रकार दिया गया है - एकवर्णः प्रत्ययः धात्तोरुत्पन्नः स्वार्थं प्रदाय लुप्यते । वस्तुतः सूत्र का यह अर्थ चन्नवीरकवि द्वारा प्रदत्त है । यह वास्तविक अर्थ प्रतीत नहीं होता । यदि पाणिनि के सूत्र के साथ इसकी तुलना की जाए तो इसका अर्थ स्पष्ट हो जाता है कि यह सूत्र अपृक्त संज्ञा का विधान करता है।

6. क्तक्तवतू निष्ठा :

सामान्यार्थ : क्त और क्तवतु प्रत्ययों की निष्ठा संज्ञा होती है ।

निष्पत्ति : नितरां तिष्ठतीति निष्ठा - नि + स्था + क + टाप्[4] ।

व्याख्या : क्त और क्तवतु दोनों प्रत्ययों में 'क' अनुबन्ध कित् के लिए जोड़ा गया है, जिसका फल गुण और वृद्धि का बाध करना है ।

अन्य आचार्य :

यद्यपि छान्दोग्योपनिषद् में श्रद्धा अर्थ में निष्ठा शब्द का प्रयोग प्राप्त होता है,[5] किन्तु पारिभाषिक संज्ञा के रूप में इसका प्रयोग सर्वप्रथम आचार्य काशकृत्स्न ने ही किया है । काशकृत्स्नव्याकरण के क्र्यादिगण में 'भीञ् द्रूञ् हिंसायाम्' धातु पर भी यह सूत्र पढ़ा

1. ऋग्वेदप्रातिशाख्य 1.75, पृ. 102
2. तैत्तिरीयप्रातिशाख्य 1ण्54ए 55
3. काशकृत्स्नधातुव्याख्यान 6.22
4. संस्कृत हिन्दी कोश वामनशिवराम आप्टे पृ. 544
5. यदा वै नितिष्ठत्यथ श्रद्दधाति, निष्तिष्ठन्नेव श्रद्धधाति ।
   निष्ठा त्वेत विजिज्ञासितव्येति निष्ठा भगवो विजिज्ञास इति ।। छान्दोग्योपनिषद् 7.20.1
6. अष्टाध्यायी 1.1.26
7. कातन्त्रव्याकरण, सूत्र 84

गया है । अष्टाध्यायी[6] और कातन्त्र[7] में इस संज्ञा का विधान किया गया है । जैनेन्द्रव्याकरण में इस संज्ञा के स्थान पर 'त' संज्ञा का प्रयोग किया गया है । 'क्तक्तवतू तः ।

सरस्वतीकण्ठाभरण, सारस्वतव्याकरण, सुपद्मव्याकरण और प्रयोगरत्नमाला में भी निष्ठा संज्ञा इसी रूप में उपलब्ध होती है।[1] हेमचन्द्र शब्दानुशासन में क्तक्तवतू का प्रयोग किया गया है, किन्तु निष्ठा का विधान नहीं किया गया - क्तक्तवतू[2]।

समीक्षा - उपर्युक्त विवेचन से स्पष्ट है कि प्रस्तुत शब्द (निष्ठा) का पारिभाषिक अर्थ में प्रयोग सर्वप्रथम काशकृत्स्नव्याकरण में ही मिलता है । आचार्य काशकृत्स्न में निष्ठासंज्ञक सूत्र को जिस रूप में पढ़ा है, अधिकतर आचार्यो ने उसे उसी रूप में अंगीकार किया है । इससे पता चलता है कि काशकृत्स्नव्याकरण की उस समय कितनी उपयोगिता थी ।

उपसंहार -

काशकृत्स्नव्याकरणगत आए संज्ञासूत्रों का प्रयोग इनसे पूर्व भी लोक में व वैयाकरणों में व्यवहृत रहा है । काशकृत्स्न ने इन सूत्रों को कुछ परिवर्तन करके प्रयुक्त किया है । इसके पश्चात् भी पाणिनीय व्याकरण में और उसके उत्तरवर्ती व्याकरणों में भी इन संज्ञाओं का अनुकरण किया गया है ।

1. पाणिनीय और सारस्वतीय पारिभाषिक संज्ञाओं का तुलनात्मक अध्ययन, पृ. 223
2. श्रीसिद्धहेमचन्द्रशब्दानुशासन 5.1.174

संत कबीर का काव्य-विश्लेषण

डॉ० सच्चिदानन्द तिवारी

हिन्दी काव्य परम्परा में संत मत का उदय एक अतिशय महत्वपूर्ण ऐतिहासिक घटना है। इन संतों ने तत्कालीन समाज में पूर्व से व्याप्त नाना प्रकार की विसंगतियों का निराकरण कर मानव समाज का सराहनीय उपकार किया। भारतीय इतिहास के मध्यकालीन संतों में संत कबीरदास का स्थान अद्वितीय है। उन्होंने गोरखपंथियों के हठयोग, वेदान्तियों के अपरिमित ज्ञान, सूफियों के इश्कवाद तथा वैष्णवों की सच्ची भावना के साथ-साथ हिन्दू-मुस्लिम ऐक्य का भी स्तुत्य प्रयास किया। संत कबीर के विचार से, व्यक्ति अज्ञानता के कारण ही आपस में द्वैत बुद्धि रखता है, जिसके कारण वह विनाश को प्राप्त होता है।

कबिरा माया पापिनी, लालै लाया लोग।
पूरी किनहुँ न भोगई इनका इहै बिजोग।।[1]

कबीर के इसी भाव को भगवान् श्रीकृष्ण ने भगवद्गीता में इस प्रकार व्यक्त किया है-

एहि संस्पर्शजा भोगा दुःखयोनय एव ते।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः।।[2]

अरबी भाषा में कबीर का अर्थ 'महान्' होता है और यह परमब्रह्म के विशेषण के रूप में व्यवहृत होता है। यथा- ''कबीर तू ही कबीर है तोरो नाम कबीर'' अर्थात् ईश्वर तू महान् (कबीर) है, अतएव जीवात्मा भी तुम्हारा ही अंश होने के कारण कबीर है। इसके अतिरिक्त कबीर के साथ 'दास' शब्द के प्रयोग का कारण, ईश्वर के प्रति उनकी भक्ति भावना का द्योतक है, जिसका संकेत कबीर के इस दोहे में मिलता है-

---

१. कबीर वाङ्मय- साखी, पृ०- १४६।
२. श्रीमद्भगवद्गीता- ५/२२।

कबिरा चेरा संत का, दासिन को पर दास।
कबिरा ऐसे ही रहा, ज्यूँ पाऊ तल घास।।[1]

संत कबीर के समग्र व्यक्तित्व में अक्खड़पन, फक्कड़पन, मौलापन, विनम्रता, क्रान्तिकारिता, स्वाभिमान, आत्मविश्वास के साथ-साथ संत सुलभ परोपकारिता आदि के सद्गुणों से आवेष्टित समस्त मानवतावाद के सुवासित पुष्पों का संचयन है जो उनके काव्य संरचना में प्रतिभाषित होता है। मध्यकालीन समाज में व्याप्त रूढ़ियों अंधविश्वासों को संत कबीर ने मानवता का विनाशक घोषित करते हुए उसके मूलोच्छेद का आह्वान किया।

'मसि कागद छुयो नहीं कलम गही नहीं हाथ' कहने वाले कबीर के विषय में एक किंवदन्ती प्रचलित है कि एक बार संत कबीर की ख्याति से प्रभावित होकर बादशाह सिकन्दर लोदी ने कबीर से न्याय, व्याकरण, वेदान्त पर अपना मत प्रकट करने का अनुरोध किया। इस पर इस फक्कड़ी साधु (कबीर) ने हजारों गाड़ियों में कागज भरकर मात्र एक स्थान पर 'राम' शब्द लिखकर बादशाह को भिजवा दिया। कबीर के भजन या व्यक्तित्व के प्रभाव से हिन्दू तथा मुस्लिम धर्म के सभी ग्रन्थों के वचन उन पन्नों पर स्वतः अंकित हो गये।

सहस शकट कागज जब आयो।
तब कबीर अति आनंद पायो।।

सबके ऊपर शकट यक माँही।
लिख्यौ राम अक्षर द्वै काहीं।।

सहसहु शकट शाह ढिंग भेजा।
प्रगट्यो राम नाम कर तेजा।।

सकल शास्त्र सब कागज माँहीं।
लिखिगे आपुहि ते श्रम नाहीं।।[2]

संत कबीर की रचनाओं को तीन भागों में विभक्त किया गया है- प्रथम साखी, द्वितीय सबद तथा अंतिम रमैनी। साखी शब्द संस्कृत के 'साक्षी' शब्द का तद्भव है,

---

१. कबीर वाङ्मय- साखी, पृ०- २६४।
२. कबीर बीजक- पृ०- २०-२१।

जिसका तात्पर्य है गवाह। गवाही के लिये संस्कृत में साक्ष्य शब्द का प्रयोग हुआ है। अर्थात् साखी का भाव है कि जिसने स्वयं अपनी आँखों से तथ्य को देखा हो।

सबद क्रिया, गति या स्पन्दन को कहते हैं। शब्द ही अक्षर होते हैं और अक्षर ही ब्रह्म रूप है- **अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।**[1] ये शब्द ही श्रवण इन्द्रिय को ध्वनि रूप से, त्वचा को स्पर्श रूप से, जिह्वा को स्वाद रूप से तथा घ्राण को गंध रूप से प्रतीत होते हैं। इसे ही संत कबीर ने सबद कहा है। गुरु परम्परा में शिष्य को दीक्षा के समय दिये जाने वाले मंत्र को भी शब्द (सबद) कहा जाता है। जो शिष्य के भीतर क्रिया करने लगते हैं इसको कबीर ने गुरुओं के द्वारा 'शब्द बाण' मारना कहा है।

कबीर प्रणीत रमैनी के तीन अर्थ हैं प्रथम- जगत् में जीवन के रमण का भाव, द्वितीय- ब्रह्म में जीव के रमण का भाव तथा तृतीय- छन्द विशेष का नाम जिसके प्रत्येक चरण में सोलह मात्रायें होती हैं। इस प्रकार रमैनी में सृष्टि, जीव तथा जगत् का अनुशीलन किया गया है।

एक और महत्त्वपूर्ण बात यह है कि कबीर के काल में 'उलटवॉसी' का भी भरपूर प्रयोग काव्यकारों ने किया। इसी कारण कबीर साहित्य के भावों को समझना अत्यन्त दुष्कर एवं क्लिष्ट हो जाता है। वस्तुतः साधक के चित्त की आध्यात्मिक अनुभूति ही उलटवॉसी है। अपने परा अनुभव को सीधी सरल वाणी में व्यक्त न कर पाने की असमर्थता ही उलटवॉसी के माध्यम से प्रकट होती है। इसका शाब्दिक अर्थ है- ''उल्टा प्रतीत होने वाली उक्ति या कथन''। यथा-

''समंदर लागी आग मंछी रूषा चढ़ि गयी'' अर्थात् समुद्र (पानी) में आग लग गयी तथा मछलियाँ पेड़ों पर चढ़ गयी। इसी प्रकार संत कबीर ने जीवन की निःसारता को स्पष्ट करते हुए सांसारिक सुख को मिथ्या माना है। जैसे कि-

झूठे सुख कौ सुख कहै, मानत है मन मोद।
खलक चबैना काल का, कुछ मुख में कुछ गोद।।[2]

कबीर ने जो कुछ पाया वह उनके जीवन का महान् अनुभव था। कबीर ने जो कुछ प्राप्त किया वह समाज को अर्पित कर दिया। उन्होंने अपने विवेक, अन्तर्ज्ञान तथा

१. श्रीमद्भगवद्गीता- ८/३।
२. कबीर वाङ्मय- साखी, पृ०- २८६।

सारग्रही बुद्धि से अपनी विचारधारा की दार्शनिक अभिव्यक्ति की। संत कबीर मध्यकाल के प्रथम ऐसे व्यक्ति हैं, जिन्होंने सामाजिक ढांचे को समझने का प्रयास किया। इस प्रकार संत कबीर ने धन के अधिक संचय, साम्प्रदायिकता, बाह्याचार, कर्मकाण्ड का खण्डन करके एक विकासशील समसमाज की परिकल्पना की।

मध्यकाल के संतों में कबीर अग्रगण्य हैं। वे अपने समय के सर्वाधिक प्रखर आलोचक, कटु उपदेशक तथा स्पष्ट वक्ता थे। कबीर मात्र भक्त न होकर भविष्य द्रष्टा, युग स्रष्टा, धर्म सुधारक महात्मा तथा उच्चगुणों से युक्त महामानव थे। विषम परिस्थितियों में अवतरित इस संत की समाज सुधार सम्बन्धी देन अविस्मरणीय है। अजस्र अखण्ड रूप में प्रवाहित होने वाली उनकी काव्य पयस्वनी आज भी भावुक भक्तों, सहृदय पाठकों, श्रोताओं, नीर-क्षीर विवेकी समीक्षकों, सुधी आलोचकों तथा पण्डितों को आह्लादित करने में सवर्था सक्षम है। उनकी सरल-सहज वाणी सभी धर्मों, सम्प्रदायों के अनुयायियों के लिए समान रूप से अनुकरणीय है। कबीर ने हिन्दू-मुस्लिम सामञ्जस्य की पृष्ठभूमि प्रदान करके भारतवर्ष की नैय्या के खेवैया बनकर देश को प्रगति पथ पर अग्रसारित किया। संत कबीर का यही यथार्थ मूल्यांकन है।